It is at this stage that there is introduced the simile of two birds sitting on the same tree (verse 20) and continued. This verse has been interpreted to signify the two kinds of souls, the Supreme Soul or *Paramātman* and the Individual Soul or the *Jīvātman*. The *Jīvātman* eats the sweet berries of the tree and the *Paramātman* simply looks on, without eating. According to the usual interpretation, this brings out the distinction between the Individual Soul that enjoys and the Supreme Soul that simply "Is," without activities and experiences like enjoyment and suffering.

But the context is very inappropriate for such a point to be raised. The context is the eagerness of the poet to know the truth and the dawning of such a transcendental vision of the truth. Thus what we expect here is a distinction between those who know the truth and those who know only the outside, the external world, without enjoying the fruits of wisdom. There is no hint at all that what one of the two birds experiences is of the nature of imperfection, of the nature of suffering. It is spoken of as sweet (*svādu*) and the birds are later spoken of as "eating the honey" (*madhvadaḥ* in verse 22). In verse 21, there is the reference to "the birds that ceaselessly sing forth about their share of immortality before the learned assembly", in which assembly, the wise entered the heart of the poet; and it is in the following verse that there is the reference to "the birds eating honey in the tree". So what eats is the superior between the two birds. We cannot also ignore the fact that Pippalāda (one who eats the berry) is a wise sage and not a suffering soul.

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

Following upon this there is a glorification of poetry. The meaning of many of the words used there, like the names of metres and the kinds of poems, are unknown to us. We do not know what they exactly mean. There is the composition of particular kinds of songs with particular metres and there is also the reference to the "establishment of the river in the heaven and the vision of the sun." (verse 25). There is also a mention in this verse (25) of the exaltation due to the influence of poetry. All these points in glorification of poetry are contained in three verses (23 to 25).

Then there is an invocation to a cow, which must be the wisdom itself. The references in the latter portion of this poem about the immortal having the same origin as the mortal (verses 30 and 38) are proof that the two birds mentioned in verse 20 are the one who has attained to the transcendental wisdom and the other who is still in the normal plane of knowledge. One who knows becomes immortal (verse 23). This contrast is clear in some of the verses that follow.

There is the simile of a cow in four verses (verses 26 to 29) in which the poet welcomes the wisdom conceived of as a cow. The oven is used for heating the milk and here it is for preparing the wisdom for one's enjoyment (verse 26). The milk drawn for the sake of the Aśvins (verse 27) must be sweet in so far as the Asvins are fond of *Madhu* (honey). Certainly he himself is the calf in this context. I do not know who is meant as the expert in drawing the milk (verse 26); it must be the *Savitā* (which means also inspirer). It is the sight of the Sun-god that was the starting point in attaining the wisdom referred to here. The picture of the mother cow and the calf is really beautiful here. There is some difficulty in interpreting verse 29. What is this which has encompassed the cow. Is it the light of wisdom? Does the idea relate to the Sun born of the Dawn? The picture is not quite clear. The inner meaning is the dawning of wisdom; but there

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

is some difficulty in understanding how this encompasses the cow.

In verse 30 there is a contrast drawn in the first half, between two conditions—lying down and moving fast, and rushing and remaining firm. In the second half there is a reference to the mortal and the immortal having the same origin; the life of the dead is spoken of as being immortal. If the word *Mṛta* (dead) means only " relieved from bodily entanglement " through wisdom, then this can be the condition in which the poet finds himself when the light of wisdom has dawned on him; and two states of quiet and brisk movement is quite in fitting with the condition of such a poet. In the next verse (31) there is the vision of the protector. In the following one (32) the reference to the condition of embryo in the womb of the mother is clear; the first half can well fit into such an idea found in the second half. In the next verse (33) there is the mention of the heaven as the father and mother etc. My own view is that in these four verses (30 to 33) there is the mystery of the creation and the embodiment of the Self. The reference to the father and mother must be related to the ideas found in an earlier section (in dealing with verses 7 to 10).

In the following two verses (34 and 35) there is a series of four questions in one and the corresponding answers to them in the next. The questions refer to the created world. There is a clear ritualistic bias in this context and it is a glorification of the ritual of Soma Sacrifice with its pavement which is spoken of as the farthest limit of the earth, the pivotal point of the world being the Sacrifice, the Soma being the seed for the procreation of humanity and Brahman being the seat of speech. The Brahman is one of the group of worshippers that participate in the Sacrifice. The word means " poetry " and perhaps he is the poet who sits at the Secrifice and composes poetry and invokes the gods with the poems that he composes. That is why he is called Brahman also, so far as I can understand the position.

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

In the following verse (36) there is mentioned a seven-fold seed for the creation of the world and this may be compared to the seventh of those who were born together, stated in verse 15 above. These seeds are spoken of as wise and encompassing the world. We do not know the exact significance of the seven-fold scheme in the origins of the world and in some of the hidden facts in this universe.

The succeeding two verses (37 and 38) definitely refer to the condition in which the poet finds himself in the world after he has attained the poetic vision. In verse 39 there is a reference to real poetry comprehending the divine as its true purport. What follows this (verse 40) is again a benediction to poetry, and again descriptions of poetry continue in verses 41 and 42.

Verse 41 is again a glorification of the Soma Sacrifice as the first *Dharma* to appear in the world. The three forms of the Supreme are mentioned in the next verse with their different functions (verse 44) and this cannot be dissociated from the first verse where the two brothers of the Supreme is also mentioned. Speech is far more extensive than what men know, which is only a quarter of the real nature of speech (verse 45) and the various gods are only different names of the same god (46). Here the neuter (Sat, meaning reality) has no special significance. "They applied to the central Principle the neuter term Sat, to show that it is above sex." Indian Philosophy by Radhakrishnan, P. 94). The context is about gods known by different names and not about the reality of the universe, and the neuter is used only in a general way, not referring to any particular god.

In the above section, there is dealt with creation and moral order and religious practices, as seen by the poet and there is a return to the point at which the poem started, the birds and the chariot, in verses 47 and 48. The poem comes to its conculsion with an invocation to Sarasvatī, the Goddess

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

of wisdom and of poetic art (verse 49) and the fruits of following the moral order is mentioned in verse 50. The Religious practices are not unilateral in their function and in their fruits; it is a matter of co-operation and co-ordination between the world and the heaven (51) and there is the concluding invocation to the Bird in verse 52.

It is possible to trace some continuity and to detect some unity in the whole poem. Even from ancient times, the poem had been taken as of a miscellaneous nature. The first 41 verses were taken as forming a unit with the All-gods as the Deity and for the remaining 11 verses they assigned different deities. The first part does not exhibit any sort of individuality for the Deity, if there is any Deity at all, and so they termed the Deity as All-god. When there is a definite, unitary group of gods, they are addressed to as All-Gods; when there are many gods in their individual capacity brought together, then also the term "All-gods" is applied. The third case is when the nature of the deities is not clear. This is the case in the poem at hand.

One thing is certain; this is not a haphazard jumble of many verses in a single hymn. There is a unity and there is continuity of thought also, within the whole poem. Not only this, the entire collection of the twenty five hymns by Dīrghatamas has a plan, and must have been in this order from a very early stage. That must be the ground for some stories appearing about the poet. There are hymns in praise of many gods and the final hymn is of a philosophical nature where there is clear evidence of the poet having attained to some transcendental vision. The story about him is that he was born blind and that after prayers to the various gods, he got supreme wisdom. According to the *Sarvānukramaṇī*, this poem contains more of introspection than of prayers.

Grassmann relegates this hymn, along with a large number of hymns, to the appendix, in his translation. In the

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

introductory note to the translation, he assigns it to the latest period of the *Ṛgveda*. The whole poem is also divided by him into a few sections. The first section of 10 verses he calls Cosmological questions and fancies; verses 11 to 15 give a mystic description of the Year and the seasons; the following 7 verses (16 to 22) he speaks of as very obscure and impossible to understand; the three verses (23 to 25) deal with the common metres, and the four verses following (26 to 29) deal with the cow which is the cloud that gives rain; the four verses (30 to 33) are again obscure and verses 34 to 42 and 45 are a glorification of the Sacred Speech; in the remaining section, omitting verse 48, we find many gods in the Sacrifices and he prefers to bring the verse 48 in the group of verses 11 to 15.

Geldner in his notes to his translation speaks of the hymn as containing the wonders of Nature and of man's life, speculations about time and about human, especially poetic, language; they are all clothed in the form of allegories and riddles, and their solution is difficult and even Sāyaṇa does not help us much. Geldner relates the hymn with ritual and the three brothers mentioned in the very first verse, according to him, are the three fires in a ritual. The indications to ritualistic Fire are there and they cannot be ignored in trying to understand the general purport of the hymn. There is an address directly made, to Agni (Fire) in verse 11 and the reference to Indra and Soma in verse 19 indicate a close relation to the ritual. The spotted Bull in verse 43 in Soma and there is mention of Soma in verse 35. Sacrifice is mentioned in verses 35 and 50. All these references indicate that the poet had the setting of a Sacrifice around him for the composition of the poem. There is the term *Vidatha* (a learned assembly) in verse 21, and this must be the Assembly called together at the time of the Sacrifice. That is the occasion for people to come together and for

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

people to address the assemblies, and ability to address such assemblies is one of the most coveted privileges of the people at that time. There is frequent prayer for such an ability (cf. passages like *Vidatham ā Vedema*—May we be able to address a learned assembly : *Ṛgveda* I-17-25). The concluding verse speaks of the Bird as the child of water, of the herbs, and this fits in well with Fire. Even the term *Hotā* (invoker) in the first verse fits in better with Fire than with the Sun. Still the descriptions of the chariot reminds one more of the Sun than of Fire, and that is why I have said that it is the sight of the Sun that was the starting point in the realisation of the vision of the Ultimate Truth by Dīrghatamas, as described in this poem.

The contents of the poem turn out to be a riddle to us because we have lost the clue to the correct interpretation of the poem. We do not know many of the symbols and many of the conventions current in those days. The poet had composed 24 poems about various gods and this group is followed by a long poem about the realisation of poetic vision; the poem seems to have been recited at a Sacrifice where learned people had assembled. The poet describes the world and its origin and of the nature of language and the secrets of the language understood by him in his poetic vision.

In the case of poem relating to ritual, we have a fairly good collection preserved for us and we are able to understand such poems fairly easily and fairly correctly. But when it comes to a poem like this, which is in the plane of intellectualism, even of intuition, we do not have many specimens and we are puzzled at the mysteries for which we have lost all the clues.

I do not consider the poem as a later specimen of Vedic literature. From the point of view of the poet, who has become a sort of mythological figure with his still more romantic son about whom there have grown up more stories,

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

from the point of view of grammar and vocabulary and from the point of view of his associate poets in the first *Maṇḍala* the presumption is that this poem is a specimen of the old heritage of *Ṛgvedic* literature. There is nothing to prove that philosophy was only making its appearance in India at that time. Great geniuses do not fit into an arrangement in a serial on the basis of Evolution. Great poets like Vēdavyāsa and Vālmīki and Kālidāsa, great thinkers like Śaṅkara, great astronomers like Āryabhaṭa and great critics like Bharata do not wait for their turn in the queue of Evolution in their respective fields; they come and exhibit their genius. The same is the case with Dīrghatamas in the Vedic times. *The Upaniṣads* are more attempts to preserve and to understand an ancient tradition than a new illumination. I have approached the problem from this angle.

There must be a complete shift in our whole approach to the problem of interpreting the civilization of the Vedas. If we think of the Vedic Aryans as a primitive nomadic people, divided into a large number of clans under their own chieftains, each clan fighting with the others, and all of them with the non-Aryans people, if we regard the *Ṛgvedic* poetry as pastoral, composed by *priests* and employed in simple rituals, which were getting more and more complicated, and if we regard their religion as *animism* or as crude Nature worship, we cannot get at the real nature of *Ṛgvedic* poetry. We must have the true vision of a great people, who had developed a very advanced civilization, who had produced a very great literature, who had been living a full life, enjoying festivals and entertainments associated with their national Institutions like the Soma Sacrifice. The Soma Sacrifice was the occasion for poets and thinkers to come together and to discuss the profound problems relating to the nature of the Universe and the relation of man to the phenomena of Nature, also to recite their poems, mostly in the form of Odes to the

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

gods who were their companions and helpers. The Brahman is one of the many persons who took part in the Soma Sacrifice, and he had no definite function like the *Udgātar* (Singer) the *Hotar* (invoker) and the Adhvaryu (the Performer of the Rituals). He is the man who was given an honoured position at the Ceremonial, who could recite a new poem. The whole place is called a *Sadas* (a place where they sit together) or a *Vidatha* (an Assembly of Learned People). Unless we can see Dīrghatamas sitting in that honoured position at a Soma Sacrifice and reciting his last and best poem before the assembly of the great scholars and learned men, we cannot understand the true import of the poem. It is only after a person could see Truth in its real Nature and who could compose a poem on that Truth, that he will be allowed that position at the Sacrifice, and then he was called a *Ṛṣi*. I look at this poem with such a setting.

It is not possible for me to give a clear analysis of the whole poem. I am myself able only to find some general directions and not at all the positions of the various details. To give a complete analysis of the poem and an attempt at a fuller discussion of the problem is not within the scope of such an Introduction. That has to be taken up as an independent study.

C. KUNHAN RAJA

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

अस्य वामस्य सूक्तम्

(ऋग्वेदः मण्डलम् १. सूक्तम् १६४)

सायणभाष्येण आत्मानन्दभाष्येण चोपेतम्

सायणभाष्यम्

अस्य वामस्येति द्विपञ्चाशदृचमष्टमं सूक्तं दैर्घतमसम्। अत्रेयमनुक्रमणिका—अस्य द्विपञ्चाशदल्पस्तवं त्वेतत् संशयोत्थापनप्रश्नप्रतिवाक्यान्यत्र प्रायेण ज्ञानमोक्षाक्षरप्रशंसा च। पञ्चपादम्—साकंजानाम्—यद्गायत्रे—अयं स शिङ्क्ते—सप्तार्धगर्भाः—गौरीः—इति जगत्यः। एतदन्तं तु वैश्वदेवम्। तस्याः समुद्राः—इति वाचः समुद्रा आपोऽक्षरम्। सा प्रस्तारपङ्क्तिः। शकमयम्—इति शकधूमः। उक्षाणं पृश्निम्—इति सोमः। त्रयः केशिनः—इत्यग्निः सूर्यो वायुश्च केशिनः। चत्वारि वाक्—वाचः। इन्द्रं मित्रम्—सौर्यै। द्वादश—इति संवत्सरसंस्थं कालचक्रवर्णनम्। यस्ते—सरस्वत्यै। यज्ञेन—साध्येभ्यः। परा अनुष्टप् सौरी पर्जन्याग्निदेवता वा। अन्त्या सरस्वते सूर्याय वा—इति। अत्र स्तुत्यबहुत्वेन स्तुतिभागस्याल्पीयस्त्वादिदं सूक्तमल्पस्तवम्। न सूक्तान्तरवद्बहुस्तवम्। इदमेव वैलक्षण्यं तुशब्देन द्योत्यते। अस्मिन् सूक्ते प्रायेण संशयोत्थापनादयो बहवोऽर्थाः प्रतिपाद्यन्ते। अचिकित्वाञ्चिकितुषः—इत्यनया संशय उत्थाप्यते। पृच्छामि त्वा—इत्यत्र प्रश्नः प्रतीयते। इयं वेदिः—इत्यत्र प्रतिवचनम्। य ईं चकार—इत्यादिना ज्ञानप्रशंसा प्रतिपाद्यते। अपश्यं गोपाम्—इत्यादिना ब्रह्मसाक्षात्काररूपस्य प्रशंसा। न क्षरतीत्यक्षरं ब्रह्म। द्वा सुपर्णा—इत्यादिना तस्य प्रशंसा। पञ्चपादं पितरम्—साकंजानां सप्तथम्—यद्गायत्रे अधि—अयं स शिङ्क्ते—सप्तार्धगर्भाः—गौरी-

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

मिमाय—इति षड्जगत्यः । समानमेतत्—इत्यनुष्टुप् । तस्याः समुद्राः—इति प्रस्तारपङ्क्तिः । तल्लक्षणं छन्दोग्रन्थे सूत्रितम्—प्रस्तारपङ्क्तिः पुरतः—इति । पुरतः पूर्वार्धे द्वादशाक्षरौ जागतौ पादौ । ततो द्वावष्टाक्षरौ गायत्रौ । सा प्रस्तार-पङ्क्तिः—इति सूत्रार्थः । अनुक्रमण्यामप्युक्तम्—आद्यौ चेत् प्रस्तारपङ्क्तिः—इति । शिष्टा अनादेशपरिभाषया त्रिष्टुभः । गौरीर्मिमाय—इत्येतदन्तानां विश्वे देवा देवता । तस्याः समुद्राः—इत्यस्याः पूर्वार्धस्य वाग्देवता । उत्तरार्धस्यापः । शकमयम्—इत्यस्याः पूर्वार्धस्य शकधूमः । उक्षाणं पृश्निम्—इत्युत्तरार्धस्य सोमो देवता । त्रयः केशिनः—इत्यस्या अग्निसूर्यवायवः । चत्वारि वाक्—इत्येषा वाग्देवताका । इन्द्रं मित्रं वरुणम्—कृष्णं नियानम्—इत्येते सूर्यदेवत्ये । द्वादश प्रधयः—इत्यस्याः संवत्सरात्मा कालो देवता । यस्ते स्तनः—इत्यस्याः सरस्वती । यज्ञेन—इत्यस्याः साध्या देवता । समानमेतत्—इत्यस्याः सूर्यः पर्जन्यो वाग्नयो वा देवता । दिव्यं सुपर्णम्—इत्यस्याः सरस्वान् सूर्यो वा देवता । कृत्स्नसूक्तस्य विनियोगं शौनक आह—

स्तेयं कृत्वा द्विजो मोहात् त्रिरात्रोपोषितः शुचिः ।
सूक्तं जप्त्वास्यवामीयं क्षिप्रं मुच्येत किल्बिषात् ॥

इति । महाव्रते वैश्वदेवशस्त्रे वैश्वदेवं निविद्धानं द्विप्रतीकम् । तत्रास्यवामस्येत्यादि-कमेकचत्वारिंशदृचं प्रथमं प्रतीकम् । पञ्चमारण्यके सूत्रितम्—अस्य वामस्य पलि-तस्य होतुः इति सलिलस्य दैर्घतमस एकचत्वारिंशतम्—इति ॥

आत्मानन्दभाष्यम्

अस्य वामस्य—इति द्विपञ्चाशन्मन्त्रात्मकमिदं सूक्तं दैर्घतमसं आत्मदैवतम् । यद्यपीह स्कन्दभाष्यादिषु उद्गीथभास्करादिभिश्च शौनकं च वेदमित्रं च बृहद्देवताकारं च अनुक्रमणिकाकारं च विष्णुधर्मोत्तरं चानादृत्य सूक्तव्याख्या कृता तथापि वयमत्र स्कन्दादिव्याख्या अधियज्ञविषया एव क्वचित्तु निरुक्तानुसारादधिदैवतविषया एवेति निश्चित्य क्वचिदध्यात्मविषयां शौनकादिरीतिमाश्रित्य अध्यात्मं व्याख्यास्यामः ।

अत्र शौनकादिमतस्य संग्रहीतुर्वररुचेरनुक्रमणिका—

अस्य द्विपञ्चाशदल्पस्त्वं त्वेतत् ।

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

अल्पस्य सूक्ष्मस्य ब्रह्मणः प्रतिपादनादत्र इत्यर्थः । अपर आह—अल्पिकाया देवतायाः स्तुतिरत्र इति । देवताया एवाल्पैः पदैस्तवोऽत्र इत्यन्य आह । तदुभयमपि वेदमित्रो निषेधति—

न देवताल्पिका काचिदन्यत्रापि पदाल्पता ।
उपेन्द्र तव वीर्ये च तन्नो मित्रोऽल्पिका भवेत् ॥

इति ।

संशयोत्थापनप्रश्नप्रतिवाक्यान्यत्र प्रायेण ।

संशयोत्थापनमाशङ्कयोत्तरमत्र प्रायेण । प्रश्नाश्चात्र क्वचिद्दृश्यन्ते । तेषां प्रतिवचनानि चात्र प्रायेण । तथा चायमर्थः । यद्यपि सूत्रान्तरेष्वपि संशयोत्थापनादित्रिकमस्ति तथाप्यत्र सूक्ते संशयोत्थापनादिकं प्रायेण बाहुल्येनास्ति । संशयोत्थापनमाशङ्कयोत्तरं शास्त्रान्तरनिराकरणमन्यविषयत्वकथनं वा ।

ज्ञानमोक्षाक्षरप्रशंसा च ।

ज्ञायते येन तज्ज्ञानं ज्ञानसाधनम् । मोक्षो निरवद्यं परमात्मरूपम् । अक्षरस्य जीवात्मस्वरूपस्याक्षरमित्याख्या । तेषां प्रशंसा प्रतिपादनम् । यद्वा ज्ञानेन मोक्षः अक्षरत्वप्रतिपादनम् । अक्षरशब्देन ब्रह्मणो जीवस्याविद्यायाश्चाभिधानमुक्तम् । अक्षते व्याप्नोतीत्यक्षरं ब्रह्म । अश्नातीति जीवात्मा । न क्षरतीत्यविद्या ज्ञानादृते न क्षरति यतः । एवं च देवता परमात्मैव सूक्तस्येत्युक्तं भवति । छन्दस्त्रिष्टुप् ।

पञ्चपादं साकंजानां यद्गायत्रेऽयं स शिङ्क्ते सप्तार्धगर्भा गौरीरिति जगत्यः । षट् ।

एतदन्तं तु वैश्वदेवम् ।

गौरीर्मिमायेति ऋगन्तं वैश्वदेवम् । तुशब्दोऽत्र न पारिभाषिकः । किंतु विशेषद्योती । ऋषिदैवतछन्दसामुपरि श्रूयमाणत्वात् । एतदन्तमेव वैश्वदेवमिति । तदुक्तम्—

अस्य वामस्य पलितस्य होतुरिति वैश्वदेवं बहुरूपम् ।
बहुरूपं वा एतदहरेतस्याह्नो रूपम् ॥
गौरीर्मिमाय सलिलानि तक्षतीत्येतदन्तम् ।

इति । वैश्वदेवशस्त्रे विनियुक्तत्वादेव वैश्वदेवम् । न तु विश्वे देवा देवताः । तल्लिङ्गादर्शनात् बभ्रुरेक इतिवत् । ज्ञानमोक्षाक्षरैर्नानार्थत्वेन यदि वैश्वदेवमङ्गीकुर्मः तर्हि तस्याः समुद्राः—इत्याद्यपि वैश्वदेवं स्यात् । तस्माद्विनियोजको वेदो न प्रमाणम् ।

तस्याः समुद्राः इति वाचः समुद्राः ।

तस्याः समुद्राः—इति मन्त्रे समुद्रा इति वाच इत्यर्थः ।

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

आपोऽक्षरम् ।

तस्याः—इति मन्त्रे ततः क्षरत्यक्षरमित्यक्षरमाप इत्यर्थः ।

सा प्रस्तारपङ्क्तिः ।

तस्याः—इति ऋगेव ।

शकमयमिति शकधूमः ।

अत्र शकमयधूमो देवता । मन्त्रव्याख्यावसरे विशेषं वक्ष्यामः ।

उक्षाणं पृश्निमिति सोमः ।

अत्र सोमो देवता ।

त्रयः केशिन इत्यग्निः सूर्यो वायुश्च केशिनः ।

चत्वारि वाग्वाचः ।

चत्वारि वाक्—इति मन्त्रे वागिति वाच इत्यर्थः ।

इन्द्रं मित्रं सौर्यौ ।

द्वौ । सूर्योपस्थाने विनियुक्तत्वात् । यत इन्द्रं मित्रम्—इत्यत्र सूर्यनामापि नोपलभामहे रात्र्यध्ययननिवृत्त्यर्थं सौर्यत्वकथनमनयोः ।

द्वादशेति ।

द्वादश प्रधयश्चक्रमेकम्—इत्यत्र ।

संवत्सरसंस्थं कालचक्रवर्णनम् ।

दृश्यते इति शेषः ।

यस्ते सरस्वत्यै ।

यस्ते स्तनः शशयः—इत्येषा ऋक् सरस्वत्यै सरस्वतीदेवतार्थः ।

यज्ञेन साध्येभ्यः ।

यज्ञेन यज्ञमयजन्त—इत्येषा ऋक् साध्यान् बोधयितुं प्रवृत्ता ।

परानुष्टुप् ।

समानमेतदुदकम्—इत्येषा ऋक् अनुष्टुप् ।

सौरी ।

सूर्योपस्थाने विनियुक्तत्वाद्रात्रौ न पाठ्या । न च सूर्योऽत्र प्रतिपाद्यः । तत्र तन्नाम्नोऽप्यदर्शनात् ।

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

पर्जन्याग्निदेवता वान्त्या ।

अन्त्या दिव्यं सुपर्णम्—इत्येषा ऋक् ।

सरस्वते ।

सरस्वन्तमाह ।

सूर्याय वा ।

सूर्यं वाह । सौर्यत्वं पूर्ववदेव वाच्यम् ।

सर्वमेतत् सूक्तमध्यात्मपरम् । नात्रान्यार्थता वक्तुं शक्या । अत्र विष्णुधर्मोत्तरार्धे बृहति पुष्करो नाम यक्षो दाशरथिं रामं प्रति राजधर्मादिकमुक्त्वा अथर्वविधानं सामविधानं यजुर्विधानमृग्विधानं च समाप्य मोक्षार्थे अस्यवामीयं सूक्तमुक्तवान् । तदनुसारेणैतत् सूक्तं विवृणोमि ।

अस्य वामस्य पलितस्य होतुस्तस्य भ्राता मध्यमो अस्त्यश्नः ।
तृतीयो भ्राता घृतपृष्ठो अस्यात्रापश्यं विश्पतिं सप्तपुत्रम् ॥ १ ॥

अत्र द्वितीयपादे तच्छब्दश्रुतेः प्रथमपादे प्रतिविशेषणं योग्यक्रियार्थसंबन्धो यच्छब्दोऽध्याहार्यः । योऽयं दिवि द्योतते **तस्य अस्य वामस्य** वननीयस्य संभजनीयस्यारोग्यार्थिभिः सर्वैः सेवनीयस्य । **पलितस्य** पालयितुः प्रकाशवृष्टयादिप्रदानेन पालकस्य । तथा योऽयं दिवि द्योतते तस्यास्य **होतुः** ह्वातव्यस्याह्वानार्हस्यादित्यस्य **मध्यमः** मध्यमस्थानः । मध्ये भवो वायुरुच्यते । आदित्याग्नी अपेक्ष्यास्य मध्यमत्वम् । स च **अश्नः** सर्वत्र व्याप्तः । न हि वायुरहितः कश्चित् प्रदेशोऽस्ति । तादृशो **भ्राता अस्ति** । भ्रातृस्थानीयो भवति । यथा लोके भ्राता पितृधनस्य भागं हरति तद्वत् । मध्यस्थानमन्तरिक्षलोकं हरति इति वा । वृष्टयर्थं रश्मिभिराहृतानां भौमानां रसानां हरणाद्वा भ्रातेत्युच्यते । पित्र्येण धनेन स्वार्जितेन वा भर्तव्यो भवतीति भ्राता । मध्यमो वायुरपि वृष्टयर्थं रसैर्भक्तव्यो भवति । किंच **घृतपृष्ठः** घृतमाहुतिलक्षणं पृष्ठे यस्य तादृशो **भ्राता अस्य** तस्य **तृतीयः** अस्ति भवति । त्रयाणां पूरणस्तृतीयः । उक्तोभयापेक्षया तृतीयत्वम् ।

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

भ्रातृत्वं प्रतिपादितप्रकारेणात्रापि द्रष्टव्यम् । रात्रौ सवितुस्तेजोभागस्य हरणात् दिवा स्वकीयतेजसो भागस्य तदर्थमेव भक्तव्यत्वाद्वा भ्रातृत्वम् । **अत्र** एषु भ्रातृषु मध्ये पुरोदेशे वा **विश्पतिं** विशां प्रजानां पालयितारम् । **सप्तपुत्रं** सर्पणरश्मिपुत्रोपेतम् । ऐतिहासिकपक्षे—अदितिः पुत्रकामा—इति प्रस्तुते मित्रवरुणादिष्वदितिपुत्रेष्वस्यादित्यस्य सप्तमपुत्रत्वम् । ईदृशं महानुभावमादित्यं **अपश्यं** अद्राक्षम् । भावनयात्मत्वेन साक्षात्करोमीत्यर्थः । तद्योऽहं सौऽसौ योऽसौ सोऽहम्—इति श्रुतिः ।

एवं वा । अस्य वामस्य विश्वस्योद्गिरतुः । स्रष्टुरित्यर्थः । पलितस्य पालयितुः स्वसृष्टजगत्पालनशीलस्य होतुः आदातुः । स्वस्मिन् संहर्तुः इत्यर्थः । परमेश्वरस्य सृष्ट्यादिकर्तृत्वं श्रुतिस्मृतिपुराणादिषु प्रसिद्धम् । तस्य तादृशस्य परमेश्वरस्य भ्राता तद्भागहारी तदंशभूतः सूत्रात्मा मध्यमः सर्वत्र मध्ये वर्तमानः अस्ति जगद्धारकत्वेन वर्तते । स च अश्नः व्यापनशीलः । वायुना वै गौतम सूत्रेणायं च लोकः परश्च लोकः सर्वाणि च भूतानि संरब्धानि—इति श्रुतेः । वक्ष्यमाणविराडपेक्षया वा मध्यमत्वम् । किंच अस्य परमेश्वरस्य तृतीयो घृतपृष्ठः । घृतमित्युदकनाम । तेन तत्कार्यं शरीरमुच्यते । तदेव पृष्ठं स्पर्शकं वा यस्य स तादृशः । पृष्ठं स्पृशतेः—इति निरुक्तम् । यद्वा प्रदीप्तपृष्ठः । पृष्ठशब्दः कृत्स्नशरीरोपलक्षकः । प्रकाशितशरीराभिमानीत्यर्थः । न त्वयं सूक्ष्मशरीराभिमानिसूत्रात्मवत् स्पर्शनाविषयो भवति । अत्रैषु मध्ये विश्पतिं विशां प्रजानां पतिम् । उपलक्षणमेतत् । सर्वस्य पतिमित्यर्थः । सर्वस्य पतिः सर्वस्येशानः—इति श्रुतेः । सप्तपुत्रं सप्त लोकाः पुत्रा यस्य तादृशम् । स्वमायया सृष्टसर्वलोकमित्यर्थः । अपश्यं पश्येयम् । साक्षात्करोमीत्यर्थः ।

अयमर्थः । स्वाधीनमायया जगत्कारणभूतः परमेश्वर एकः । तत उत्पन्नौ स्थूलसूक्ष्मशरीराभिमानिनौ द्वौ विराट्सूत्रात्मानौ । तेषु मध्ये द्वयोः साक्षात्कारेण मोक्षाभावात् सृष्ट्यादिकारणं परमेश्वरं ज्ञेयत्वेन प्रसिद्धं श्रवणमननादिसाधनेन साक्षात्करोमीत्यर्थः ।

एवमुत्तरत्राप्यध्यात्मपरतया योजयितुं शक्यम् । तथापि स्वरसत्वाभावात् ग्रन्थविस्तरभयाच्च न लिख्यते । यत्र—द्वा सुपर्णा—इत्यादौ स्फुटमाध्यात्मिको ह्यर्थः प्रतीयते तत्र तत्र प्रतिपादयामः ।

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

अयं मन्त्रो यास्केन व्याख्यातः—अस्य वामस्य वननीयस्य पलितस्य पालयितुः—इत्यादिना । तच्च व्याख्यानमत्रानुसन्धेयम् ॥

१. घृतऽपृष्ठः—सप्तऽपुत्रम्—इति पदपाठः ।

अस्य वामस्य—इत्यस्यामृचि अवस्थात्रयोक्तिपूर्वं आत्मा उच्यते चित्स्वरूपः । अस्य प्रत्यक्षादिप्रमाणस्यापरोक्षस्य । वामस्य कुब्जस्य शरीरेण परिच्छिन्नस्य व्यापकस्य वा । यो होता उद्गाता विचारकः तस्य होतुः । जाग्रदवस्थायां नाम्ना विश्वस्य प्रथमस्य भ्रातुः द्वितीयो मध्यमः अस्ति भवति । मध्ये स्वप्ने भवतीति मध्यमः नाम्ना तैजसः । अश्नः । मेघस्य गिरेर्वा नामैतत् । तैजसो हि मेघसदृशः निद्रया तिरोहिततेजस्त्वात् । स्वप्नाख्यगन्धर्वनगराधिष्ठातृत्वाच्च । गिरिवदाश्चर्यविषयः । तदुक्तम्—

ग्राम्यो विश्वस्तैजसोऽद्रिश्चान्तिमः प्राज्ञ ईरितः ।
तुरीयं श्वेतमत्राद्वः सर्वानुस्यूतमद्वयम् ॥

इति । अस्य होतुस्तृतीयो भ्राता सुषुप्तो नाम्ना प्राज्ञो घृतपृष्ठः । घृतौ क्षरितौ लीनौ पृष्ठौ परिभवौ बाह्यप्रदेशसमौ जागरस्वप्नौ यस्मिन् स घृतपृष्ठः प्राज्ञः । घृ क्षरणदीप्त्योः । अत्र विश्वादिषु त्रिषु विश्पतिं विश्वतैजसप्राज्ञानां पतिं पातारं स्वचैतन्यदानेन रक्षकं तुरीयम् । सप्तपुत्रम् । सप्त महदादयो जगत्प्रकृतयः पुत्राः कार्यभूता विकृतयो यस्य स तथा । अपश्यं दृष्टवानास्मि ।

महामाहात्म्ययोगाद्दीर्घतमा अपरोक्षं परोक्षं च तत्तदात्मैव भूत्वा वक्ति जगदनुग्रहार्थम् । प्रथमम्—अस्य—इति पदं अन्तोदात्तम् । ऊडिदंपदाद्यप्पुम्रैद्युभ्यः—इति तृतीयादिविभक्तिरुदात्ता । द्वितीयम्—अस्य—इति पदमनुदात्तम् । इदमोऽन्वादेशेऽशनुदात्तस्तृतीयादौ—इत्यनुदात्तत्वान्नान्तोदात्तं शास्त्रमस्ति । सूक्ते सर्वर्चां व्याख्यानमेवमेव । एतदुक्तं पुष्करोक्ते कल्पे—

मीमांसमानौ जीवेशौ जागरादौ विचिन्तयेत् ।
विश्वोऽहं तैजसोऽहं वै प्राज्ञोऽहं तुर्य एव च ॥

इति । अध्यात्मविदेवानपेक्ष एवं विचिन्तयेन्नान्य इति पुष्कराभिप्रायः । तत्पूर्वग्रन्थालोचनात् ॥

सप्त युञ्जन्ति रथमेकचक्रमेको अश्वो वहति सप्तनामा ।
त्रिनाभि चक्रमजरमनर्वं यत्रेमा विश्वा भुवनाधि तस्थुः ॥ २ ॥

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

एकंचक्रं एकरथाङ्गोपेतम् । यद्यपि त्रीणि चक्राणि तथापि तेषामेकरूपत्वादेकचक्रमित्युच्यते । **रथं** रंहणस्वभावं सूर्यस्य संबन्धिनं **सप्त** एतत्संख्याका अश्वाः **युञ्जन्ति** अनुबध्नन्ति । वहन्त्यहोरात्रनिर्वाहाय । किं वस्तुतः सप्त । नेत्याह— **एकः अश्वः वहति सप्तनामा** एक एव सप्ताभिधानः सप्तधा नमनप्रकारो वा । एक एव वायुः सप्तरूपं धृत्वा वहतीत्यर्थः । वाय्वधीनत्वादन्तरिक्षसंचारस्य । एकचक्रमित्युक्तम् । कीदृशं तदित्यत आह—**त्रिनाभिं चक्रं** वलयत्रयमध्यस्थितनाभिस्थानीयच्छिद्रत्रयोपेतम् । **अजरं** अमरणधर्मकम् । **अनर्वं** अशिथिलम् । पुनस्तदेव विशेष्यते—**यत्र** यस्मिंश्चक्रे **इमा विश्वा भुवना** इमानि प्रसिद्धानि सर्वाणि भूतजातानि **अधि** आश्रित्य **तस्थुः** तिष्ठन्ति ।

यद्वा एकचक्रमेकचारिणमसाहाय्येन संचरन्तं रथमादित्यमण्डलं सप्त युञ्जन्ति सर्पणस्वभावाः सप्तसंख्याका वा रश्मयः । सप्तप्रकारकार्या असाधारणाः परस्परविलक्षणाः षडृतवः । एकः साधारण इत्येवम् । अथवा मासद्वयात्मकाः षट् । अपरोऽधिकमासात्मक इत्येवं सप्तर्तवो युञ्जन्ति । एतस्य कार्यं निर्वहन्तीत्यर्थः । स चैकोऽसहायोऽश्वो व्यापनशील आदित्यः सप्तनामा सप्तरसानां संनमयितारो रश्मयो यस्य तादृशः सप्तर्षिभिः स्तूयमानो वादित्यो वहति धारयति । भ्रमयतीत्यर्थः । किम् । त्रिनाभि चक्रम् । तिस्रो नाभिस्थानीयाः सन्ध्याः संबद्धा वा त्रय ऋतवो यस्य तत्तादृशम् । के ते । ग्रीष्मवर्षाहेमन्ताख्याः । यद्वा भूतभविष्यद्वर्तमानाख्यास्त्रयः कालास्त्रिनाभयः । तद्विशिष्टं चक्रं चक्रवत् पुनःपुनः परिभ्रममाणं संवत्सराख्यं चक्रं अजरं मरणरहितम् । न हि कदाचिदपि कालो म्रियते ।

अनादिनिधनः कालः ।

इति स्मृतेः । अनर्वं अप्रतिहतम् । ईदृशं संवत्सराख्यं चक्रं नानाकालावयवोपेतं अयमादित्यः पुनरावर्तयति । संवत्सरादर्वाचीनानां तत्रैवान्तर्भावात् ततो युगादीनां तदावृत्तिसाध्यत्वात् संवत्सरस्य चक्रत्वेन निरूपणम् । पुनः कीदृशं तत् । यत्र यस्मिंश्चक्रे इमा विश्वा भुवना इमानि सर्वाणि भूतानि अधितस्थुः आश्रित्य तिष्ठन्ति । कालाधीनत्वात् सर्वस्य स्थितेः । ईदृशस्य कालस्य कारणभूतपरमेश्वरपरिज्ञानेन मोक्षसद्भावात् —ज्ञानमोक्षाक्षरप्रशंसा च—इत्यनुक्रमण्यामुक्तम् ।

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

अयमपि मन्त्रो यास्केन—सप्त युञ्जन्ति रथमेकचक्रमेकचारिणम्—इत्यादिना व्याख्यातः । तदत्राप्यनुसन्धेयम् ॥

२. एकँऽचक्रम्—सप्तऽनांमा—त्रिऽनाभिं-इति पदपाठः ।

वामस्येत्यनेन परिच्छिन्नस्येत्युक्तम् । केन परिच्छेदः । देहेनेत्याह । तन्मात्राः पञ्च । महदहमौ च द्वौ । एवं सप्त युञ्जन्ति । रथं रथरूपकल्पितं शरीरम् ।

शरीरं रथमेव च ।

इति श्रुतेः । एकचक्रं एकः कालः चक्रवद्भ्रामको यस्य तम् । एकः एक एवाहङ्कारोऽश्वस्थानीयो वहति चेष्टयति । सप्तनामा । सर्पयतीति सप्तः संक्षिपतीति वा । नामा नमयिता । स रुद्रश्रेष्ठको यस्य । अहङ्कारस्य रुद्रो देवता । फिट्स्वरेण सप्तशब्दोऽन्तोदात्तः । त्रिनाभि त्रिधा नभति । नभ दीप्तौ । इडजादिभ्यः । चक्रं एकचक्रमित्यत्र चक्रशब्देन यदुक्तं तत् । त्रिधा हि कालो भिद्यते । प्रकृतेः परः प्रकृतिसन्निहितः शुद्धब्रह्मणोऽर्वाचीनः । ईशः प्रकृतिचेष्टकः प्रथमः कालः । क्षणलवात्मा द्वितीयः । सूर्यात्मा तृतीयः । ईदृशं चक्रं यस्य रथस्य त्रिकालचक्रवद्भ्रामकत्वात् । अजरं यावज्ज्ञानं तावदिति शेषः । अनर्वं अगमयितृ । स्थानान्तरं न गच्छतीत्यगन्तृ इत्युच्यते । यत्र कालचक्रे इमा इमानि विश्वा सर्वाणि भुवना भुवनानि अधि अधिश्रित्य तस्थुः अविमुच्य तिष्ठन्ति । तदुक्तं कल्पे—

महदाद्या वहन्त्येतच्छरीरं कालचक्रितम् ।
परमध्यान्तभेदेन तं कालं त्रिविधं विदुः ॥

इति ॥

इमं रथमधि ये सप्त तस्थुः सप्तचक्रं सप्त वहन्त्यश्वाः ।
सप्त स्वसारो अभि सं नवन्ते यत्र गवां निहिता सप्त नाम ॥ ३ ॥

इमं उक्तस्वरूपमादित्यमण्डलाख्यं संवत्सराख्यं वा **रथं ये सप्त** रश्मयः **अधि तस्थुः** अधिष्ठिताः । संवत्सरपक्षेऽयनर्तुमासपक्षदिवसरात्रिमुहूर्ताख्याः सप्तावयवा अधितिष्ठन्ति । कीदृशं रथम् । **सप्तचक्रम्** । चकनाच्चरणात् क्रमणाद्वा चक्राणि रश्मयः । ते सप्त यस्य रथस्य तादृशमुभयविधं रथं पूर्वोक्ता अधिष्ठिता अश्वा व्यापनशीलाः सप्त वहन्ति निर्वहन्ति च । तादृशं रथं **सप्त स्वसारः**

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

स्वयंसरणाः । स्वरादित्यः । तेन सारिताः परस्परं स्वसृभूता वा सप्तसंख्याका वा रश्मय ऋतवश्च **अ॒भि सं न॑वन्ते** आभिमुख्येन संगच्छन्ते । असाधारणाः परस्परविलक्षणकार्याः षड्तवः सर्वसाधारण एक इति सप्तत्वम् । यद्वा उक्तरूपा मासद्वयात्मकाः षट् त्रयोदशमासात्मकः सप्तम इति सप्तत्वम् । कीदृशो रथ इति तदुच्यते । **यत्र॑** यस्मिन् रथे उभयविधे **गवां॑** वाचां स्तुतिरूपाणां **स॒प्त** सप्तविधानि **नाम॑** नामानि नमनानि सप्तस्वररूपाणि **निहि॑ता** निहितानि । सप्तस्वरोपेतैः सामभिः स्तुत्यं रथमित्यर्थः । यद्वा गवामुदकानां सप्त सर्पणस्वभावानि नाम नमनानि **यत्र** यासु स्वसृषु निहितानि स्वस्वारः परस्परस्वसृभूता देवनद्योऽभि सं नवन्ते ॥

३. स॒प्तऽच॑क्रम्—नि॒ऽहि॑ता—इति पदपाठः ।

सूक्ष्मदेहमाश्रित्योक्तम् । अथ स्थूलदेहमाश्रित्योच्यते । इमं प्रत्यक्षादिसन्निहितं रथं स्थूलदेहं अधि अधिष्ठाय आश्रित्य ये तस्थुः । यानि सप्ताङ्गानि वर्तन्ते तैरेव सप्ताङ्गैः सप्तचक्रो देहः । चक दीप्तौ प्रतीघाते च । सप्ताङ्गानि सप्त चक्राणि इष्टे प्रवर्तकानि अनिष्टान्निवर्तकानि यत्र स सप्तचक्रः । तं सप्तचक्रम् । सप्त अश्वाः रजस्तमःसहितानि पञ्च कर्मेन्द्रियाणि वहन्ति गमयन्ति चालयन्ति । इन्द्रियाणि हयान्याहुर्विषयांस्तेषु गोचरान्— इति श्रुतेः । सप्त धर्माधर्मसहितानि ज्ञानेन्द्रियाणि स्वसारो भगिनीस्थानीयानि । इतरेन्द्रियशक्तीनां अभि आभिमुख्येन सं नवन्ते प्रवर्तन्ते । णु स्तुतौ । अनेकार्था धातवः । अत्र कर्मव्यतीहारे तङ् । छान्दसः शप् । कुत्रेन्द्रियशक्तिस्तदाह । यत्र विषये गवां रजस्तमःसहितानां कर्मेन्द्रियाणां तथा धर्माधर्मसहितानां ज्ञानेन्द्रियाणां च निहिता नितरां हितानि अनुकूलानि सप्तसंख्याकानि नाम नामानि दैवतानि इन्द्रियदेवताः ।

दिग्वातार्कप्रचेतोऽश्विवह्नीन्द्रोपेन्द्रमित्रकाः ।
ज्ञानकर्मेन्द्रियाणां स्युः क्रमादेवा इमे दश ॥

तदुक्तं कल्पे—

सप्तचक्रमिदं देहं वहन्त्यः सप्तकर्मणाम् ।
ज्ञानेन्द्रियाणां सप्तैव देवतास्तु चतुर्दश ॥

एतन्मन्त्रप्रशंसाप्रकरणेऽप्युक्तम्—

मूर्धोरोजठरं कराङ्घ्रियुगलं सप्तः शरीरं वहत्
कामार्थाश्च रजस्तमांसि गमयन्त्यन्यानि खानि स्फुटम् ।

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

धर्माधर्मयुतानि सप्त विषयान् संप्राहयन्त्या मृतेः
खानां यत्र सुरैः प्रवृत्तिगमने—एवं तनुः स्थूलिका ॥

इति । अस्यायमर्थः । मूर्धादित्रिकं करौ अङ्घ्री चेति सप्ताङ्गानि चक्राख्यानि सप्तः । सप्तक इत्येव । सप्त वहत् शरीरं गमयन्ति चालयन्ति । खानि कर्मकरणानि कर्मेन्द्रियाणि रजस्तमसीत्येवं सप्तैव । तथान्यानि खानि धर्माधर्मसहितानि ज्ञानेन्द्रियाणि पञ्च । एवं सप्त । आ मृतेः विषयान् संप्राहयन्ति । यत्र येषु विषयेषु खानि सुरैरिन्द्रियदेवताभिः प्रवृत्तिं प्रापितानि इन्द्रियाणि तान् विषयान् संयोजयन्ति । एवं स्थूलशरीरमुक्तम् । तथा—

प्रवर्तेत निवर्तेत येन तच्चक्रमुच्यते ।
भ्रामकं पूर्वमन्त्रोक्तं चक्रं यद्भ्रमयत्यपि ॥

इति ॥

को द॑दर्श प्रथ॒मं जाय॑मानमस्थ॒न्वन्तं॒ यद॑न॒स्था बिभ॑र्ति ।
भूम्या॒ असु॒रसृ॑ग॒ात्मा क्व॑ स्वि॒त् को वि॒द्वांस॒मुप॑ गा॒त् प्रष्टु॑मे॒तत् ॥ ४ ॥

एवं प्रपञ्चस्य कालायत्ततां प्रतिपाद्य तस्य कारणभूतस्य परमेश्वरस्याविषयत्वमाह—**कः द॒दर्श॑** को द्रष्टुं शक्नुयात् । कदा । **प्रथमं** सृष्टेः पूर्वम् । अव्याकृतावस्थायामित्यर्थः । किम् । **जाय॑मानं** प्रथमभावविकारमापन्नम् । उत्पद्यमानं प्रपञ्चमित्यर्थः । दुर्ज्ञेयत्वे हेतुमाह—**यत्** यस्मात् । **अ॒स्थ॒न्वन्तं॑** अस्थिमन्तं सशरीरम् । उपलक्षणमेतत् । कार्यभावमापन्नमित्यर्थः । **अ॒न॒स्था** अस्थिरहिता अशरीरा सांख्यप्रसिद्धा प्रकृतिः वेदान्तप्रसिद्धेश्वरायत्ता माया **बिभ॑र्ति** गर्भवदन्तर्धारयति । अव्याकृतावस्थायामनस्थोऽशरीरः परमेश्वरो बिभर्ति । यदा केवलः परमेश्वरो मायाशबलितः सन्निदं जगन्निर्मितवानुत्पत्तिसमये देहादिसहितस्य कस्यचिदभावात् को ददर्श । तदानीं मनो नित्यमात्मा च नित्यः । तत्संयोगात् कश्चिदात्मा जानातीति चेत् सोऽपि न संभवतीत्यत आह—**भूम्याः** संबन्धि पार्थिवं स्थूलशरीरं **असुः** प्राणः तदुपलक्षितं सूक्ष्मशरीरं **असृ॑क्** शोणितम् । एतत् सप्तधातूपलक्षकम् । यद्यपि शरीरं पञ्चभूतात्मकं तथापि भूतद्वयप्रत्यक्षत्वात् तदपेक्षयोक्तम् । **आ॒त्मा** तैः संबद्धश्चेतनः **क्व॑ स्वि॒त्** कुत्रास्ते । न कश्चिदस्तीत्यर्थः । नान्यत् किंचन मिषत्—इति श्रुतेः । **वि॒द्वांसं॑** जगत्कारणविषयज्ञानवन्तमन्यं गुर्वादिकं **ए॒तत्** कारणं **प्रष्टुं कः** शिष्योऽल्पमतिः **उप॑ गा॒त्** उपगच्छति । तादृशो देहेन्द्रियसंघातरूप आत्मा तस्मिन् समये

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

कुत्रास्ति । प्रष्टा प्रतिवक्ता चोभावपि नास्तीत्यर्थः । न तु तद्द्वितीयमस्ति ततोऽन्य-द्विभक्तं यत् पश्येत्—इति श्रुतेः । यद्वा प्रथमं प्रथमभाविनं जगतः कारणभूतं को ददर्श कः साक्षात्करोति । जायमानमस्थन्वन्तं मनुष्यमनस्थिकः परमेश्वरः सशरीरमशरीरो यद्यस्माद्बिभर्ति । द्रष्टुरपि तत्कार्यत्वादिति भावः । शिष्टं समानम् ॥

४. अस्थन्ऽवन्तम्—इति पदपाठः ।

देहात्मपक्षनिरासोऽत्र । कः पुमान् प्रथमं कारणमात्मानं जायमानदेहं एकमिति ददर्श पश्यति मन्यते व्याघातात् । अस्थन्वन्तं सावयवम् । यत् यस्मात् । अनस्था अस्थिरहितो निरवयवो बिभर्ति धारयेत् । अन्यथानवस्था स्यात् । निरवयव आत्मा भूम्याः पार्थिवादिधातोर्देहस्य असुः क्षेप्ता प्रवर्तकः क्व स्वित् स्यादेव । अतश्च असृक् रुधिरम् । तद्वान् देहः क्व स्वित् दर्शने आत्मा स्यात् । स्विच्छब्दोऽसंभावनायाम् । नन्वमुमर्थमेतैरेव त्रिभिर्हेतुभिः सर्वे कथं न विदुः पुरुषाः । शृणु । कः पुरुषः उपगात् उपगच्छति विद्वांसं जानन्तमेतदात्मस्वरूपं प्रष्टुम् । तदुक्तं कल्पे—

कारणत्वादनन्तत्वाच्चेष्टकत्वाच्च भिद्यते ।
आत्मा नायं सुदुर्बोधः कार्यांशप्रेर्यदेहतः ॥

इति ॥

पाकः॑ पृ॒च्छामि॒ मन॒साऽवि॑जानन् दे॒वाना॑मे॒ना निहि॑ता प॒दानि॑ ।
व॒त्से ब॒ष्कयेऽधि॑ स॒प्त तन्तू॑न् वि त॑त्निरे क॒वय॒ ओत॒वा उ॑ ॥ ५ ॥

पाकः॑ पक्तव्योऽपक्वमतिरहं **मन॑सा** संस्कृतेन **अवि॑जानन्** अतिगहनं तत्त्वं विशेषेण ज्ञातुमशक्नुवन् **पृ॒च्छा॒मि॒** प्रश्नं करोमि । अज्ञाने कारणमाह—**ए॒ना** एनानि **प॒दानि॑** सन्देहास्पदानि तत्त्वानि **दे॒वानां॑ निहि॑ता** निहितानि । देवानामपि गूढानीत्यर्थः । यद्वा देवनां पदानि तत्त्वानि निधिवद्गोपयित्वा स्थापितानि । अतः पृच्छामि । तत्त्वज्ञानोपयोगायेति शेषः । तानि कानीति उच्यते—**व॒त्से** सर्वस्य निवासभूते **ब॒ष्कये॑** । बडिति सत्यनाम । तत् कषतीति बष्कय आदित्यः । यद्वा बष्कयो नामैकहायनो वत्सः । पुनरपि वत्सशब्दस्य पृथङ्निर्देशाद्बष्कयशब्देन तत्कालमात्रं लक्ष्यते । तस्मिन्नादित्ये **अधि॑** अधिकं **स॒प्त तन्तू॑न्** तायमानान् सप्त

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

सोमसंस्थान् **कवयः** मेधाविनो यजमाना **ओतवै** जगद्रूपतिर्यक्तन्तून् वेतुं **वि तत्निरे** वितन्वन्ति । यद्वा सप्त तन्तवः सप्त छन्दांसि । तानि वितन्वन्ति । किमर्थम् । ओतवै सप्त होमसंस्थारूपतिर्यक्तन्तुसन्तानाय । यज्ञनिर्माणायेत्यर्थः । यज्ञानां स्थितेः सूर्याधीनत्वादिति भावः । ईदृशं तत्त्वं पृच्छामीत्यर्थः ।

५. अवि॑ऽजानन्— निऽहि॑ता — ऊं इति॑— इति पदपाठः ।

प्रश्नप्रकारे मन्त्रः । पाकः पक्वः अबालः प्रशस्तः पृच्छामि । संकल्पविकल्पवता मनसा हेतुना अविजानन् सामान्येन जानन्नपि विशेषेण न जानन् । निर्विशेषे आत्मनि किं ज्ञातव्यम् । देवानां इति वेदानां वर्णव्यत्ययात् । एना एनानि पदानि ब्रह्मविष्णु-रुद्राणां ·प्रसिद्धानि पदानि । अस्य वामस्य पलितस्य— विश्पतिं सप्तपुत्रम् — इत्यत्रार्थतः प्रसिद्धानि । निहिता निगूढार्थानि लक्षणया प्रवृत्तानि— तत्त्वमसि— इत्यादीनि पृच्छामि इत्यन्वयः । वत्से पुत्रत्वमापन्ने । बष्कये । बष्किर्हि गत्यर्थः । सर्वे गत्यर्थाः ज्ञानार्थाः । एवं पृष्टा गुरवो यद्ब्रूयुस्तदाह— अधि अधिकान् निष्कामान् काम्यनिषिद्धेतरान् । सप्ततन्तून् सप्तधातूत्पन्नान् तन्तून् विततान् विस्तृतान् यज्ञान् वितत्निरे विशेषेण तन्वन्ति कवयो गुरवः । ओतवै अवितुं ज्ञापयितुम् । अभिमतं वस्तु तत्निरे तन्वते । छन्दसि लिटि— तनिपत्योः छन्दसि— इति उपधालोपः । अवतेः संप्रसारणम् । वेञ् तन्तुसंताने । तवै चान्तश्च युगपत्— इति आद्यन्तोदात्तौ । तुमर्थे सेसेनसे— इत्यादिना तवैप्रत्ययः । पूर्वमन्त्रे— अस्थन्वन्तं यदनस्था— इत्यत्र अनो नुट् । छन्दस्यपि दृश्यते— इत्यनङ् । अत्र पुष्कर आह—

पृच्छेत् पदानि पुत्रा भो ज्ञानाय गुरवस्तदा ।
ब्रूयुः कर्माणि निष्कामाः कुरुष्वाध्यात्मबुद्धयः ॥

इति ॥

अचि॑कित्वाञ्चि॒कि॒तुष॑श्चि॒दत्र॑ क॒वीन् पृ॑च्छामि वि॒द्मने॒ न वि॒द्वान् ।
वि यस्त॒स्तम्भ॒ षळि॒मा रजां॑स्य॒जस्य॑ रू॒पे किमपि॑ स्वि॒देक॑म् ॥ ६ ॥

अचि॑कित्वान् देवतातत्त्वमजानन्नहं **चि॒कि॒तुष॑ः चि॒त्** विशेषेण तत्त्वं जानतः **क॒वीन्** क्रान्तदर्शिनोऽधिगतपरमार्थान् **अत्र** अस्मिंस्तत्त्वविषये **पृ॒च्छामि॒** । किमर्थम् । **वि॒द्मने॑** वेदनाय परमार्थज्ञानाय । किं जानन्नेव पराभवाद्यर्थम् । नेत्याह— **वि॒द्वान् न**

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

पृच्छामि। अपित्वज्ञानादेव। **यः** परमेश्वरः **वि तस्तम्भ** स्तम्भितवान् नियमितवान्। अथ य आत्मा स सेतुर्विधृतिरेषां लोकानामसंभेदाय—इति श्रुतेः। किम्। **इमा** इमानि **षट् रजांसि** लोकान् रञ्जनात्मकान्। लोका रजांस्युच्यन्ते—इति निरुक्तम्। यद्यपि लोकाः सप्त तथापि सत्यलोकस्य कर्मिणां सर्वेषां साधारणत्वाभावात् षडित्युक्तम्। ननु षडेवोक्ताः। सप्तमः किमिति न निर्दिष्ट इति। उच्यते— **अजस्य** जननादिरहितस्य चतुर्मुखस्य ब्रह्मणो **रूपे** स्वरूपे **एकं** सत्यलोकाख्यं पुनरावृत्तिरहितं स्थानं **किं अपि स्वित्** किंस्विदेव। तन्न केनाप्यधिगन्तुं शक्यमित्यर्थः। कैश्चिदेवोपासकैरर्चिरादिमार्गेण गन्तव्यत्वादिति भावः। यद्वा षड्रजांसि विलक्षणाः षड्तवः। तान्यस्तम्भयत्। अजस्य गमनशीलस्य जन्मरहितस्य वादित्यस्य रूपे रूप्यमाणे दृश्यमाने मण्डले एकमद्वितीयं किमपि स्वित् यत्किंचिदवाङ्मनसगम्यं तत्त्वमस्ति। तत् पृच्छामि। अथ य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते—इत्यादिश्रुतिप्रतिपादितं तत्त्वमित्यर्थः। अथवा षडिमानि रजांसि त्रिविधान् भूलोकांश्च यस्तस्तम्भ। तिस्रो भूमीर्धारयन्त्रीँरुत द्यून्—इति निगमः। तस्याजस्य परब्रह्मणो रूपे नानाविकारभाजि जगति किमपि स्विदेकमेकात्मकमस्तीति प्रश्नः। अविशेषमस्ति नाममात्रमेकरूपमस्तीत्युत्तरविवक्षया प्रश्नः। अस्तीत्येवोपलब्धम्—इति श्रुतेः॥

पुनः पृच्छेत् इत्याह—अचिकित्वान् अजानन्। चिकितुषः सम्यग्जानतः। चित् सम्यक्। कवीन् ज्ञापने प्रौढान् पृच्छामि। विद्मने परोक्षज्ञानाय। न विद्वान्। शास्त्रश्रवणादिना विद्वानिव वर्तमानोऽप्यहं परमार्थतो नैव विद्वान्। योऽहं वितस्तम्भ विशेषेण तस्तम्भ स्तम्भिष्यामि इमा इमानि प्रसिद्धानि कामादीनि षट् रजांसि मलानि रजोगुणकार्याणि वा युष्मत्प्रसादात्। प्रश्नकारणमाह—अजस्य नित्यस्यात्मनोऽत्र रूपे स्वरूपे जगति किंस्विदेकमेव रूपमादरणीयमपि स्विदनेकमेव रूपमादरणीयमिति सोऽहं पृच्छामि। अत्र कल्पः—

अज्ञः पृच्छाम्यहं तज्ज्ञान् सम्यग्बुद्धानपण्डितः।
एको वानेक आत्मेति सोऽहं स्तम्भितषड्रिपुः॥

इति॥

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

इह ब्रवीतु य ईमङ्ग वेदास्य वामस्य निहितं पदं वेः ।
शीर्ष्णः क्षीरं दुह्रते गावो अस्य वव्रिं वसाना उदकं पदापुः ॥ ७ ॥

इह इदानीं **ईं** एतद्वक्ष्यमाणं तत्त्वं **अङ्ग** क्षिप्रमविचारेण **ब्रवीतु** । कः । **यः वेद** सः । कीदृशं तत् । **अस्य** पुरतो दृश्यमानस्य **वामस्य** वननीयस्य **वेः** गन्तुरादित्यस्य । **पदं** सर्वैर्गन्तव्यं स्वरूपम् । **निहितं** गूढं वर्तते । किंच **अस्य** आदित्यस्य **शीर्ष्णः** शिरोवदुन्नतस्य सर्वेषामुत्कृष्टस्य वा **गावः** केचन वर्षकालीना रश्मयः । **क्षीरं** उदकम् । **दुह्रते** क्षरन्ति । **वव्रिम्** । रूपनामैतत् । रूपं **वसाना** आच्छादयन्तोऽतिविस्तरेण तेजसा तपन्तः केचन गावो रश्मयः **उदकं** स्वसृष्टं **पदा** सृष्टेनैव मार्गेण **अपुः** पिबन्ति । भूमिं निरुदकां कुर्वन्तीत्यर्थः । तस्य स्वरूपं ब्रवीतु इत्यन्वयः ॥

६. निऽहितम्—वेरिति वेः—इति पदपाठः ।

गुरुलक्षणमत्र । इह ब्रह्मविद्यायां वक्ता य ईमिदमात्मतत्त्वम् । अङ्ग असन्दिग्धं जानाति । किं वेद । तत्राह—अस्य प्रत्यक्षादिप्रसिद्धस्य वामस्य कुब्जस्य परिछिन्नस्य जीवस्य त्वमिति पदं निहितं लक्षणया प्रवृत्तम् । तथा वेः सुपर्णस्य परमात्मनो यत् तदिति पदं लक्षणया प्रवृत्तं वेद स इह वक्तु । स एव गुरुः स्यादित्यर्थः । किंच अयमाभाणकोऽपि गुरुणा भवित्रा ज्ञेय इत्याह—शीर्ष्णः शिरसः सकाशात् क्षीरं दुह्रते गावः अस्य उक्तस्य पुरुषस्य । वव्रिम् । विव्रिमिति रूपम् । वरणीयं विचित्ररूपवत् । रूपसहितं रोचनादिरागेण रञ्जितमरञ्जितरागद्वयवियुक्तं कमनीयं माञ्जिष्ठं वस्त्रं वसानाः परिदधानाः । गावः उदकं पदा पादेन अपुः । अन्तर्भावितण्यर्थोऽयम् । सारं पाययन्ति बोधयन्ति । अयमाभाणकोऽपि भवित्रा गुरुणा ज्ञेयः । आभाणकविवृतिस्तु तस्य जीवस्य शिष्यभावं गतस्य गावो वेदाः क्षीरं सारं ब्रह्मामृतरसं शीर्ष्णः उपनिषद्भागात् ऊर्ध्वस्थानीयात् दुह्रते दुहन्ति स्पष्टं प्रतिपादयन्ति । कथंभूताः । वव्रिं सत्त्वरजस्तमोभिश्चित्रपटसदृशं त्रिगुणात्मकप्रपञ्चं ब्रह्मव्यतिरिक्तं वस्तु प्रतिपादयन्त्य इव दृश्यमानाः । परमार्थतस्तु सर्वत्र ब्रह्मपरत्वात् ब्रह्मैव प्रतिपादयन्ति वेदाः । उदकम् । कं सुखं अकं दुःखम् । तस्मादुद्गतं सुखमयं दुःखरहितं शुद्धं ब्रह्म वेदैकदेशेन उपनिषद्भागेन स्वांशेन महावाक्येन वा अपुः पाययन्ति बोधयन्ति । यद्यपि—

सर्वे वेदा यत्पदमामनन्ति ।

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

इत्यादिश्रुत्या च

वेदैश्च सर्वैरहमेव वेद्यः ।

इति भगवद्गीतया च

ब्रह्मात्मविषया वेदाः ।

इति महाभारतेन च

तनूषु ते क्रतव इन्द्र भूरयः ।

इति मन्त्रैकदेशेन च

विष्णौ वेदाः प्रतिष्ठिताः ।

इति पुराणेन च

हृदयकमलमध्ये दीपवद्वेदसारम् ।

इति स्मृत्या च सर्वोऽपि वेदो ब्रह्मपरः । किंच सगुणेशविषयाणां तत्पदार्थविवेचकत्वात् कर्मविषयाणां वेदानां त्वंपदार्थविवेचकत्वात् ब्रह्मात्मैक्यपरवेदापेक्षितपदद्वयार्थप्रतिपादकत्वेनोपनिषदैकवाक्यत्वमेव । तथापि सगुणेशविषयकर्मविषयवेदभागेषु न स्पष्टा ब्रह्मधीः उपनिषत्सु स्पष्टा भवतीत्यभिप्रायेण—उदकं पदापुः—इत्युक्तम् । न किंचिदप्यनुपन्नम् । दुह्रत इति छान्दसो लिट् । बहुलं छन्दसि—इति रुट् । उदकमित्यत्र —समासस्य—इत्यन्त उदात्तः । फिट्स्वरश्च । गणेषु चायमन्तोदात्तः पठितः । द्विखण्डताभाव उक्तोत्तरः । अर्थसन्देहाच्च न द्विखण्डता । अत्र कल्पः—

तत्त्वंपदे लक्षणया प्रवृत्ते यो वेद स स्याद्गुरुरात्मबोधे ।
आभाणकज्ञः शिरसो हि गावः पादेन दुग्धं दुदुहुः सवस्त्राः ॥

इति ॥

मा॒ता पि॒तर॑मृ॒त आ ब॑भाज धी॒त्यग्रे॒ मन॑सा सं हि ज॒ग्मे ।
सा बी॑भ॒त्सुर्गर्भ॑रसा॒ निवि॑द्धा॒ नम॑स्वन्त॒ इदु॑पवा॒कमी॑युः ॥ ८ ॥

माता सर्वस्य निर्मात्री पृथिवी **पितरं** पालकं द्युलोकं तत्स्थम् । द्युलोकस्थमादित्यमित्यर्थः । तम् । **आ बभाज** आभजते । किमर्थम् । **ऋते** यज्ञे उदके वा निमित्तभूते सति । केन द्वारेण । **धीती** धीत्या कर्मणा यागादिरूपेण । स्वकीयेनाज्यसोमादिहविषा तर्पयतीत्यर्थः । **अग्रे** ततः पूर्वं पिता च **मनसा** अभिप्रायवता

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

चेतसा **सं जग्मे हि** संश्लिष्टो वर्तते खलु । वृष्टिमकरोदित्यर्थः । अनन्तरं **सा** माता **बीभत्सुः** गर्भबन्धनेच्छावती **गर्भरसा** गर्भरसेन गर्भोत्पत्तिनिमित्तेन रसेन **निविद्धा** नितरां विद्धासीत् । यद्वा गर्भे रसे ओषध्याद्युत्पादनसमर्थमुदकं यस्याः सा तादृश्युदकेनात्यन्तं क्लिन्ना निविद्धा कृषीवलैर्हलमुखेन नितरा विदारिता भवति बीजावापार्थम् । अत्रायं समाधिः । या काचन योषिदपत्यार्थे स्वपतिं युवानं यौति । स च तस्यामनुरागयुक्तः संगतो भवति । सा चान्तर्वत्नी सती पुत्रान् जनयति—इति । तद्वदत्रापि । अनन्तरं **नमस्वन्तः इत्** भाविव्रीहिप्रियङ्ग्वाद्यन्नवन्तमेव **उपवाकं** उपेत्य वचनं परस्परम्—सम्यगभिवृद्धानि सस्यानि—इति वचनं **ईयुः** प्राप्नुवन्ति । यद्वा हविर्लक्षणान्नवन्त उपेत्य वचनं प्रैषादिरूपमीयुः । वृष्टौ सत्यां सस्यादिद्वारा यागमनुतिष्ठेयुरित्यर्थः ॥

८. गर्भेऽरसा—निऽविद्धा इति पदपाठः ।

मायासंबद्धे आक्षेपाशङ्कायां ऋचि उत्तरम् । नन्वाचार्योपदेशे किं भवति । जीवब्रह्मभेदिकाया मायाया निवृत्तिः । ननु सा माया स्पृष्ट्वा भिनत्ति अस्पृष्ट्वा वा । द्वितीये अनवस्था अतिप्रसङ्गो वा । स्पृष्ट्वा चेत् कं स्पृशति । जीवं चेत् इतरेतराश्रयः । परस्पर्शोऽसंभावितः । तं प्रति चोद्यं कार्यम् । मुखप्रतिमुखभेदके च दर्पणेऽप्येवं वाच्यम् । अत्राप्यस्पर्शे अतिप्रसङ्गः । प्रतिबिम्बस्पर्शे अन्योन्याश्रयः । असंभवो बिम्बस्पर्शे । अत्रोत्तरमिदम्—सन्निधिसत्तालक्षणेन संबन्धेन मुखं स्पृष्ट्वा प्रतिबिम्बाद्भिनत्ति दर्पणः तर्हि प्रकृतेऽप्येवं इत्यत्रोच्यते—माता सृष्टेर्जननी माया । पितरमृते ईशं विना संस्पृशत्यपि आ बभाज ईषद्भजति । सन्निधिसत्तालक्षणमिथ्यासंबन्धमनुभवन्त्यपि धीती । धेट् पाने । क्तः । अल्पापेक्षित्वधर्मेण छान्दसत्वादसमासेऽपि—क्तादल्पाख्यायाम्—इति ङीष् । अग्रे आदौ मनसा कार्येण संजगमे संगता बभूव हि । ततः सा च माया बीभत्सुः प्रपञ्चजननद्वारा बन्धनहेतुः । जुगुप्सितसंसारहेतुरित्येके । अभयस्यात्मनो भयजननीत्यन्ये । गर्भरसा । रसः परमात्मा । रसो वै सः । रसं ह्येवायं लब्ध्वानन्दी भवति—इति श्रुतेः । गर्भो गर्भीकृतः प्रच्छादितो रसो यया सा गर्भरसा । नियतं विद्धं ताडनं तत्त्वज्ञानकृतं यस्याः सा निविद्धा । तत्त्वज्ञाननाश्येत्यर्थः । अनया च नमस्वन्तो नमनवन्तः संकोचवन्तः परिच्छिन्नमात्मानं मन्यमाना जीवा अज्ञानप्रवृत्ता एवोपवाकमप्रधानवाक्यं महावाक्यादितरत् कर्मविबोधकं वाक्यमीयुः

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

प्राप्नुवन्ति । तत्राधिकृतास्ते भवन्तीत्यर्थः । संजग्मे । लिटि—समो गम्यृच्छिभ्याम्—इत्यात्मनेपदम् । गमहन—इत्युपधालोपः । हिच—इति निघाताभावः । कल्पस्तु—

यद्दर्पणो बिम्बविभेदकः स्यात् स्पृष्टोज्झितोऽप्येवमियं हि माया ।
जीवेशभेदं विदधात्यमुष्यां लग्नाः क्रियाः का उ गिरः प्रपन्नाः ॥

इति ॥

युक्ता मातासीद्धुरि दक्षिणाया अतिष्ठद्गर्भो वृजनीष्वन्तः ।
अमीमेद्वत्सो अनु गामपश्यद्विश्वरूप्यं त्रिषु योजनेषु ॥ ९ ॥

माता । निर्मीयतेऽस्मिन् भूतानीति माता द्यौः । **दक्षिणायाः** अभिमतपूरणसमर्थायाः पृथिव्या **धुरि** निर्वहणे **युक्ता आसीत्** । वर्षणाय समर्थाभूदित्यर्थः । कथमिति तदुच्यते । **गर्भः** गर्भस्थानीय उदकसंघो **वृजनीषु** उदकवत्सु मेघपङ्क्तिषु **अन्तः** मध्ये **अतिष्ठत्** तिष्ठति । अनन्तरं **वत्सः** पुत्रस्थानीय उदकसंघः **त्रिषु योजनेषु** मेघरश्मिवायुषु संयुक्तेषु सत्सु **अमीमेत्** वर्षणसमये शब्दयति । अनन्तरं **विश्वरूप्यं** विश्वरूपवर्ती **गां अनु अपश्यत्** अनुक्रमेण पश्यति । वर्षतीत्यर्थः । यद्वा त्रिषु योजनेषु सत्सु वत्सो मेघो वर्षणाय गां भूमिं प्रत्यमीमेत् । अनन्तरं सर्वो जनोऽनुक्रमेण विश्वरूप्यं सस्यादिभिर्नानारूपवर्ती भूमिमपश्यत् पश्यति ॥

९. अन्तरिति—विश्वऽरूप्यम्—इति पदपाठः ।

माया निवर्तते । केन । विद्यया । सा प्रमा न वा । न चेद्व्यर्था प्रमा । सत्या चेत् द्वैतम् । असती वृथा । एवं मुनिप्रश्ने सूतस्योत्तरम्—

मायानिवर्तनी विद्या साप्यसत्या प्रमा न सा ।
न द्वैतं न च सा व्यर्था भौमाद्भौमहतिर्यथा ॥

इदमत्रोच्यते—युक्ता योगनिरूपिणी चेन्माता जगज्जननी मायापि दक्षिणायाः प्रौढायाः संविद्रूपाया मुक्तेर्बलवत्या वा उत्साहवत्या वा । धुरि धूःस्थानीयान्तःकरणशोधके सत्त्वे आसीत् भवति तिष्ठति । सत्त्वगुणस्था माया विद्यामुक्तिहेतुः । विद्योत्पत्तौ किं भवति । तत्राह—अतिष्ठत् गतिनिवृत्तो भवति गर्भः । कुतः अन्तर्वृजनीषु बलवतीषु तिसृष्ववस्थास्वन्तः आन्तरः जागरस्थविश्वादान्तरः । स्वप्नस्थतैजसः तस्मादान्तरः । सुषुप्तौ प्राज्ञः

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

ततोऽप्यान्तरः तुरीयः । नास्मादन्य आन्तरोऽस्तीति अन्तर्गर्भशब्दाभ्यामुक्तं सर्वान्तरः। आन्तरेभ्यो विश्वतैजसप्राज्ञेभ्य आन्तरस्तुरीयोऽतिष्ठत् गतिनिवृत्तो भवति । प्रथमार्धे चोक्तार्थहेतुमाह—अनु अमीमेत् । मी गतौ । अडागमः छान्दसः । अनुगच्छेत् अनुसरेत् अभ्यसेत् वत्सः पुत्रभावमापन्नः शिष्यः । गां महावाक्यरूपिणीं वाचम् । अनन्तरं च अपश्यद्विश्वरूप्यं सगुणं ब्रह्म परमेश्वरम् । त्रिषु योजनेषु योगेषु श्रवणमनन-निदिध्यासनात्मकेषु सत्सु स पश्यतीति सूचितम् । युक्ता माता इति संबन्धः । विश्वं रूपमस्येति विश्वरूप्यं सगुणं ब्रह्म । तदस्मिन्नस्तीति—छन्दसीवनिपौ—इति मत्वर्थे ईप्रत्ययः । वा छन्दसि—इति पूर्वसवर्णाभावे—उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य —इति स्वरितः । प्रशस्तो विश्वरूपः । तद्वन्तं वा । विश्वानि तानि रूपाणि । तद्वन्तं वा । कल्पस्तु—

वाचं समभ्यस्यति चोत्तरेभ्यः पश्येत्त्रियोगी हृदि चेत् समृद्धः ।
सा दृष्टमायापि हि मुक्तिहेतुर्मुक्तावतिष्ठत् स तुरीय आत्मा ।

ति॒स्रो मा॒तॄस्त्रीन् पि॒तॄन् बिभ्र॒देक॑ ऊ॒र्ध्वस्त॑स्थौ॒ नेम॑व ग्लापयन्ति ।
म॒न्त्रय॑न्ते दि॒वो अ॒मुष्य॑ पृ॒ष्ठे वि॑श्व॒विदं॒ वाच॒मवि॑श्वमिन्वाम् ॥ १० ॥

एकः प्रधानभूतोऽसहायो वा पुत्रस्थानीय आदित्यः संवत्सराख्यः कालो वा **तिस्रः मातॄः** सस्यवृष्ट्याद्युत्पादयित्रीः । क्षित्यादिलोकत्रयमित्यर्थः । तथा **त्रीन् पितॄन्** जगतां पालयितॄन् लोकत्रयाभिमानिनोऽग्निवायुसूर्याख्यान् **बिभ्रत्** सन् **ऊर्ध्वः तस्थौ** उन्नतोऽत्यन्तदीर्घस्तिष्ठति भूतभविष्यदात्मना । सूर्यपक्षे सर्वेभ्य उन्नतः । **ईं** एनं **न अव ग्लपयन्ति** ग्लानिं नैव कुर्वन्ति । न हि काल आदित्यो वान्येन पराभूयते । **दिवः पृष्ठे** द्युलोकस्योपर्यन्तरिक्षे **मन्त्रयन्ते** गुप्तं परस्परं भाषन्ते देवाः । किम् । **विश्वविदं** विश्ववेदनसमर्थां विश्वैर्वेदनीयां वा **अविश्वमिन्वां** असर्वव्यापिनीं **वाचं** गर्जितलक्षणाम् । **अमुष्य** आदित्यस्य संबन्धिनीं मन्त्रयन्ते इत्यर्थः ।

१०. वि॒श्व॒ऽवि॒द॑म्—अवि॑श्वऽमिन्वाम्—इति पदपाठः ।

अत्र तुर्यः प्रपञ्च्यते । तिस्रो मातॄः लक्ष्मीगौरीसरस्वतीः । मुख्यत्वेन पितॄन् विष्णुहरब्रह्मणः पुत्रत्वेन बिभ्रत् धारयन् नियमयन् । एकः परमात्मैव ऊर्ध्वः अवस्था

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

त्रयात् परतः स्थितः तुरीयः तिष्ठति । मुक्तौ ईं एनं तुरीयं मुक्तमवकृष्य न ग्लपयन्ति अज्ञानेन न पीडयन्ति । तिस्रो मातरः त्रयश्च पितरः तुरीयमेकं उपदिशन्तीत्याह— मन्त्रयन्ते गुप्तं भाषन्ते एकान्ते उपदिशन्ति । दिवः दीप्यमानस्य अमुष्य परमात्मनः पृष्ठे उपरिभागे तुरीये स्थितं विश्वं जाग्रतं पुरुषं वेत्ति इति । अविश्वमिन्वाम् । विश्वमिन् विश्वस्नेहः । तद्रहितां महावाक्यरूपिणीं वाचम् । ञिमिदा स्नेहने । व्यत्ययेन मिच्छब्दस्य मिन्वा । ताम् । अपरे तु—इन्वतिर्व्याप्तिकर्मा । यद्वा—ई प्रीणने—इवि सेचने । छान्दसो नुम् । पदकारास्तु परभक्तं नुममाहुः । मिन्वञ्छब्दः प्रधानवाची इत्यन्ये । अर्थतस्तोक एव तिष्ठति । तात्पर्यतो विश्वमेति अपनयति इति । ताम् । तुरीये संसारकल्पनाकल्पनाभ्यां तुरीयतुरीयातीतयोः योगिवेदान्तिविप्रतिपत्तिः इति संज्ञाभेदमात्रे विवादः । तदुक्तं केशवाचार्यैः—

आब्रह्म कल्पितं यत्स्यादवस्थात्रय एव तु ।
तुर्यमेव ततो ब्रह्म तुर्यातीतं तु निष्फलम् ॥
अवस्थात्रयतो बाह्यं यत्किंचित् कल्प्यते यदि ।
तुर्यातीतं परं ब्रह्म तुरीयं सगुणं भवेत् ॥
शङ्करार्योऽपि यत् प्राह शास्त्रे तुर्यं तथागमे ।
तुर्यातीतं ततो ज्ञानं संज्ञामात्रविवादनम् ॥
ज्ञेयापेक्षं न तुर्यं स्याज्ज्ञानापेक्षं तदिष्यते ।
वृत्तिज्ञानं तुरीये यत् तन्निवर्तत एव हि ॥

इति । कल्पस्तु—

मोमागिरो विष्णुसदाशिवाजान् बिभ्रद्य एकः स तुरीय एव ।
उद्दिश्य वाचं प्रवदन्ति मुक्त्यै विश्वोज्झिनीं विश्वविबोधिनीं च ॥

इति ॥

द्वादशारं नहि तज्जराय वर्वर्ति चक्रं परि द्यामृतस्य ।
आ पुत्रा अग्ने मिथुनासो अत्र सप्त शतानि विंशतिश्च तस्थुः ॥ ११ ॥

ऋतस्य उदकस्य सत्यात्मकस्य आदित्यस्य **चक्रं** पुनः पुनः क्रमणशीलं मण्डलाख्यं रथचक्रं वा **वर्वर्ति** पुनः पुनर्वर्तते संचरति । कुत्र । **द्यां परि** द्युलोकस्यान्तरिक्षस्य परितः । कीदृशं तत् । **द्वादशारं** द्वादशसंख्याकमेषादिराश्यात्मकैर्मा-

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

सात्मकैर्वा अरैः रथाङ्गावयवैर्युक्तम् । किंच तत् चक्रं नहि जराय नैव खलु जरायै भवति । हे अग्ने सर्वदा गमनयुक्त आदित्य । यद्वा अग्नेरेव स्थानत्रये तत्तदात्मना वर्तमानत्वात् असावप्यग्निरित्युच्यते । अत्र अस्मिंस्त्वदीये चक्रे मिथुनासः स्त्रीपुंसरूपेण परस्परं मिथुनभूताः सप्त शतानि विंशतिः च विंशत्युत्तरसप्तशत-संख्याकाः पुत्राः पुत्रवदुत्पद्यमानाः प्राणिनां दुःखात् त्रातारो वा अहोरात्ररूपाः तस्थुः तिष्ठन्ति । निष्पद्यन्ते । षष्ट्यधिकशतत्रयसंख्याकान्यहानि तावत्य एव रात्रय इत्येवं तद्विभागः । सप्त च वै शतानि विंशतिश्च संवत्सरस्याहोरात्राः । स एषोऽहः संमानः—इत्यारण्यकम् ॥

११. द्वादशऽअरम्—इति पदपाठः ।

माता पितरम्—इत्यत्र मन्त्ररूपं सूचितम् । त्रिनाभि चक्रम्—इत्यत्रोक्तं त्रिषु कालेषु मध्यमकालमाह—द्वादशारं द्वादश मासा अरा यस्य तत् शास्त्रान्तरप्रसिद्धम् । जराय जरणाय योग्यं रक्षितुमशक्यं नहि । वर्वर्ति पुनः पुनर्वर्तते । चक्रं कालचक्रम् । ऋतस्य सत्यस्य परमात्मनः संबन्धिनीं द्यां द्योतमानां ब्रह्मविद्यां परि ऋते विना वर्जयित्वा वर्तते । ब्रह्मविद्याया अभाव एव कालचक्रप्रभाव इत्यर्थः । आ समन्तात् पुत्रा अवयवा अंशा भो अग्ने अग्रणीः मिथुनासः अन्योन्यसंघट्टितरूपा मिथुनीभूता इवात्र कालचक्रे रात्रिदिवसरूपाः सप्तशतानि विंशतिश्च आतस्थुः आतिष्ठन्ति । कल्पस्तु—

स द्वादशात्मा न हि जीव एव हित्वात्मविद्यां भ्रमतीह कालः ।
यो मध्यमोंऽशस्तु शतानि सप्त सविंशकानीह दिवा निशा च ॥

इति ॥

पञ्चपादं पितरं द्वादशाकृतिं दिव आहुः परे अर्धे पुरीषिणम् ।
अथेमे अन्य उपरे विचक्षणं सप्तचक्रे षळर आहुरर्पितम् ॥ १२ ॥

पञ्चपादं पञ्चसंख्याकर्त्वात्मकपादोपेतम् । एतद्धेमन्तशिशिरयोरेकत्वाभि-प्रायम् । **पितरं** सर्वस्य प्रीणयितारम् । **द्वादशाकृतिं** द्वादश मासा एवाकृतयो यस्य तादृशम् । **पुरीषिणं** वृष्ट्युदकेन तद्वन्तं प्रीणयितारं वा । पुरीषमित्युदकनाम । उदकलक्षणं संवत्सरचक्रं **दिवः** द्युलोकस्य **परे अर्धे** । तात्स्थ्यात्ताच्छब्द्यम् । परस्मिन्नर्धेऽन्तरिक्षलक्षणेऽवस्थित आदित्य इत्यर्थः । तस्मिन् **अर्पितं आहुः** ।

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

एतदुत्तरत्र स्थितमत्राप्यनुषज्यते। यद्यत्रार्पितं तत्तदधीनम्। अतः संवत्सरं सूर्यायत्तमाहुरित्यर्थः। **अथ इमे** अपि **अन्ये** केचन वेदवादिन एवमाहुः। किमिति। **उपरे**। उपरमन्तेऽस्मिन्नुपरताः प्राणिनोऽत्रेति वा उपरः संवत्सरः। तस्मिन्। कीदृशे। **सप्तचक्रे**। सप्तादित्यरश्मयः। तद्द्वारेण चक्रस्थानीया यस्य स तथोक्तः। यद्वा अयनर्तुमासपक्षाहोरात्रिमुहूर्तानि सप्त। सप्त चक्राणि पुनः पुनः क्रममाणानि यस्य तादृशे। **षळरे** षडृतव एव अरा नाभौ प्रत्यृताः संबद्धा यस्य तथोक्तलक्षणे संवत्सरे रथे **विचक्षणं** विविधदर्शनकरमादित्यं अर्पितं आहुः। एतदुक्तं भवति। अमुमादित्यं दक्षिणोत्तररूपभिन्नगतेः तीव्रमन्दादिभावस्य च कालाधीनत्वात् तदधीनमाहुः। अन्ये तु संवत्सराद्यात्मकस्य कालस्य सूर्यगमनागमनसाध्यत्वात् तदायत्तत्वमाहुरिति॥

१२. द्वादशऽआकृतिम्—विऽचक्षणम्—सप्तऽचक्रे—षट्ऽअरे—इति पदपाठः।

अनेन प्रथमः काल उच्यते। तस्य कालस्य मूलप्रकृतिरेव देहः। तस्याः पञ्चावयवाः।

> तमोमोहो महामोहस्तामिस्रो ह्यन्धसंज्ञितः।
> अविद्या पञ्चपर्वैषा प्रादुरासीन्महात्मनः॥

एते भेदा अन्यैः क्लेशा इत्युक्ताः। अविद्यास्मितारागद्वेषाभिनिवेशाः पञ्च क्लेशाः—इति। वेदान्तवादिन आहुः।

> प्रतीतिमाया मूलाख्या तूलाख्या चेति सा द्विधा।
> विक्षेपावृतिभेदेन तूलाख्या च पुनर्द्विधा॥
> ईशे त्वावरणं नास्तीत्येवमीशे द्विधैव सा।
> त्रिधा जीवे द्विधा देवे एवं पञ्चविधैव सा॥

इति उपनिषद्वचनात्। पञ्च पादा अंशा यस्य तं पञ्चपादम्। जगतां पितरं द्वादशाकृतिं द्वादशाकारम्। सृष्टिस्थितिसंयमार्थानि चत्वारि रूपाणि सन्त्यस्य। विष्णुपुराणाद्युक्तानि प्रकृतिविधात्रादीनि ब्रह्मप्राणिकर्तृकानि दिवः तत्त्वज्ञा आहुः। परे अर्धे कतिपये इतरे तत्त्वविदस्तु पुरीषिणमुदकवन्तं अब्धिशायिनं नारायणं पञ्चपादादिगुणमाहुः। दिव आहुः परे अर्धे पुरीषिणम्—इत्यस्य अन्यमर्थं वदन्ति केचित्। पुरीषशब्देन अविद्या अवान्तरांशितया जीवाख्या उच्यते। तद्वन्तं सूत्रात्मकं नारायणं दिवः स्वर्गलोकस्य परे

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

उत्कृष्टे अर्धे भागे वैकुण्ठाख्ये लोके। अथानन्तरं इमे प्रसिद्धा अन्ये एके आचार्याः। उपरे। अद्रिः—इत्यादिषु निघण्ट्वादौ त्रिंशन्मेघनामसु मध्ये एकोनविंशति नामानि पर्वतस्याप्यभिहितानि भवन्ति—इति संप्रदायज्ञा आहुः। उपरे कैलासादिके सन्तम्। विचक्षणं विश्वरूपाक्षं रुद्रं तमाहुः। तथा सप्तचक्रे सप्तदेशे महदादिसप्तपरिधौ। षडरे षड्ऋतुपरिधौ वर्तमानेन मध्यमेन चराचरादौ ब्रह्माण्डे अर्पितमधिकृतं ब्रह्माणं तमाहुः।

शुद्धप्रधानयोर्मध्ये कालो मायांशभाजकः।
शक्तिप्रसारणाकृष्टेर्हेतुर्वाक्याग्निमोचकः॥
ब्रह्मविष्णुमहेशादिकारणं तत् प्रचक्षते।
तं विष्णुमेके शंसन्ति रुद्रमेके विधिं परे॥

इति योगयाज्ञवल्क्यश्लोकद्वयम्। कल्पस्तु—

मायाशरीरी प्रथमस्तु कालः पञ्चांशको द्वादशरूपभिन्नः।
तं सर्वयोनिं प्रवदन्ति विष्णुं रुद्रं परेऽमुं चतुरास्यमन्ये॥

इति॥

पञ्चा॑रे च॒क्रे प॑रि॒वर्त॑माने॒ तस्मि॒न्ना त॑स्थु॒र्भुव॑नानि॒ विश्वा॑।
तस्य॒ नाक्ष॑स्तप्यते॒ भूरि॑भारः स॒नादे॒व न शीर्य॑ते॒ सना॑भिः॥ १३॥

पञ्चारे पञ्चर्तुरूपैररैर्युक्ते **चक्रे** संवत्सरात्मके **परिवर्तमाने** संवत्सरपरिवत्सरादिरूपेण पुनः पुनरावर्तमाने सति **तस्मिन्** कालचक्रे **विश्वा भुवनानि** सर्वाणि भूतजातानि **आ तस्थुः** आतिष्ठन्ति। वर्तन्ते इत्यर्थः। किं च **तस्य** चक्रस्य मध्ये वर्तमानः **अक्षः भूरिभारः** सकलभुवनवहनेन प्रभूतभारोऽपि **न तप्यते** न पीड्यते। किंच **सनात् एव** सनातन एव **सनाभिः** समाननाभिकः सर्वदैकरूपनाभिरसौ **न शीर्यते** न भिद्यते। यथा लौकिकरथाक्षो भारेण भग्नो भवति अक्षघातेन च नाभिर्विवृता भवति तद्वदत्रापि नास्तीत्यर्थः॥

१३. पञ्चऽअरे—परि॒ऽवर्तमाने—भूरि॑ऽभारः—सऽनाभिः—इति पदपाठः।

एवंविधकालाख्ये अधीशानं लिङ्गदेहमाश्रितः सर्वसंसारः इत्युच्यते। पञ्चारे।

द्विधा खानि च तन्मात्रा प्राणा अवयवक्रियाः।
पञ्चारमेवं लिङ्गं स्याच्चक्रं तत्कर्तृचारि च॥

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

इति वृद्धशौनकः । कर्मेन्द्रियाणि ज्ञानेन्द्रियाणि तन्मात्राश्च प्राणाश्चान्तःकरणानि चेति राशयः । एवं पञ्चावयवा अस्य । तत्करोतीति चक्रम् । कृञः केचित् । लिङ्गशरीरमेकमेव कर्तृ । न त्वात्मा । अविवेकादात्मनि कर्तृत्वं प्रतीतम् । यद्वा चरतीति चक्रम् । रूपसिद्धिरुन्नेया । लिङ्गधारकमेव लोकान्तरसंचारित्वमात्मन इत्युक्तं भवति । उक्तं च—

देशे कर्तरि चक्रं स्यादायुधे चक्रसंज्ञके ।
तर्पके च प्रतीवाते कालभ्रामकपक्षिषु ॥

इति । तस्मिन् पञ्चारे चक्रे परिवर्तमाने लोकान्तरं वाञ्छति सति तस्मिन् परोक्षे आतस्थुः आधारीकृत्य तिष्ठन्ति । विश्वा सर्वाणि भुवनानि स्थूलशरीराणि तस्य च भावविकारा इति । तस्य चक्राख्यस्य लिङ्गस्य अक्षः भ्रामक आधारः प्रथमः कालः । शुद्ध आत्मा प्रधानं च इत्येके । न तप्यते न भ्राम्यति न कदाचिदपि नश्यति । तदुक्तं योगग्रन्थे—

शुद्धः कालः प्रधानं च त्रीणि नित्यानि जङ्गमम् ।
स्थावरं च न नित्ये स्तः प्रपञ्चो भेदपञ्चकः ॥

इति । ततः भूरिभारो भूरीणां भर्ता । आधारनाशे सर्वशून्यता स्यादित्यर्थः । किंच सनात् सर्वदैव सनाभिः चक्रस्य लिङ्गस्य नाभावेव वर्तमानोऽपि जीवात्मा न शीर्यते न नश्यति । परमार्थतो न देहत्रयधर्मेण युज्यते । जीवात्मनाशे कृतनाशाकृतनाशाभ्यागमप्रसङ्गः । कल्पस्तु—

पञ्चारके कर्तरि लिङ्गदेहे देहः स्थवीयान् भ्रमति स्वधमः ।
कालो न नश्येदिह सर्वधारी जीवोऽपि नो नश्यति देहधर्मैः ॥

इति । प्रशंसायां कः ।

प्राणस्तन्मात्रकाः खानि द्विविधानि मनोगणः
एवं पञ्चारकं कर्तृ लिङ्गं तच्चारि तत् स्मृतम् ॥

इति । तद्धर्मान् जीव आत्मन्यध्यस्यति स्थूलदेहादिधर्मांश्च इति वृथासंसारी ॥

सनेमि चक्रमजरं वि वावृत उत्तानायां दश युक्ता वहन्ति ।
सूर्यस्य चक्षू रजसैत्यावृतं तस्मिन्नार्पिता भुवनानि विश्वा ॥ १४ ॥

सनेमि समाननेमि एकप्रकारबहिर्वलयमक्षीणनेमि **चक्रं** संवत्सराख्यं **अजरं** सदातनमपि जरारहितं **वि वावृते** पुनः पुनर्विशेषेण वर्तते । **उत्तानायां**

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

ऊर्ध्वतनायां ईषायां उपरिविस्तृतभूम्यां वा **दश** इन्द्रादयः पञ्च लोकपाला निषादपञ्चमाश्चत्वारो ब्राह्मणादयो वर्णा मिलित्वा दशसंख्याका **युक्ताः** स्वस्वव्यापारयुक्ता **वहन्ति** निर्वहन्ति। कृत्स्नं जगन्निर्वहन्ति इत्यर्थः। तन्निर्वाहार्थत्वात् कालस्य। किंच **सूर्यस्य** आदित्यस्य **चक्षुः** ख्यानस्वभावं सर्वस्य चक्षुःस्थानीयं वा मण्डलम्। चक्षुः ख्यातेर्वा चष्टेर्वा—इति निरुक्तम्। **रजसा** वृष्ट्युदकेन **आवृतं** व्याप्तं **एति** गच्छति। उदकं रज उच्यते—इति यास्कः। **तस्मिन्** तादृशे मण्डले **विश्वा भुवनानि** सर्वाणि भूतजातानि **आर्पिता** आर्पितानि। तदधीनत्वात्तेषाम्॥

१४. सऽनैमि—आऽवृतम्—इति पदपाठः।

अनेनान्यदपि जगच्चक्रमस्तीति प्रासङ्गिकं वदन् वेदः सर्वमुक्तिपक्षं निराचष्टे। चक्रं जगच्चक्रम्। भ्रमतीति वा चरतीति वा चक्रम्— इति शाकपूणिः। पुनः पुनरुत्पत्त्यादिधर्मैर्युज्यमानमित्यर्थः। कथंभूतं जगच्चक्रम्। सनेमि। नेमिशब्दोऽर्धवाची। इह जगति प्रकृतिः पुरुषश्चार्धे विद्येते। तदंशत्वेन जडाजडप्रपञ्चौ नेमिनौ। ताभ्यां सहितं कृत्स्नं जगत् सनेमि। नेमिभिर्नेतृभिः परिच्छिन्नैः संकुचद्भिर्जीवैः सह वर्तमानं जगदित्यर्थः। अन्ये त्वाहुः—रथनेमिरिव जडप्रपञ्चस्योपरि स्थितश्चेतनप्रपञ्चो नेमिः। तेन युक्तं जगच्चक्रम्। अजरं अनश्वरम्। आत्मज्ञानासद्भावे इति शेषः। अनेन जगच्चक्रस्य प्रवाहनित्यतोक्ता। विवावृते विवर्तते। विवर्तोऽयं प्रपञ्चो न परिणाम इत्यर्थः। विवर्तनिवृत्तिहेतुं कथयति। उत्तानायां ऊर्ध्वब्रह्मविद्यायाम्। उत् ऊर्ध्वं आत्मानं तनोति इति उत्ताना ब्रह्मविद्या। निमित्तसप्तम्येषा। अविद्यानिवर्तकब्रह्मविद्योत्पत्त्यर्थं इत्यर्थः। आत्मानुसंधानसिद्ध्यर्थं दशसंख्याका युक्ता योगा वहन्ति निर्वहन्ति अनुवर्तन्ते। निर्वहणीयानुवर्तनीया इत्यर्थः।

> श्रवणं मननं सिद्धिर्यमो नियम आसनम्।
> प्राणायामः प्रतिक्षेपो धारणं च समाधयः।
> दश योगा इमे ब्रह्मविद्याया हेतवः स्मृताः॥

इति।

> भक्तिरेकैव शक्तेति परे प्राहुर्मनीषिणः।

इति पञ्चरात्रे। तदा च सूर्यस्य परमात्मनश्चक्षुः ज्ञापकं ज्ञानं एति आगच्छति। तत्पूर्वं संशयविपर्ययासंभावनामलेन आवृतमाच्छादितं अनुद्भूतमासीत्। तस्मिंश्चक्षुषि ज्ञापके ज्ञानेऽर्पिता अर्पितानि विलीनानि भवन्ति भुवनानि जगन्ति विश्वा सर्वाणि। कल्पस्तु—

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

नित्यः प्रवाहेण जगद्विवर्तस्तं धीर्निहन्याद्दृशयोगजन्या ।
स्वीया मतिः स्याज्जरसावृता या प्रागत्र सर्वं भ्रमतामुपैति ॥

इति ॥

साकंजानां सप्तथमाहुरेकजं षळिद्यमा ऋषयो देवजा इति ।
तेषामिष्टानि विहितानि धामशः स्थात्रे रेजन्ते विकृतानि रूपशः ॥१५॥

साकंजानां एकस्मादादित्यात् महोत्पन्नानां सप्तानामृतूनां मध्ये **सप्तथं** सप्तममृतुम् । थट् च छन्दसि—इति थट् । **एकजं** एकेनोत्पन्नं **आहुः** कालतत्त्वविदः । चैत्रादीनां द्वादशानां मासानां द्वयमेलनेन वसन्ताद्याः षडृतवो भवन्ति । अधिकमासेनैक उत्पद्यते सप्तमर्तुः । न च तादृशो मास एव नास्तीति मन्तव्यम् । अस्ति त्रयोदशो मास इत्याहुः—इति श्रुतेः । तदेवोच्यते—**षट् इत् यमाः** । इच्छब्द एवकारार्थः । षडेव ऋतवो मासद्वयरूपाः । **ऋषयः** गन्तारः । ते च **देवजाः** देवादादित्याज्जाताः **इति** इत्येवं आहुः । सप्तमाधारस्य त्रयोदशस्य मासस्य देवाभावः ।

निःसूर्योऽप्यधिको मासो मण्डलं तपते रवेः ।

इत्यादिस्मृतेः । तस्मात् षडेव देवजाः अदेवज एकः । **तेषां** ऋतूनां स्वरूपाणि **इष्टानि** सर्वलोकाभिमतानि **धामशः** तत्तत्स्थाने **विहितानि** पृथक् पृथक् स्थापितानि । **रूपशः** रूपभेदेन **विकृतानि** विविधाकृतियुक्तानि । स च रूपभेदस्तैत्तिरीयैराम्नातः—स रसमह वसन्ताय प्रायच्छद्यवं ग्रीष्माय—इत्यादि । **स्थात्रे** अधिष्ठात्रे तदर्थाय **रेजन्ते** चलन्ति । जगद्व्यवहाराय पुनः पुनरावर्तन्ते इत्यर्थः ॥

१५. साकंऽजानाम्—एकऽजम्—देवऽजाः-विऽहिता—निधामऽशः—
विऽकृतानि—रूपऽशः—इति पदपाठः ।

पञ्चारे—इत्यत्र लिङ्गं वक्तुं प्रसक्तम् । सनेमि—इत्यत्रानुप्रसक्तं स्थूलशरीरं विविच्योच्यते इति लिङ्गमाहुः साकंजानाम्—इति । साकं देहेन्द्रियादिभिः सार्धं जायमानं इव अनं ब्रह्म यस्मिन् तम् । नेदं षष्ठीबहुवचनान्तं पदम् । बहुव्रीहौ स्वरानुपपत्तिरिति चेत्—परादिश्छन्दसि बहुलम्—इति सूत्रे स्वरस्य व्यत्ययं सर्वत्र छन्दसि

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

स्मरन्ति। तत्पक्षे अर्थो दुर्योज्यः। सप्तथम्। पथ गतौ। पलोपश्छान्दसः। सप्तापि लोकान् पथति गच्छतीति सप्तथम्। केचिदत्र सप्तशब्दात् पूरणार्थे थट् च छन्दसि—इत्याहुः। तत्र स्वरार्थौ अनुपपन्नौ स्याताम्। एकजं कारणशरीरात् परं लिङ्गं तु तेनैव जायते इत्येकजम्। द्वाभ्यां जायते इति द्विजं स्थूलशरीरम्। अथ लिङ्गदेहावयवानाह। षट् इत् षडेव। यमा ज्ञानकर्मेन्द्रियरूपेण युगलरूपाः शब्दाद्या इन्द्रियार्थाश्च। तथाहि। आकाशजं श्रोत्रं वाक् च। वायुजं त्वक्पाणी। तेजोजं चक्षुः पादम्। अब्जं रसनोपस्थम्। भूजं घ्राणपायू। उभयेन्द्रियात्मकमनेकभूतजं मनः। एवमेकादशेन्द्रियाणि भवन्त्युक्तानि। ऋषयः प्राणाः। प्राणा वाव ऋषयः—इति श्रुतेः।

अहं महान् प्रधानं च देवत्रयमुदाहृतम्।
जा इत्यपत्यनामोक्तिस्तन्मात्राः पञ्च देवजाः॥

इति प्रशंसायामुक्तम्। तेषां यमादीनां लिङ्गावयवानाम्। इष्टानि। इषु गतौ। इषु इच्छायाम्। इष आभीक्ष्ण्ये—इत्यस्मादधिकरणे निष्ठा। अधिकरणवाचिनश्च—इति षष्ठी। एषणस्थानानि विषयरूपाणि गन्धादीनि विहितानि विधिप्रतिपादितानि चेत्। धामशः धामनि धामनि स्वर्गादिके स्थाने स्थाने वैदिके ज्ञाने ज्ञाने वा रेजन्ते उपयुज्यन्ते। स्थात्रे स्थायिने। स्थिरं स्थातारमात्मानं मोचयितुम्। क्रियार्थोपपदस्य च कर्मणि स्थानिनः—इति चतुर्थी। तानि चेद्विकृतानि काम्यानि वा निषिद्धानि वा। रूपशः रूपं रूपम्। अनेकदेहग्रहणमित्यर्थः। रेजन्ते उपयुज्यन्ते स्थातारमात्मानं बद्धुम्। कल्पस्तु—

यत् पञ्चविंशात्मकमस्ति लिङ्गं सार्धं जनं सप्तथमेकजं च।
यो द्वादशस्तद्विषयाश्रितश्चेत् तुर्यं पदं नो यदि तद्विरुद्धम्॥

इति॥

स्त्रियः॑ स॒तीस्ताँ उ॑ मे पुं॒स आ॑हुः॒ पश्य॑दक्ष॒ण्वान्न वि चे॑तद॒न्धः।
क॒विर्यः पु॒त्रः स ई॒मा चि॑केत॒ यस्ता वि॑जा॒नात् स पि॒तुष्पि॒तास॑त्॥१६॥

मे॒ मदीया दीधितयः **स्त्रियः॑** संस्त्यानवत्यो योषितः। **स॒तीः** सत्यः। योषिद्वदुदकरूपगर्भधारणात् स्त्रीत्वम्। एषां रश्मीनां आविष्टलिङ्गत्वात् स्त्रीलिङ्गता। **तान् उ॒** तान् रश्मीनेव **पुं॒सः आ॒हु॒ः**। प्रभूतवृष्ट्युदकसेक्तॄन् पुरुषानाहुः। प्रीतिनिर्देशापेक्षया पुँल्लिङ्गता। अमुमर्थमत्यन्तनिगूढं **अ॒क्ष॒ण्वान्** ज्ञानदृष्ट्युपेतः

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

कश्चिन्महान् **पश्यत्** जानाति। **अन्धः** अतथाभूतः स्थूलदृष्टिः **न वि चेतत् न** विचेतयति न जानाति। किंच **यः कविः** क्रान्तदर्शी **पुत्रः** स्त्रीपुरुषरूपाणां रश्मीनां पुत्रस्थानीयः पुरु जगतां त्राता वृष्ट्युदकलक्षणः **अस्ति। स ईं** स एव पुत्रः। यद्वा ईं एनमर्थं स्त्रीणां सतीनां पश्चात् पुरुषभावं **आ चिकेत** सर्वतो जानाति। पित्रोः स्थितिं पुत्र एव जानाति नान्यः। **यः** कश्चित् **ता** तानि **विजानात्** स्त्रीपुरुषपुत्ररूपाणि जानीयात् **सः पितुः पिता असत्**। पिता वृष्ट्या जगत्पालको रश्मिसमूहः। तस्यापि पिता आदित्यः स भवति। आदित्य एव भवतीत्यर्थः। यद्वा लौकिकोक्तिरियम्। यस्तानि जानाति स एवं भवति। स्वयं पितुः पुत्रः सन्नपि स्वपुत्रापेक्षया पिता च भवति। पुत्रपौत्रादिसहितश्चिरकालं जीवी भवति। इत्यधिदैवतम्।

अथाध्यात्मम्। या इदानीं स्त्रियः सतीः स्त्रीत्वं प्राप्ता आहुर्लौकिकाः तानु तानेव मे मह्यं पुंसः पुरुषानाहुः प्रतिपादयन्ति तत्त्वज्ञाः। कथमन्यस्यान्यभावः। उच्यते। एकस्यैव निरस्तसमस्तोपाधिकस्यात्मनस्तद्देहावस्थानमात्रेण तत्तद्व्यपदेशोपपत्तेः। श्रूयते हि—त्वं स्त्री त्वं पुमानसि त्वं कुमार उत वा कुमारी—इत्यादि। स्त्रीत्वं पुंस्त्वं चोभयमपि वस्तुतो नास्तीत्युक्तं भवति। श्रुतिरपि तदभावं बोधयति—

नैव स्त्री नपुमानेष नैव चायं नपुंसकः।
यद्यच्छरीरमादत्ते तेन तेन स चोद्यते॥

इति। द्वितीयः पादः पूर्ववत्। किंच पुत्रो वयसाल्पोऽपि यः कविः क्रान्तप्रज्ञो ज्ञानी स्यात् ईमिममर्थं स विचिकेत जानाति। एवमुक्तलक्षणस्य परमात्मनः ता तानि स्त्रीपुंस्त्वादीनि यो विजानात् औपाधिकानि जानीयात् सः पितुः स्वोत्पादकस्यापि ज्ञानरहितस्य पितासत् पितृवत् पूज्यो भवति। उक्तमर्थमभिप्रेत्य ताण्डकब्राह्मणम्—शिशुर्वा अङ्गिरसो मन्त्रकृतां मन्त्रकृदासीत्। स पितॄन् पुत्रका इत्यामन्त्रयत—इत्युपक्रम्य—ते देवानपृच्छन्त। ते देवा अब्रुवन्। एष वाव पिता यो मन्त्रकृत्—इति। मन्त्रद्रष्टुरेव किल पितृत्वम्। तत्त्ववित् पितुः पितासदिति किमाश्चर्यमित्यभिप्रायः॥

१६. ऊं इतिं—अक्षण्ऽवान्—विऽजानात्—इति पदपाठः।

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

पूर्वजन्मनि सिद्धानां स्त्रीणां अन्धादीनां च अत्राधिकार उच्यते। उकारोऽत्र पूरणार्थः। अयमर्थः कुतो ज्ञेयः। गुरोश्चेत् स हि को गुरुः। इह ब्रवीतु—इति मन्त्रोक्तं गुरुलक्षणं पुत्रेष्वभिचरितम्। इत्यत्रोच्यते। ननु स्त्रीणां नात्राधिकारः। कथम्।

स्त्रीणां शूद्रान्धपङ्गूनां बधिराः पतिताश्च ये।
क्लीबानां नैव काणानां वेदविद्याधिकारिता॥

इति वृद्धमनुस्मरणात्। अत्र श्रुत्या उत्तरमुच्यते। उ अपि मे मम ब्रह्मवित्त्वेन परमात्मनः सतीः संबन्धिनीः आत्मविद्याप्रवणाः स्त्रियोऽपि तानत्यन्तोत्कृष्टान् पुरुषानाहुः। लौकिकं स्त्रीत्वं ब्रह्मविद्याविषये आतिदेशिकेन पुंस्त्वेन श्रौतेन बाध्यते। अतः सा स्मृतिः ब्रह्मविद्येतरविषया एव।

गोधादियोषितां स्त्रीत्वेऽप्यस्ति ब्रह्मणि भागिता।
रुक्मिणीदेवहूतीलादेवक्यो ब्रह्मवित्तमाः॥

इति ममैव ज्येष्ठभ्रात्रा लक्ष्मीधराचार्येणोक्तम्। उक्तं च शङ्खेन—

नोपनीतो नैव ब्रह्मविद्यां व्याहरते शिशुः।
योषितोऽपि न तद्ब्रूयुर्विना तु ब्रह्मवादिनीः॥

इति। चन्द्रिकाकारोऽप्याह्निके एवमेवोक्तवान्—तत् ब्रह्मवादिनीव्यतिरिक्तविषयम्—इत्यादिना ग्रन्थेन। विज्ञानेश्वरेणापि प्रव्रजितागमने प्रायश्चित्तातिशयं ब्रुवता प्रव्रजितानां स्त्रीणां अधिकारः सूचितः। प्रव्रज्यायास्तु ब्रह्मविद्या मा भूदिति विरुद्धं वचनम्। अस्ति चात्रैतिह्यम्—श्रीशङ्कराचार्यः स्वमात्रे ब्रह्म उपदिष्टवान्। तदर्थमात्मबोधाख्यो ग्रन्थश्च विरचितः। न च स्त्रियो नोपदेश्याः—इत्यस्ति श्रुतिः। श्रवणनिषेधाभावात् मुमुक्षादिदशासंभवाच्च। तदुक्तम्—

यथाधिकारः श्रौतेषु योषितां कर्मसु स्मृतः।
एवमेवानुमन्यस्व ब्रह्मणि ब्रह्मवादिताम्॥

इति यमस्मृतिः। तस्मात् स्त्रीणामप्यस्ति ब्रह्मविद्यायामधिकारः। एवं जात्यन्धस्यापि इत्याह। पश्यत् पश्यति चेत् ब्रह्म। अक्षण्वान् चक्षुष्मानेवासौ। ब्रह्मविद्यायां जात्यन्धनियमनिर्बन्धो नास्तीत्यर्थः। एतमेवार्थं व्यतिरेकेणाह। न विचेतत् ब्रह्मविद्यां न वेत्ति चेदन्ध एवासौ। अत एवात्रेदं कैश्चिदुक्तम्—

स्त्रीणां यत्र स्मृतौ ब्रह्मविद्यायाः प्रतिषेधनम्।
दुष्टं तत्स्मरणं यद्वा मन्त्रादिर्विषयो भवेत्।

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

इति । एवं चिकित्वान् इत्यत्रोक्तं लक्षणं स्त्र्यादिष्वभिचरितं इत्युक्तम् । गुरौ लभ्ये सति स्त्रीणामप्युपदेश्यत्वात् । अतः—इह ब्रवीतु—इति मन्त्रोक्तं गुरुलक्षणं पुत्रेष्वभिचरितं इति । अत्रोच्यते ।

पितुः पुत्रो गुरुर्यत्र पत्युर्भार्या गुरुस्तथा ।
आचार्यस्य गुरुश्छात्रस्तत्र धर्मः प्रणश्यति ॥

इति विरोधो दृश्यते इति चेत् न । एषापि निषेधस्मृतिसदृशी नोपेया । अथवा मन्त्रादिविषया न ब्रह्मविद्यादिविषया । कविस्तत्त्वज्ञः यः पुत्रः स इह ईं इदमात्मतत्त्वम् । आचिकेत आज्ञापयति इति स गुरुः स्यादेव । ज्ञापको हि गुरुः । ज्ञानेनैव ज्ञापयति । पुत्रत्वात् पितरं प्रत्यनुपदेष्टृत्वमिति चेत् तत्राह । यस्तावदात्मतत्त्वं विजानाति स पितुरपि पिता भवति । लौकिकं पुत्रत्वं ब्रह्मविद्याविषये आतिदेशिकेन पितृत्वेन श्रौतेन बाध्यते । अत एवोपनिषदि श्रूयते—कामं पित्रे वाचार्याय वा शंसेदात्मन एवास्य तत् कृतं भवति—इति । हरिवंशेऽपि—

पुरा ह्यधर्मादिविनष्टसंज्ञा देवास्तमर्थं तनयानपृच्छन् ।
ज्ञानेन सम्यक् परिगृह्य हस्ते तान् पुत्रकाः शंसतमित्यवोचन् ॥

इति । आहुश्च सर्वज्ञजगदाराध्यसंप्रदायाधिकारीत्युक्ततिलकभूता योगनिष्ठाः—

देवहूत्यै हितः पुत्रः कपिलस्तत्त्वमूचिवान् ।
पितरं चाह कृष्णोऽपि तस्मात् पुत्रो गुरुर्भवेत् ॥

इति । ननु अपशूद्राधिकरणे उपनयनाभावेन अध्ययनाभावान्न शूद्रो ब्रह्मविद्यायां अधिकारी इत्युक्तम् । शूद्रसमैव ब्राह्मणादीनामपि स्त्री उपनयनादिरहिता । स्त्रीशूद्रसाम्यात् । शूद्रस्य वेदमुपश्रृण्वतः त्रपुजतुभ्यां कर्णपूरणमपि स्मर्यते । अस्ति च प्रसिद्धिः—स्त्रीशूद्रवर्जमधीष्व इति युक्तम्—इति । अन्या चास्ति स्मृतिः—

न ब्रह्म व्याहरेद्योषिद्बालः शूद्रोऽपजातिकः ।
व्याहरन्त इमे दण्डया राज्ञा सन्मार्गरक्षिणा ॥

इति । अपजातिको नाम ब्राह्मणब्रुवको भ्रष्टो गोलकादिश्च उच्यते । अपशूद्राधिकरणात् । कथं तर्हि विदुरादीनां ब्रह्मविद्याधिकारो दृश्यते इत्याक्षिप्य उत्तरमुच्यते । आत्मज्ञानसिद्धानामधिकारो न विचार्यते इति ।

प्राग्जन्मवासनाजन्यब्रह्मज्ञानप्रवृत्तयः ।
आज्ञानशुद्धा इत्युक्तास्ते ब्रह्मण्यधिकारिणः ॥

FRONTIER CIRCLE LIBRARY
Acct. No. 1659
CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

इत्यैतिह्यपठितं पुराणवचनम्। अत्र चाभिप्रायो वर्णितः। अपशूद्राधिकरणभाष्यस्य मा भूच्छ्रौतोऽधिकारः। इतिहासव्यासपुराणादिमूलस्तु भविष्यति। अस्ति च पुराणादिष्वप्युपदेष्टव्यं तत्त्वमस्यादिवाक्यम्। तत्तु वेदस्वरूपं न वेदः। आहुश्च भट्टाचार्याः—

तानेव वैदिकान् शब्दान् भारतादिनिवेशितान्।
स्वाध्यायनियमं हित्वा लोकबुद्ध्या प्रयुज्यते॥

इति। महाभारते च—

श्रुतिभिर्बोधयेत्कांश्चित् पुराणादिगिरापरान्।
पूर्वार्यवचसा कांश्चिल्लौकिक्या च गिरापरान्॥
यत्र यस्याधिकारोऽस्ति तं तेनैव प्रबोधयेत्।
न चोपेक्षेत संप्राप्तं मुमुक्षुं ब्रह्मवित् क्वचित्॥

इति। नृसिंहमन्त्रराजकल्पे तु श्रौत एवाधिकारो दर्शितः—

नृसिंहब्रह्मविद्यायां निर्गुणस्य परात्मनः।
अधिक्रियन्ते शूद्राश्च स्त्री चापि शरणागता॥

इति। न च—

तस्माच्छूद्रो न वक्तव्यः।

इति श्रुतिविरोधात् शूद्रस्याधिकारं ब्रुवन्नयं कल्पः प्रमाणं न स्यात्। श्रुतेर्यज्ञैकविषयत्वात्। कल्पस्तु ब्रह्मविषयः। ननु यदा—निषादस्थपतिं याजयेत्—इति वचनान्निषादस्यापि यज्ञाधिकारः। यथा वा—एह्येवा इदं मधु इदं मधु इमं तीव्र सुतं पिब—इत्यारभ्य खण्डसमाप्तिपर्यन्तेन ग्रन्थेन दासानां वेदवाक्यविषये श्रवणं पाठश्च दर्शितः। नापितस्य च यथा श्रवणशीतोष्णामन्त्रश्रवणं तथा च शमितृश्रवणं पत्नीवाचनं पत्नीजपः। तथा चाथर्ववेदिनाम्—अर्यमणं नु देवम्—इत्यादौ विशेषे कन्यां वाचयति तथैव ब्रह्मविद्यायां श्रौत एवाधिकारो भविष्यति शूद्रस्यापि। मैवम् निषेधस्य बलीयस्त्वात् अनेकश्रुतिविरोधाच्च। अत्यन्तशूद्रप्रायस्यापि जातिमात्रोपजीविनः स्त्रीवन्मूढस्यापि श्रद्दधानस्य ब्राह्मणस्य बोधकोऽयं मन्त्र इति द्योत्यते। तस्माच्छूद्रजातेरधिकारो नास्ति श्रौते। यदुक्तं नापितादेः श्रवणं तत् तावन्मात्रमन्त्रविषयनियतम्। मा भूच्छूद्रस्य श्रौतपूर्वोऽधिकारः। ब्राह्मणस्त्रीणां तु न विरुध्यते। श्रुतिश्रवणनिषेधस्तासां नास्ति। श्रुतिपाठाभावेऽपि श्रुत्यर्थावधारणपक्षोऽस्त्येव। को नाम विरोधः। स्त्रीवर्ज्याध्ययनभावस्तु ऐतिह्यमात्रम्।

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

नावेदविद्भ्यः पठनीयमेतत् पुराणरत्नं पुरुशासनस्य ।
नाभक्तशिष्याय न नास्तिकेभ्यो दत्तं हि यत्तन्निरयं ददाति ॥

अयं निषेधस्तु तत्प्राधान्येन आनुषङ्गेन । श्रीभागवते तु—

स्त्रीशूद्रद्विजबन्धूनां त्रयी न श्रुतिगोचरा ।
कर्मश्रेयसि मूढानां श्रेय एव भवेदिति ॥

इति । भागवताख्याने पुराणमूलोऽधिकारी दर्शितः । तथाच श्वेताश्वतरे द्वितीयायां मन्त्रोपनिषदि तु—

ज्ञानं श्रुत्वा ब्राह्मणात् क्षत्रियाद्वा वैश्याच्छूद्रादपि नीचादभीक्ष्णम् ।
श्रद्धातव्यं तत्परेशो ह नित्यं न श्रद्धिनं जन्ममृत्यू हरेताम् ॥

इति । शिवधर्मोत्तरे—

यस्तु वर्णावकृष्टः स्यान्नारी वा धर्मचारिणी ।
तावप्येतेन योगेन गच्छेतां परमां गतिम् ॥

इति । भगवद्गीतासु च—

मां हि पार्थ व्यपाश्रित्य येऽपि स्युः पापयोनयः ।
स्त्रियो वैश्यास्तथा शूद्रास्तेऽपि यान्ति परां गतिम् ॥

इति । एकादशस्कन्धे च—

स्त्रियो वैश्यास्तथा शूद्रास्तेऽनुकम्प्या भवादृशाम् ।
अनन्यशरणास्ते हि श्रद्धा येष्वपि दृश्यते ॥

इति । याज्ञवल्क्योऽपि—

भूतात्मनस्तपोविद्ये ज्ञानं बुद्धेर्विशोधनम् ।
क्षेत्रज्ञस्येश्वरज्ञानाद्विशुद्धिः परमा मता ॥

इति । ब्रह्मोपनिषत्परिशिष्टेऽपि—

नैव स्त्री न पुमानेष नैव चायं नपुंसकः ।
यद्यच्छरीरमादत्ते तेन तेन हि लक्ष्यते ॥
तस्मात् सर्वे विजानीयुरात्मानं विश्वरूपिणम् ।
आचार्यश्चेत् परं ब्रह्म ब्रूयान्मुच्यन्त एव ते ॥

इति । वासिष्ठरामायणे च—

श्वपचः प्राह चण्डालः प्रश्नं कर्कटिकां प्रति ।

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

परं ब्रह्म ततोऽस्त्वेव स्त्रीणां ब्रह्माधिकारिता ॥

इति । स्कान्दपुराणे कालिकाखण्डे पञ्चदशे मुक्तिखण्डे विष्णुं प्रति शिवो ब्रह्मक्षत्रविशां श्रेष्ठमध्यमादीनां गुरुत्वं प्रतिपादयन्नाह—

ब्रह्मणश्चापि विप्रस्य क्षत्रियस्य तथैव च ।
विशः शूद्रस्य शुश्रूषोर्गुरुः स्याद्योषितामपि ॥
शूद्राणां च तथा स्त्रीणां गुरुत्वं न कदाचन ।
गुरुत्वं केचिदिच्छन्ति नोत्तमं प्रति केशव ॥

इति । विष्णुरहस्ये च—

कात्यायिनी च मैत्रेयी गार्गी वाचक्नवी तथा ।
एवमाद्या विदुर्ब्रह्म तस्मात् स्त्री ब्रह्मविद्भवेत् ॥

इति । एतेन यत्तैत्तिरीयैरुक्तम्—पुंसामप्यपरिव्राजकानां ब्रह्मविद्यायामनधिकारः—इति तदप्यपास्तम् । अपरिव्राजकानां स्त्रीणामिव पुरुषाणामप्यधिकारः कैमुत्यवादप्रसिद्धः । तदुक्तं ब्रह्मगीतायाम्—

श्रुतौ स्मृतौ वा परमार्थवेदिनः श्रुता न ते वै यतयः प्रसिद्धाः ।
संन्यासिनो ये परमार्थवेदिनो गार्हस्थ्यधर्मा बहवो विमुक्ताः ॥
तस्माद्ब्राह्मणमात्रस्य ब्रह्मविद्याधिकारिणः ।
उपदेश्ये गुरौ वापि नात्र वर्णाश्रमादरः ॥

इति । साधनचतुष्टयसंपन्नस्तावदधिकारी । कथम् । श्रुतिभिर्बोधयेत् कांश्चित्—इति व्यवस्थया सर्वेषां श्रवणमपि घटते । गृहस्थाद्यधिकारसमर्थनं सप्रपञ्चमद्वैतसिद्धौ द्रष्टव्यम् । विस्तरभयान्नेह लिख्यते । कल्पस्तु—

पुंवदन्धश्च योषिच्च ब्रह्मविद्याधिकारिणौ ।
श्रद्धिनो ब्रह्मवित् पुत्रो गुरुः स्यात् पितरं प्रति ॥

इति ॥

अवः परेण पर एनावरेण
पदा वत्सं बिभ्रती गौरुदस्थात् ।
सा कद्रीची कं स्विदर्धं परागात्
क स्वित् सूते नहि यूथे अन्तः ॥ १७ ॥

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

अत्राग्नौ हूयमानहविर्गोरूपेण स्तूयते। **गौः** गोरूपा गमनशीलैषाहुति-सङ्घेन पोष्यं **वत्सं** वत्सस्थानीयमग्निं **अवः** अधस्तादधोदेशे **परेण पदा** पादद्वयेन स्वावयवेनाकृष्य **बिभ्रती** धारयन्ती। तथा **परः** परस्तादुपरिदेशे **एना** अनेन **अवरेण** च पदा पादद्वयेनाकृष्य तमेव वत्सं बिभ्रती **उत् अस्थात्** सूर्यं प्रत्युत्तिष्ठति।

अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते।

इति स्मृतेः। अथैवं कृतवती **सा** आहुतिः **कद्रीची** क्व गतेत्यनिश्चयगमना। आदित्यं प्राप्तवती इत्यर्थः। **कं स्वित्** कं फलभाजं पुरुषं प्रति **अर्धं** अर्धमार्गमागत्य। यद्वा अर्धमृद्धं **परां अगात्** परागच्छति। आगत्य च **क्व स्वित् सूते** कुत्र प्रदेशे फलमुत्पादयति। **नहि** इतरगोवदियं **यूथे अन्तः** सजातीयगोमध्ये सूते साधारण्येन यत्र क्वचित सूते। अपि तु कस्मिंश्चिदनुष्ठातरि। अतः स महान् को नु स्वित्—इति। यद्वा आदित्यरश्मिसमूह एव गोरूपेण स्तूयते। गौरुक्तलक्षणा रश्मिरूपा गौर्वत्सं वत्सवद्रक्षणीयं यजमानमुक्तक्रमेण बिभ्रती उदस्थात्। अथ तथा कृत्वा सा कद्रीची अदृश्यगमना सती कं स्विदर्धमृद्धमर्धस्थानभाजं वा कंस्वित पुरुषमादित्यं परागात। अप्रतिनिवृत्ता गता। तं नयन्त्येताः सूर्यस्य रश्मयो यत्र देवानां पतिरेकोऽधिवासः—इति श्रुतेः। तथा कृत्वा च क्वस्वित् सूते कस्मिन्निन्द्रादिलोके जनयति। न सर्वत्र। शिष्टं समानम्॥

१७. अन्तरिति—इति पदपाठः।

ननु कथमुपदेशः कर्तव्यः। किं त्वंपदार्थानुवादेन तत्पदार्थोपदेशः तत्पदार्थानुवादेन त्वंपदार्थोपदेशो वा। अत्रेदमुत्तरम। अवः अवरो जीवः। आदावनूद्य परेण ब्रह्मणा योज्य इति शेषः। पश्चात् परमात्मा ब्रह्म एना अनेन अवरेण जीवेन सह योज्यः। ततो गौः श्रुतिः। पदा पादेन महावाक्यात्मना एकदेशेन वत्सं पुत्रभावमापन्नं शिष्यं बिभ्रती परमात्मस्वरूपेण योजयन्ती। उदस्थात् उत्तिष्ठति उत्कर्षेणास्ते श्रवणमनननिदिध्यासनरूपमुत्कर्षं प्राप्नोति। कार्यकारणभेदविवक्षात्र। सा एव कद्रीची। सा स्वात्मानुभूता। रीङ् गतौ। गतिरत्र नाशः। अञ्चू गतौ। कत् कुत्सितं संसारमशुभं रीयते ध्वंसते नाशयति इति परमात्मज्ञानाभ्यासः कद्री। तां अञ्चति गच्छति पूजयति च इति कद्रीची स्वात्मानुभूतित्वात्। टिप्पणकारस्त्वाह—

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

सनाभिर्ज्योतिरित्यादेरार्पितेति तु वेदतः ।
अक्षण्वानाद् तदुक्तो नुट् कद्रीची विष्वगित्यतः ॥

इति । अस्यार्थः । सनाभिः । इदं पदं समानस्य सभावे । ज्योतिर्जनपद--इति सूत्रेण । यद्वा सहशब्दस्य सभावः । वोपसर्जनस्य—इति । तथा—तस्मिन्नार्पिता भुवनानि—इत्यत्र दीर्घो वेदत्वात् ज्ञेयः—इत्यर्थः । तथा —अक्षण्वान् न विचेतदन्धः— इत्यत्र—छन्दस्यपि दृश्यते—इति आट् । आतो नुट —इति नुट् । कद्रीची । अत्र किं कुत्सितमञ्चति इत्यर्थे—आ सर्वनाम्नः—विष्वग्देवयोश्च टेः—इति अद्र्यादेशः । अञ्चतेश्चोपसंख्यानम्—इति ङीप् । अचः—इति अतो लोपः । चौ—इति दीर्घः । अर्थस्तु स एव । कमप्यर्धं भागं लक्षणयावशेषितं अंशं कमपि जडरूपमंशं पराकृत्य आगात् आगच्छति अनुभवति । ननु यद्यपि भागलक्षणया स्वस्य चिदंशग्रहणेन अङ्गत्याग उक्तः तथापि माया तं जडांशं पुनरपि उपेक्षते सूते—इति चेन्न । क्व स्थाने जडांशं सूते पुनः । न हि स्वित् स्वात्मनि । प्रणष्टत्वात् । नाप्यात्मनि नापि कारणे । तस्य निरस्ताविद्यत्वात् । अथ कारणादियूथे तदपि न इत्याह—न हि यूथे अन्तः— इति । ईशमायाभिप्रायेणैतदुक्तं भवति न जीवमायाभिप्रायेण । जीवमायानाशे सति कुण्ठितशक्तिरीशमाया क्व संसाररूपं जडांशं सूते चित् । नात्मनि नाप्यात्मदेहेन्द्रियादियूथे । जीवमायांशेन तस्या अपि निर्मूलत्वेन नष्टप्रायत्वात् । कल्पस्तु—

त्वमर्थमुक्त्वा परमेश ईर्यः पश्चात्तयोर्व्युत्क्रम ईरणीयः ।
तदर्धपक्षेण जडांशहन्त्री दृष्ट्वा श्रुतिं भीतिमुदास माया ॥

इति ॥

अ॒वः परे॑ण पि॒तरं॒ यो अ॑स्यानु॒वेद॑ प॒र ए॒नाव॑रेण ।
क॒वी॒यमा॑नः॒ क इ॒ह प्र वो॑चदे॒वं मनः॑ कु॒तो अधि॒ प्रजा॑तम् ॥ १८ ॥

अ॒वः अवस्तात् स्थितं **अ॒स्य पि॒तरं॑** एतल्लोकपालमग्निं **परे॑ण** आदित्येन सह **यः अ॒नु॒वेद॑** अनुक्रमेण जानाति । तथा **प॒रः** परस्तात्स्थितमादित्यं अस्य पितरं पालकम् । सोऽपीममेव लोकं वृष्ट्यादिना पालयति । तादृशमादित्यं **ए॒ना** अनेन **अव॑रेण** अग्निना सह योऽनुवेद अग्न्यादित्यौ व्यतिहारेणोपास्ते । यद्वा अभिभूतरजस्तमस्कावुद्बुद्धसत्त्वौ अत एव स्वाधीनमायौ एतौ एकत्वेन वाधिगच्छतः । स तादृशः पुरुषः **क॒वी॒यमा॑नः** कविवदाचरन् क्रान्तदर्शित्वमात्मनः ख्यापयन्

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

कः इह अस्मिन् लोके **प्र वोचत्** प्रब्रवीति । किं च **देवं** द्योतमानं देवविषयमलौकिकं वा **मनः कुतः** कस्माददृष्टविशेषात् **अधि** आधिक्येन **प्रजातं** उत्पन्नम् । उभयमपि दुर्लभमित्यर्थः ॥

१८. अनुऽवेद-कविऽयमानः-प्रऽजातम्—इति पदपाठः ।

पूर्वमन्त्रोक्तव्यतिहारं जानन्नेव गुरुर्दैवतमित्युच्यतेऽनेन मन्त्रेण । अवः अवरो जीवः परेण परमात्मना योज्यः इति शेषः । पश्चात् परे एना अनेनावरेण योज्यः इति शेषः । अस्य जगतः पितरं ईश्वरमनु अनुक्रमेण आचार्योपदेशक्रमेण यो वेद वेत्ति स एव कवीयमानः कवींस्तत्त्वज्ञान् शिष्यान् आत्मने इच्छन् । शानच्प्रत्ययः । स्वरस्त्वनुसर्तव्यः । कविमिव ब्रह्माणमिवात्मानमाचरन् । कविर्ब्रह्मा । स इवाचरतीति विग्रहः । आचरतीत्याचार्यः ।

आचार्यो ब्रह्मणो मूर्तिः ।

इति श्रूयते । न चैवं वाच्यं एवंविधा गुरवः सुलभाः इति । यथावसरस्तूपदेशः । नात्र त्वरणीयं इत्यत आह—क इह प्रवोचत् देवं कः दुर्लभः पुरुषः इह ब्रह्मविद्यायां प्रवक्ष्यति तं देवं परमात्मानम् । वक्तरि लब्धे श्रोता स्यात् । तथा श्रोतरि सति वक्ता स्यात् । यतः श्रोतापि दुर्लभ इत्याह । मनः चित्तं अधि अधिकं शुद्धं कुतः कारणाज्जातं भवेत् । तत्र कारणं सत्कर्मादि । तत्तु दुरनुष्ठानम् । शुद्धान्तःकरणस्यैव अध्यात्मश्रवणं निर्वहतीति श्रोतापि दुर्लभ इत्यर्थः । कल्पस्तु—

यो वेद देवं व्यतिहाररीत्या सोऽयं गुरुर्ब्रह्मसमः प्रसाध्यः ।
पुण्यैरतो वक्तरि शिष्यभावं प्रायात् स शिष्ये सति वक्तृभावम् ॥

इति । प्रायादिति संबध्यते ॥

ये अर्वाञ्चस्ताँ उ पराच आहुर्ये पराञ्चस्ताँ उं अर्वाच आहुः ।
इन्द्रश्च या चक्रथुः सोम तानि धुरा न युक्ता रजसो वहन्ति ॥ १९ ॥

ये सूर्यसोमयोश्चक्रे वर्तमाना रश्मयो ग्रहादयश्च तत्परिभ्रमणवशेन **अर्वाञ्चः** अर्वागञ्चना अधोमुखाः सन्ति **तान् उ** तानेव **पराचः आहुः** पराङ्मुखाञ्चनानूर्ध्वानाहुः कालविदः । तथा प्रथमं **ये पराञ्चः** परागञ्चनाः **तान् उ** तानेव

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

अर्वाचः आहुः । हे **सोम** त्वं **इन्द्रः** परमेश्वरः इरां भूमिं वृष्ट्या धारक आदित्यः । यद्वा द्वादशादित्यानां मध्ये इन्द्रोऽप्येकः । विवस्वदिन्द्रयुताः—इत्युक्त-त्वादयमपीन्द्रः । स **च** युवां **या** यानि मण्डलपरिभ्रमणानि **चक्रथुः** कृतवन्तौ **तानि रजसः** रञ्जनात्मकस्य लोकस्य । कर्मणि षष्ठी । लोकं **वहन्ति** निर्वहन्ति । तत्र दृष्टान्तः । **धुरा** शकटादौ धुरि **युक्ताः न** अश्वादयो यथा धुरं वहन्ति तद्वत् । यद्वा एतत् पूर्वार्धे दृष्टान्तितम् । धुरा युक्ताः । धुरि स्थितं चक्रमपि धूर्शब्देनोच्यते । तत्र युक्ताः समर्पिताः पुरुषास्तत्परिभ्रमणवशेनार्वाञ्चोऽपि पराञ्चः पराञ्चोऽप्यर्वाञ्चो भवन्ति तद्वत् ॥

१९. ऊं इति-ऊं इति—इति पदपाठः ।

ब्रह्मविद्येतरमन्त्राद्युपदिष्टानां ब्रह्मलोकप्राप्तावपि पुनरावृत्तिरित्यनेनोच्यते । ये अर्वाञ्चो मनुष्या मन्त्राद्युपासकाः तान् उ एव पराचो ब्रह्मलोकादिगामिनः आहुः । ये पराञ्चो ब्रह्मलोकादिस्थाः तान् अर्वाचो मनुष्यानाहुः । ब्रह्मविद्याभावे मन्त्राद्युपदिष्टाः पुनरावर्तन्ते । मन्त्रादौ मनुष्याणामेव अधिकारः इति सूचितम् । ननु मर्त्यलोकस्थान् के ब्रह्मलोकं प्रापयन्ति । के वा ब्रह्मलोकस्थान् मर्त्यलोकं प्रापयन्ति । किं कर्माण्येव इत्यत आह—इन्द्र ईश्वरः प्रयोजककर्ता त्वं च भो सोम सुन्वन् कर्मिन् प्रयोज्यकर्तः युवा या यानि कर्माणि चक्रथुः कृतवन्तौ स्थः तानि कर्माणि धुरा अग्रेसरेण लिङ्ग-शरीरेण युक्ता युक्तानि रजसः मनुष्यलोकान् वहन्ति ब्रह्मादिलोकं प्रापयन्ति । रजसो ब्रह्मलोकाद्वा वहन्ति मर्त्यलोकं प्रापयन्ति । धुरा न युक्ता यथा रथस्य धुरा युक्ता अश्वास्तं रथं देशाद्देशान्तरं प्रापयन्ति तद्वदित्यर्थः । कल्पस्तु—

मन्त्रोदिता ये मनुजाः प्रयान्ति ब्रह्मादिलोकानथ ते नृलोकान् ।
तत्त्वज्ञता यावदिमे भ्रमन्ति कर्माण्यसाधारणकारणानि ॥

इति ॥

द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परि षस्वजाते ।
तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभि चाकशीति ॥ २० ॥

अत्र लौकिकपक्षिद्वयदृष्टान्तेन जीवपरमात्मानौ स्तूयेते । यथा लोके **द्वा** द्वौ **सुपर्णा** सुपर्णौ सुपतनौ शोभनगमनौ **सयुजा** समानयोगौ **सखाया** समानख्यानौ

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

समानं वृक्षं परि सस्वजाते एकमेव वृक्षं परिषस्वजाते आश्रयतः । **तयोः अन्यः** एकः **पिप्पलं स्वादु** पक्वं स्वादुतरं **अत्ति** । **अन्यः** अपरः **अनश्नन् अभि चाकशीति** अभि पश्यति । तद्वत् द्वौ सुपर्णस्थानीयौ क्षेत्रज्ञपरमात्मानौ सयुजा समानयोगौ । योगो नाम संबन्धः । स च तादात्म्यलक्षणः । स एवात्मा जीवात्मनः स्वरूपं यस्य परमात्मनः स तदात्मा । एवमन्यस्यापि स एवात्मा परमात्मनः स्वरूपं यस्य जीवात्मनः । एवमेकस्वरूपावित्यर्थः । अनेन भास्करमतानुसारिणः— अतिरेकिनाम्नो जीवात्मा परमात्मनो नान्यः । स च परमात्मा जीवादन्यो नानाजीवाश्रयणात्--इति मतं निरस्तं भवति । ननु संबन्धो द्विष्ठः । स च पक्षिणोरेव भेदमपेक्षते । अतः कथमैकात्म्यम्—इति । न । औपाधिकभेदं वास्तवाभेदं चापेक्ष्य प्रवृत्तः । अत एव सखायौ समानख्यानौ नान्यख्यानौ । ननु—एकस्य यादृशं ख्यानं तादृशमेवान्यस्य इति व्युत्पत्त्या भेदः स्फुटं प्रतिभाति । कथं तादात्म्यं उच्यते—इति न वक्तव्यम् । नात्र परस्परं दृष्टान्तदार्ष्टान्तिकभावः । अपि तु यस्य यादृशं ख्यानं स्फुरणं परमात्मनः तदेव ख्यानमितरस्यापि जीवात्मन इति सखायावित्युच्यते । एकरूपप्रकाशावित्यर्थः । अत उपपन्नमैकात्म्यम् । अनेन वास्तवभेदोऽपि निरस्तः । समानं वृक्षं परिषस्वजाते इत्यत्र यथा आश्रयान्तराभावादुभयोरेकाश्रयत्वमभ्युपगन्तव्यं तद्वत् सयुजा सखायेत्युभयत्राप्येकयोगख्याने आश्रयणीये । वृश्च्यत इति वृक्षो देहः । स चोभयोः समान एक एव । जीवस्य भोगार्थत्वात् परमात्मना सृष्टैर्महाभूतैरारब्धत्वात्तस्योपलब्धिस्थानत्वाच्चोभयोरपि समानः । तादृशं समानं वृक्षं परिषस्वजाते । परिष्वजतः । आश्रयतः । न च—जीवस्य वस्तुत ईश्वरत्वे कथं जीवबुद्ध्या संसारशोकौ—इति वाच्यम् । तयोर्मोहकृतत्वात् । तथा चाथर्वणिका अमुं मन्त्रमाम्नायास्य सन्देहनिवर्तकमुत्तरं मन्त्रमेवमामनन्ति—

समाने वृक्षे पुरुषो निमग्नोऽनीशया शोचति मुह्यमानः ।
जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोकः ॥

इति । अस्यायमर्थः । एक एव शरीरे पूर्णः पुरुषः परमात्मा निमग्नो निगूढः सन् स्वयमीश्वरोऽप्यनीशत्वबुद्ध्या मुह्यमानो मूढः सन् शोचति । संसारेऽहं कर्ता सुखी दुःखीति जननमरणे अनुभवति । यदा तु जुष्टं नित्यतृप्तमन्यं संसारशोकातीतमीशं

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

परमेश्वरं पश्यति स्वानन्यतया साक्षात्करोति तदा वीतशोको देहाद्व्यतिरिक्तः स्वस्वरूपसाक्षात्कारेण गततापत्रयः सन्नस्य महिमानमिति निरस्तसमस्तौपाधिकस्य परमेश्वरस्य महिमानं सार्वात्म्यसर्वज्ञादिमहिमानमिति । एति प्राप्नोति । न च तद्भावानाप्तौ तन्महिमा प्राप्यते । अतस्तद्रूपो भवतीत्यर्थः । तस्माद्वस्तुत एक एव । भेदस्तु मोहकृतः—इति प्रसिद्धम् । अनुभवदशायां लौकिकबुद्ध्या भेदमभ्युपेत्योच्यते—तयोरन्यो जीवात्मा पिप्पलं कर्मफलं स्वादुभूतमत्ति भुङ्क्ते । यस्य यदुपार्जितं तत्तस्य स्वादु भवति । अन्यः परमात्मा अनश्नन्नाप्तकामत्वेनाभुञ्जानः । स्पृहाया अभावात् ॥

आप्तकामस्य का स्पृहा ।

इति स्मृतेः । तस्मादवास्तवभेदमुपजीव्य तयोरन्य इत्युक्तम् । वस्तुतस्तु—

अनीशया शोचति मुह्यमानः ।

इत्युक्तत्वादभेद एव । तादृशः परमात्मा स्वात्मन्यध्यस्तं जगत् साक्षित्वेनेक्षते । अत्र—द्वौ द्वौ प्रतिष्ठितौ सुकृतौ धर्मकर्तारौ—इत्यादि निरुक्ते गतमस्य मन्त्रस्य व्याख्यानमनुसन्धेयम् ॥

२०. सुऽपर्णा-सऽयुजा-सखाया-समानम्-वृक्षम्-परि-सस्वजाते इति—इति पदपाठः ।

अतो ब्रह्मविद्यैवाश्रयणीया । सा च अविद्यासिद्धं जीवमनूद्य तत्पदार्थप्रतिपादनममुमर्थं अभिप्रेत्य जीवपरमात्मानौ आह—द्वा सुपर्णा द्वौ साधूनभ्युदयनिःश्रेयसपक्षान् बिभ्रतौ जीवपरमात्मानौ । सयुजा अन्योन्यममुञ्चन्तौ । सखाया परस्परोपकारिणौ । समानं एकं वृक्षं व्रश्चनीयं देहं परिषस्वजाते परित आलिङ्ग्य तिष्ठतः । तयोर्मध्ये एको जीवः पिप्पलं फलसमं बहुदोषयुक्तमपि कर्मफलं स्वादु कृत्वा अत्ति स्वदिति । अन्यः परः परमात्मा अनश्नन् अभुञ्जानोऽपि अभिचाकशीति अभितः अत्यर्थं प्रकाशते । अत्ति इत्यत्र—एकान्याभ्यां समर्थाभ्याम्—इति प्रथमस्तिङ् न निहन्यते । पैङ्गरहस्योक्तो बुद्धिजीवपक्षोऽप्यविरुद्धः । तत्र सत्त्वं नाम बुद्धिर्जीवोपाधिः । तेन संसारी जीवो लक्ष्यते । परमात्मभावमापन्नस्तत्र जीवो जीवशब्देन विवक्षितो न तु संसारी । स तु परमात्मैव । गुहां प्रविष्टावात्मानौ हि तद्दर्शनात्—इत्येतदधिकरणविषयत्वमस्य मन्त्रस्य प्रतिपादयता श्रीशङ्कराचार्येण एतन्मन्त्रं प्रतिपाद्य विस्तरेण प्रतिपादितम् । कल्पस्तु—

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

जीवः परश्च प्रतिपादनीयौ जीवः परात्मेति विवक्षुकामैः ।
एकस्तयोः कर्मफलं तु भुङ्क्ते चकाश्यतेऽन्योऽनशनः परात्मा ॥

इति ॥

यत्रा सुपर्णा अमृतस्य भागमनिमेषं विदथाभिस्वरन्ति ।
इनो विश्वस्य भुवनस्य गोपाः स मा धीरः पाकमत्रा विवेश ॥ २१ ॥

यत्र आदित्यमण्डले **सुपर्णाः** सुपतनाः शोभनगमना रश्मयः । **अमृतस्य** उदकस्य **भागं** भजनीयमंशमादाय । **अनिमेषं** अनवरतम् । **विदथा** वेदनेन ज्ञानेन अस्माभिरेवं कर्तव्यमिति बुद्ध्या । **अभिस्वरन्ति** अभिप्रापयन्ति । यश्च **विश्वस्य भुवनस्य** भूतजातस्य **इनः** स्वामी । तथा तस्यैव **गोपाः** गोपायिता रक्षिता । अयमादित्यः **सः** परमेश्वरो **धीरः** धीमान् प्राण्यनुग्रहबुद्धियुक्तः सन् । **मा** मां **पाकं** पक्तव्यमपक्वप्रज्ञम् । **अत्र** अस्मिन् स्वकीयमण्डले **आ विवेश** प्रवेशयति । अत्रास्मदीये देहे वा नियामकतया प्रविष्टः—इत्यधिदैवतपक्षे ॥

अथाध्यात्मपक्षे—यत्र यस्मिन्नात्मनि सुपर्णाः शोभनपतनानि स्वस्वविषय-ग्रहणाय गमनकुशलानीन्द्रियाणि चक्षुरादीनि अमृतस्य भागम् । अत्र विषया-वच्छिन्नं चैतन्यममृतमित्युच्यते । तस्य भागं भजनीयं स्वस्वांशं अनिमेषं निमेषरहितं अनारतं विदथा वेदनेन वृत्त्यवच्छिन्नचैतन्येनावरुद्धानि अभिस्वरन्ति अभिप्रयन्ति आवरणापगमनेन स्फोरयन्ति । किंच यस्तु इनः स्वाम्यस्य देहस्य । विश्वस्य भुवनस्य गोपाः गोपायिता रक्षिता । यद्वा विश्वस्य भुवनस्य भूतजातस्य स्वाम्यस्य देहस्य गोपाः । अनेन तत्त्वंपदार्थयोरेकत्वं प्रतिपादितं भवति । स परमेश्वरो धीरः समाधिनिष्ठः सर्वदाविक्रियः मा मां पाकं परिपक्वमनस्कं यागदानादिनापगतरज-स्तमस्कत्वेन दर्पणवदतिनिर्मलसत्त्वोद्रिक्तमनस्कं मां आविवेश । उक्तरूपे चित्ते तादृशं वस्तु स्फुरतीत्यर्थः । यद्वा अपरिपक्वमना अहं पूर्वमज्ञानदशायां मदन्य ईश्वरोऽस्तीत्यविद्वान् ततः परं अस्ति कश्चित् सर्वज्ञः सर्वेश्वरः सत्यज्ञानादिलक्षण इति निश्चित्य पश्चाद्गुरुशास्त्राभ्यां स एवाहमस्मीति मत्वा एवं पारंपर्येणावगत्या-संभावनाविपरीतभावेन व्युदस्य भावनया साक्षात्कृत्य परिपूर्णः परमात्माभूवं इत्यर्थः । अयमेव—स मा धीरः पाकमत्राविवेश—इत्यनेनोच्यते । नन्वनवच्छिन्नस्य

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

परमात्मनः सर्वत्र व्याप्तत्वात् प्राप्तिरेव नोपपद्यते। सम्प्रत्यत्र प्राप्तिर्द्विविधा प्राप्तप्राप्तिरप्राप्तप्राप्तिश्चेति। प्राप्तस्यापि कण्ठे चामीकरन्यायेन आवरणाज्ञानहानद्वारेण प्राप्तिरुपपद्यते। अस्य मन्त्रस्य यन्निरुक्तम्—यत्र सुपर्णाः सुपतना आदित्यरश्मयः—इत्यादिकं तदत्र द्रष्टव्यम् ॥

कोऽयमत्यर्थं प्रकाशः। तत्रेदमुत्तरम्। सुपर्णा मोक्षपक्षीया जीवाः यत्रार्थे प्रकाशेऽभिव्यज्यमाने सति अमृतस्य आनन्त्यस्य सुखरूपस्य ब्रह्मणः। अनिमेषं अनश्वरं भागं भजनं प्राप्तिम्। विदथा ज्ञानेन वृत्तिलक्षणेन अभिस्वरन्ति। अभिस्वरतिर्गतौ। अत्र ज्ञानमार्गे विघ्ननिरासकः परमेश्वर एव सेव्यमान इत्याह—विश्वस्य सर्वस्य भुवनस्य लोकस्य इन ईश्वर एव ज्ञानमार्गप्रवृत्तस्य गोपाः गोप्ता रक्षकः। गोपायतेः क्विपि यलोपः। कथं भिन्नस्वभावयोरैक्यम्। तत्राह—स इनश्चिन्मात्रांशः। धीरः। धीः इरा अवशिष्यमाणा यस्य स तथा। पाकं प्रशस्तं विगलितासद्द्वितीयत्वादिदोषं चिन्मात्रं सन्तम्। मा मां अत्र वेदने असन्निवृत्तिलक्षणे आविवेश प्रविशति। प्रवेश औपचारिकः। चिन्मात्रयोः जीवपरमयोरैक्यं न विरुध्यते। कल्पस्तु—

ज्ञानेन यत्तेजसि दीप्यमाने ज्ञानस्य गोप्ता भवतीश्वरः सः।
चिन्मात्रयोरैक्यमितस्तयोः स्यान्नित्यं ततो यात्यमृतस्य भागम् ॥

इति। कल्पे तु प्रथमद्वितीयपादव्याख्या संक्षेपतः कृता ॥

यस्मि॑न्वृ॒क्षे म॒ध्वदः॑ सुप॒र्णा नि॑वि॒शन्ते॒ सुव॑ते॒ चाधि॒ विश्वे॑।
तस्येदा॑हुः॒ पिप्प॑लं स्वा॒द्वग्रे॒ तन्नोन्न॑शद्यः॒ पि॒तरं॒ न वेद॑ ॥ २२ ॥

अत्र वृक्षस्वरूपकल्पना। अधिदैवमादित्यमध्यात्ममात्मानं च प्रशंसति। **यस्मि॑न्** आदित्ये **वृ॒क्षे** वृक्षवत् सर्वफलाश्रयभूते। **म॒ध्वदः॑**। मध्वित्युदकनाम। तददन्तीति मध्वद उदकस्यात्तारः। **सु॒प॒र्णाः** सुपतना रश्मयो **नि॒वि॒शन्ते॑** प्रविशन्ति रात्रौ। **सु॒व॑ते॒ च॒** पुनरुदयकाले प्रकाशं जनयन्ति च यस्मादादित्यात्। कुत्र। **अधि॒ विश्वे॑** विश्वस्योपरि। **तस्य॑ इत्** आदित्यवृक्षस्य **पिप्प॑लं** पालकं फलं **स्वा॒दु** रसवत्। **अग्रे॑** उपर्युपासनानन्तरं **आ॒हुः॒** कथयन्ति तत्त्वविदः। यद्वा सर्वस्याध्युपरि वर्तमानमाहुः। ईदृशं **पि॒तरं॑** जगतः पालयितारं **यः** नरः **न वेद॑** नोपास्ते सः

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

तद् न उत् नशत् । नशतिर्गतिकर्मा । तत् फलं न प्राप्नोति । वेदितुस्तु अग्रे पिप्पलमाहुरित्यर्थः—इत्यधिदेवपक्षे ।

अथाध्यात्मपक्षे—यस्मिन् परमात्मनि वृक्षे वृक्षवद्गमनादिरहिते अविक्रिये । सुपर्णाः शोभनगमनानीन्द्रियाणि मध्वदो मधुनो ज्ञानस्यात्तृणि । तत्त्वज्ञानेन ज्ञानभाञ्जि इत्यर्थः । निविशन्ते स्वापकाले स्वस्वविषयेभ्यः प्रतिनिवृत्तान्यात्मनिवृत्त्या लीयन्ते । पुनः प्रबोधकाले अधि विश्वे विश्वस्योपरि सुवते च उद्यन्ति च । स्वस्वविषयान् लभन्ते इत्यर्थः । तस्य परमात्मनः पिप्पलं पालकं संसारत उद्धारकं स्वाद्वास्वादनीयममृतत्वलक्षणं ज्ञानम् । यत्फलास्वादने पुनः क्षुत्तृष्णाशोकमोहजरामरणादयो न भवन्ति तद्धि स्वादुतमम् । इतरस्वर्गादिफलानि पुनर्जननाद्यापादकत्वादापातस्वादूनि । तत् फलमग्रे स्वरूपज्ञानोत्तरकालमाहुः । यः पुमान् पितरं पालकं ज्ञानफलं तत्फलाधारमात्मानं वा न वेद न जानाति गुरुशास्त्रात् स तत्फलं नोन्नशत् न प्राप्नोति । अत आत्मानं यो वेद स एव तन्मोक्षफलं प्राप्नोतीत्यर्थः । यद्वा चर्मवदाकाशम्—इत्यादिश्रुतेर्ज्ञानादन्योपायस्यामृतत्वप्राप्तिं निवारयति । ब्रह्म वेद ब्रह्मैव भवति—इत्यादिकानुज्ञाप्राप्तिमाह । तस्मादीदृशं परमेश्वरं विदित्वा मुक्तो भूयासमित्यर्थः ॥

२२. मधुऽअदः सुऽपर्णाः निऽविशन्ते—इति पदपाठः ।

एवं चेत् जीवानां मुक्तिः स्यात् कर्मफलं क्व नु । कर्मकर्तृत्वे न मुक्तिः स्यात् । प्रारब्धं तु न नश्यति । प्राप्ताप्राप्तविवेकेन लिङ्गदेहस्यैव भोक्तृत्वं इत्युच्यते—यस्मिन् वृक्षे व्रश्चनीये लिङ्गशरीरे स्थिताः सुपर्णा जीवाः । मध्वदः कर्मफलभोक्तारः । लोकाल्लोकान्तरं निविशन्ते कर्मफलं भुञ्जते । ऐहिकामुष्मिकफलानि सुवते कुर्वते च । अधि अधिकानि काम्यानि निषिद्धात्मकानि संसारकारणानि । तथा विश्वे सर्वात्मका अमुक्ताश्च भवन्ति । एवं लिङ्गदेहस्थानां जीवानां त्रैविध्यमुक्तम् । तस्य लिङ्गदेहस्य इत् एव आहुः । परमार्थतः पिप्पलं कर्मफलं स्वादु स्वदनीयम् । ननु जीवस्य चिन्मात्रतत्त्वज्ञानादेव मुक्तिरस्तु । किमन्तर्गतेन तत्पदार्थज्ञानेन प्रक्रियापरिकल्पितेन । तत्राह—यतोऽग्रे तद्ब्रह्म उत् उत्कृष्टं न नशत् न प्राप्नोत्येव सः यः पितरं जगत्कारणं तत्पदार्थमीशं न वेद न वेत्ति । वैदिकेषु केवलयुक्तेरप्रामाण्यादिति भावः । कल्पस्तु—

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

यस्मिन् स्थिता ऐहिकपारलोकं भोगं भजन्ते सुवते कृतीश्च ।
युक्ताश्च तस्यैव कृते न भोगा यो वेद नेशं न हि तस्य मुक्तिः ॥

इति ॥

यद्गा॒य॒त्रे अधि॑ गाय॒त्रमाहि॑तं॒
त्रैष्टु॑भाद्वा त्रैष्टु॑भं नि॒रत॑क्षत ।
यद्वा॒ जग॒ज्जग॒त्याहि॑तं प॒दं
य इत्तद्वि॒दुस्ते अ॑मृत॒त्वमा॑नशुः ॥ २३ ॥

गा॒य॒त्रे अधि॑ गा॒य॒त्रं आहितम् । प्राथम्यात् सर्वैः स्तुत्यत्वाच्च गायत्री भूः । तदीयं स्थानं गायत्रम् । अधि उपरि तत्र गायत्रमाग्नेयं पदं **आहि॑तम्** । प्रथमसृष्टत्वात् गायति त्रायते च इति व्युत्पत्त्या च प्रजापतेर्मुखात् गायत्र्या सहोत्पन्नत्वात् भक्त्या अग्निरपि गायत्रः । गायत्रोऽग्निः— इति श्रुतेः । भूम्यामग्निः स्थापित इति **यत्** अस्ति । तथा **त्रैस्तु॑भात्** द्वितीयत्वाद्वृष्टिपर्जन्यविद्युद्रूपत्रिस्तोभयुक्तादन्तरिक्षात् **त्रैस्तु॑भं** त्रिस्तोभयुक्तं ऊर्ध्वाधस्तिर्यग्लक्षणस्तोभत्रयोपेतं वायुं **नि॒रत॑क्षत** साधु संपादयितवन्तो देवा इति **वा॒** यदस्ति । **वा॒** अथवा **जग॑ति** सर्वैर्गन्तव्ये उद्गततमे वा तृतीयभूते द्युलोके **जग॑त्** गमनशीलमादित्याख्यं **प॒दं आहि॑तं** इति **यत्** अस्ति । **तत्** इदं त्रिषु स्थानेषु त्रयाणामग्न्यादीनां पदाधानं **ये इत्** ये एव नरा **वि॒दुः** जानन्ति **ते** एव **अ॒मृ॒त॒त्वं आ॒न॒शुः** अमरणरूपं पदमाप्नुवन्ति इत्यधिलोकम् ।

अथ अधियज्ञम् । गायत्रे प्रातःसवने अधि उपरि गायत्रं छन्दः पदमाहितं इति यत् । तथा त्रैष्टुभात् माध्यंदिनात् सवनात् त्रैष्टुभं छन्दो निरतक्षत तत्राहितमिति यत् । वा । किं च इत्यर्थः । जगति तृतीयसवने जगत् जागतं पदमाहितं इति यत् । तत् तादृशं सवनत्रयेषु छन्दस्त्रयसंस्थानं ये नरा यजमाना विदुः जानन्ति ते अमृतत्वं ज्ञानानुष्ठानद्वारेण मोक्षं आनशुः आप्नुवन्ति । अथवा गायत्रे प्रातःसवने । त्रिषु सवनेषु छन्दस्त्रयपरिमाणात् सवनान्यपि तत्तच्छन्दःशब्देनोच्यन्ते । गायत्रं प्रातःसवनं त्रैष्टुभं माध्यंदिनं सवनं जागतं तृतीयसवनम्— इति श्रुतेः । तादृशे प्रातःसवने अधि उपरि गायत्रं अष्टाक्षरात्मकमाहावप्रतिगररूपं गायत्रं पदमाहितम् । तद्यथा । होता—शोंसावोम्—इति

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

त्र्यक्षरेण आह्वयते । तथा—शंसामोदैवोम्—इति पञ्चाक्षरेणाध्वर्युः प्रतिगृह्णाति । तन्मिलित्वा अष्टाक्षरं संपद्यते । तच्चाष्टाक्षरं गायत्रीसदृशं तस्या अपि पादस्याष्टाक्षरत्वात् । इदमेकं प्रातःसवनरूपे गायत्रपदप्रतिष्ठापनम् । तथा सवनान्तेऽपि शंसनानन्तरं—उक्थं वाचि—इति होता चतुरक्षरमाह । ओं उक्थशाः—इति चतुरक्षरमध्वर्युः । तदष्टाक्षरं संपद्यते । एतदेकं परं गायत्रे गायत्रस्थापनम् । तथा त्रैष्टुभान्माध्यंदिनसवनात् त्रैष्टुभमाहावप्रतिगरणरूपं पदं निरतक्षत ऋत्विजः । तद्यथा । माध्यंदिनसवने होता—अध्वर्यो शोंसावोम्—इत्याह्वयते षडक्षरेण । अध्वर्युश्च—शंसामोदैवोम्—इति पञ्चाक्षरेण प्रतिगृह्णाति । तन्मिलित्वा एकादशाक्षरं संपद्यते । इदमेकं माध्यंदिनसवनादौ त्रैष्टुभे त्रैष्टुभाधानम् । तथा सवनान्तेऽपि शंसनानन्तरम्—उक्थं वाचि इन्द्राय—इति होता सप्ताक्षरमाह । अध्वर्युश्च—ओमुक्थशाः—इति चतुरक्षरेण प्रतिगृह्णाति । तन्मिलित्वैकादशाक्षरं संपद्यते । इदमपरं त्रैष्टुभे त्रैष्टुभस्थापनम् । तथा तृतीयसवने होता—अध्वर्यो शोंशोंसावोम्—इति सप्ताक्षरेणाह्वयते । शंसामोदैवोम्—इति पञ्चाक्षरेणाध्वर्युः प्रतिगृह्णाति । तन्मिलित्वा द्वादशाक्षरं भवति । तदिदं प्रथमं जागते जागतोत्पादनम् । तथा पश्चादपि होता शंसनानन्तरमाह—उक्थं वाचि इन्द्राय देवेभ्यः—इति । एतदेवैकादशाक्षरं भवति । अध्वर्युश्च—ओम्—इत्येकाक्षरेण प्रतिगृह्णाणि । तदुभयं मिलित्वा द्वादशाक्षरं भवति । तदिदमपरं जागते जागतपदस्थापनम् । एवं छन्दःसु त्रिषु गायत्रादिसवनेषु गायत्र्यादिछन्दस्त्रयपदप्रतिष्ठापनम् । एतत् सर्वं ऐतरेय-ब्राह्मणे देवविशः कल्पयितव्या इति खण्डे विस्पष्टमाम्नातम् । तत्तादृशं छन्दसि छन्दःस्थापनं ये इत् विदुः ये एव जानन्ति ते एव अमृतत्वमानशुः प्राप्नुवन्त्य-नुष्ठानद्वारा । एवमजानन्तः अनुष्ठानेनापि फलं न प्राप्नुवन्ति इत्यर्थः । तस्य साकल्याभावादिति भावः ॥

२३. आऽहितम्-निःऽअतक्षत-आऽहितम् अमृतऽत्वम्—इति पदपाठः ।

अथ महावाक्यविषये गायत्रीत्रिष्टुब्जगत्यः छन्दांसि सन्ति । तान्याह । गायत्रे गायत्रीछन्दसि । छन्दःसु—स्वार्थे उपसंख्यानम् । अधि अधिकं सर्वोत्कृष्टं यद्ब्रह्म आहितम् । हि गतौ । आगतं अवगतं ब्रह्म । गायत्रं ब्रह्मेत्युच्यते । संज्ञाकरणस्य

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

प्रयोजनं वक्ष्यामः। गायत्री ब्रह्मविद्या—इत्येषा विद्या समाख्यायते। गायत्री छन्दस्तु एतद्वाक्यं च—तत् सवितुर्वरेण्यम्—इत्येतदेव सम्प्रदायादवगम्यते। ब्रह्मविद्यात्वेन गायत्र्यर्थोऽभिधीयते—सवितुः लोकानां जनयितुः क्षित्यादिकं सकर्तृकं इत्याद्यनुमान-सिद्धस्य। देवस्य चेतनस्य ईशितुः इति तत्पदस्य वाच्यं रूपमुक्तम्। तत् तस्य सद्रूपम्। भर्गः भर्जनदहनप्रकाशात्मकं चिद्रूपम्। वरेण्यं वरणीयं प्रार्थनीयं सुखात्मकं आनन्दरूपम्। एवं पदत्रयेण सच्चिदानन्दात्मकमुक्तम्। इत्थं तत्पदलक्ष्यं उक्तरूपं धीमहि ध्यायामः। ध्यानकर्तारो नानारूपा उक्ता इति त्वंपदवाच्यं रूपं उक्तम्। कीदृशस्य सवितुः। यः सविता नः अस्माकं संबन्धिनीः धियः कर्तृत्वादिबुद्धीः प्रचोदयात् अपनुद्यात्—इति त्वंपदलभ्यं रूपमुक्तम्। अत्र वेदमित्र आह—

द्वाभ्यां देवस्य वाच्यं यत् त्रिभिर्लक्ष्यं निजं स्मृतम्।
जीवस्य वाच्यमेकेन चतुर्भिर्लक्ष्यमुच्यते॥

इति। पक्षान्तरे वाशब्दः। त्रैष्टुभात् त्रिष्टुप्छन्दस्कान्मन्त्रात्। त्रिष्टुभा प्रोक्तत्वात् त्रैष्टुभं ब्रह्मेत्युच्यते। निरतक्षत निष्कृष्य निर्णीतवन्तः। के। हिरण्यस्तूपाद्या आचार्याः। अत्रापि संप्रदायवशादेव मन्त्रविशेषधीः। संज्ञाकरणस्य प्रयोजनं वक्ष्यामः। त्रैष्टुभी ब्रह्म-विद्या—इत्येषा विद्या समाख्यायते। ब्रह्मविद्यात्वेन उपेदहम्—इति मन्त्रो व्याख्यायते।

उपेदहं धनदामप्रतीतं ज्जुष्टां न श्येनो वसतिं पतामि।
इन्द्रं नमस्यन्नुपमेभिरर्कैर्यः स्तोतृभ्यो हव्यो अस्ति यामन्॥

अहं जीवात्मा हिरण्यस्तूपाख्यः धनदातारं इष्टदातारं अप्रतीतं अप्रमेयं लक्ष्यं पतामि इत् प्रविशाम्येव ब्रह्म। यथा श्येनः पक्षी इतस्ततश्चरित्वा पुनर्जुष्टां स्वप्रियां वसतिं प्रविशति तद्वत्। प्रवेशमात्रे दृष्टान्तः। प्रकृते चैक्यस्य विवक्षितत्वात्। ईशप्रवेशे कारणमाह। इन्द्रमीश्वरं नमस्यन् आराधयन् अहमुपपतामि। शतृप्रत्ययः। कैः उपमेभिः अन्येषां दृष्टान्तभूतैः अत्युत्कृष्टैः अर्कैरर्चनैः। स इन्द्रः कीदृशः। य इन्द्रः स्तोतृभ्यः स्तोतॄन् तारयितुम्। हव्यः प्रार्थनीयः यज्ञभवो वा अस्ति भवति। यामन् यावत्काले। यद्वा। पक्षान्तरमिदम्। जगन्निरतक्षत। जागतं ब्रह्म। प्रायपाठात् अक्षरसाम्याच्च जगत्याः पर्यायान्तरं वा इदम्। जगति जगत्यां छन्दसि प्रतिपाद्यत्वेन आहितम्। पदं पदनीयं गम्यफलरूपम्। संज्ञाकरणस्य प्रयोजनं वक्ष्यामः। एषा विद्या जगति ब्रह्म-विद्येत्युच्यते। अत्र विशेषधीः संप्रदायविशेषादेव।

अहमिन्द्रो न परा जिग्य इद्धनं न मृत्यवेऽवतस्थे कदा चन।
सोममिन्मा सुन्वन्तो याचता वसु न मे पूरवः सख्ये रिषाथना॥

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

अहं सप्तगुर्वैकुण्ठो जीवात्मापि इन्द्र ईश्वरः परमात्मैव न पराजिग्ये इत् नैव पराजयामि। धनं गोपितं वस्तु। न चापि मृत्यवे मरणाय मृत्युदेवतायै वा अवतस्थे। अत्र—प्रकाशनस्थेयाख्ययोश्च—इति लोकेऽप्यात्मनेपदम्। समवप्रविभ्यः स्थः—इति सूत्रात्। चतुर्थीदर्शनं हि—श्लाघह्नुङ्स्थ—इति सूत्रात्। मृत्योरगोचरोऽहमित्यर्थः। कदाचन कस्मिन्नपि काले। अतश्च सोमं सुन्वन्तः यष्टारः मां ब्रह्मीभूतमीश्वरं इत् एव याचत सुरहस्यं वस्तु प्रार्थयध्वम्। किंच भोः पूरवः मनुष्याः मे मम सख्ये सखिकर्मणि पूजादानेन रिष्यथ न प्रमाद्यध्वम। अत्र त्रैष्टुभे जागते च वाक्ये श्लोकौ।

अहमीशां विशामीष्टं पदं लक्ष्यं समर्चितुम।
यो भक्तैः प्रार्थ्यते मुक्तैस्त्रिषु लोकेषु सद्गतिः॥
जीवोऽहं न परैरीश्यो न मृत्युः प्रभवेन्मयि।
मां याचत धनं सौम्या यतध्वं मम पूजने॥

इति। एवं तावद्गायत्रत्रैष्टुभजागतसंज्ञाभिर्ब्रह्मविषयास्त्रयः पक्षाः उपन्यस्ताः। तत्प्रयोजनमुत्तरत्र वदन् दीर्घतमाः स्वमतं तावदाह—ये इत् ये तु तद्ब्रह्म छन्दोभिरनुपहितं निर्गुणं तत्त्वमस्यादिवाक्यलक्ष्यं निःसंज्ञकं विदुरनुभवन्ति तेऽमृतत्वमिहैव मोक्षमानशुः अश्नुवते। यद्वा अमृतत्वं आनशुः भुञ्जते अनुभवन्ति। अश्नातेरिदं रूपं परस्मैपददर्शनात्। कल्पस्तु—

गायत्रं ब्रह्म यत्तत् सवितुरिति मनौ तन्मतं कौशिकानां
हैरण्यस्तूपकानामहमिदुपमनौ त्रैष्टुभं ब्रह्म तत् स्यात्।
यद्वैकुण्ठोऽहमिन्द्रो न इति पठितवान् जागतं ब्रह्म तत् स्या-
देते पक्षा गुणाढ्या मम तु मतमिदं तत्त्वमस्यादितो धीः॥

इति। अस्यायमर्थः। तत् सवितुर्वरेण्यं इति मनौ मन्त्रे कौशिकानां विश्वामित्राणां मते यद्ब्रह्म तद्गायत्रमित्युच्यते। हैरण्यस्तूपकानां मते ब्रह्म तु अहमिदमुपमनौ अहं इत् उप इति पदत्रयवति मन्त्रे। उपेदहमिति मन्त्रे इत्यर्थः। छन्दोभङ्गभयादेवमुक्तम्। तद्ब्रह्म त्रैष्टुभं स्यात्। तथा यद्ब्रह्म वैकुण्ठः सप्तगुः अहमिन्द्रो न पराजिग्ये इति मन्त्रे पठितवान्। वाक्ये सन्धेरैच्छिकत्वात् सन्धेरभावः। तद्ब्रह्म जागतमित्युच्यते। एते त्रयः पक्षा अपि गुणाढयाः छन्दोरूपोपाधिमन्त इति प्राप्तगुणाः। एवं च मम दीर्घतमसो मतं तु तत्त्वमस्यादिभिरेव वाक्यैर्जाता धीर्ब्रह्मविद्या इति॥

गायत्रेण प्रतिं मिमीते अर्कमर्केण साम त्रैष्टुभेन वाकम्।
वाकेनं वाकं द्विपदा चतुष्पदाक्षरेण मिमते सप्त वाणीः॥ २४॥

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

गायत्रेण गायत्रच्छन्दसा **अर्कं** अर्चनसाधनं मन्त्रं **प्रति मिमीते** प्रत्येकं परिच्छिनत्ति। अर्को मन्त्रो भवति यदेनेनार्चन्ति—इति निरुक्तम्। प्रतिमन्त्रं गायत्रेण छन्दसा उपनिबद्धं करोति। उपलक्षणमेतदन्येषां छन्दसाम्। यद्वा इतरेषां छन्दसामस्यैव चतुश्चतुरक्षराधिक्येन तत्तच्छन्दोभिः प्रतिमिमीते इत्यर्थः। यद्वा प्रतिशब्दः सं इत्येतस्मिन्नर्थे। छन्दोभिर्मन्त्रान् संमितान् करोति इत्यर्थः। **अर्केण साम** उक्तलक्षणेन मन्त्रेण साम गायत्ररथन्तरसंज्ञकं साम प्रति मिमीते। नन्वेकं साम तृचे क्रियते इति तिसृष्वेकं साम विहितम्। अतः—अर्कैः साम—इति वक्तव्यम्। कथमुच्यते—अर्केण—इति। न। वस्तुत एकं साम एकस्यामृचि आरूढम्। पश्चादन्योन्यं तदुत्तरयोर्गायति इत्यतिदेशनः प्राप्तं तिसृषु गानम्। अत एकवचनमविरुद्धम्। **त्रैस्तुभेन वाकम्।** अत्र त्रिष्टुबुपादानं इतरच्छन्दःप्रदर्शनार्थम्। अथवा अनादेशे सर्वत्र त्रिष्टुभो ग्रहणात् प्राचुर्याभिप्रायेणेदमुक्तम्। त्रैष्टुभेन द्विवार-त्रिवारावृत्तेन द्व्यृचतृचरूपं वाकं वक्तव्यमेकैकं छन्दः प्रति मिमीते। अथवा वाकं सूक्तम्। एतावद्भिस्त्रिष्टुब्भिरुपनिबद्धमिदं सूक्तमिति। तादृशेन **वाकेन वाकं** वर्गमनुवाकं वा मिमीते। कीदृशेन वाकेन इति स विशेष्यते। **द्विपदा चतुष्पदा।** द्विपदा पादद्वयबद्धविराडादिछन्दोनिबद्धमन्त्ररूपेण चतुष्पदा पादचतुष्टयोपेतेनानुष्टु-बादिमन्त्ररूपेण इति। इयतीभिर्द्विपदाभिरुपेतो वर्गः इयतीभिश्चतुष्पदाभिरुपेतो वर्गः। इयद्द्विपदरूपैर्वाकैः इयच्चतुष्पदरूपैर्वाकैश्च परिमितोऽनुवाकः इति। सूक्त-पक्षे एतावद्भिः सूक्तैरयमनुवाकः इति। किंच **अक्षरेण** अक्षरेणैव **सप्त वाणीः** वागधिष्ठितानि सप्त छन्दांसि **मिमते** निर्माणं कुर्वन्ति। अष्टाक्षरा गायत्री एका-दशाक्षरा त्रिष्टुप् द्वादशाक्षरा जगती इति। अक्षरैः पादाः परिमीयन्ते। तत्परि मितैः पादैः छन्दांसि। ततः पादानां छन्दसां च अक्षरं मूलं इति। तथा ऋग्वर्गसूक्तानुवाकादीनां च अक्षरं मूलं इत्यक्षरप्रशंसा॥

२४. द्विऽपदा-चतुःपदा—इति पदपाठः।

अत्र गायत्रत्रैष्टुभजागतसंज्ञाकरणप्रयोजनोक्तिः। तत्रापि सगुणे ब्रह्मणि अहंग्रहणो-पास्यमाने फलं यादृशं तदुक्तम्—ये अर्वाञ्चः—इत्यत्र। अत्र तु गायत्रादिभिर्गुणैः सगुणे ब्रह्मणि अहंग्रहणोपास्यमाने फलविशेषः प्रतिप्रदर्श्यते। गायत्रेण गायत्रसंज्ञकेनो-

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

पासितेन ब्रह्मणा अर्कं सूर्यं प्रतिमिमीते गच्छति। धातूनामनेकार्थत्वात्। तदनन्तरं अर्केण प्रयोजकेन साम सामाभिमानिनीं देवतां सालोक्येन गच्छति। ततो ब्रह्मलोकक्रमेण मुक्तिर्वक्ष्यते। त्रैष्टुभेन त्रैष्टुभसंज्ञकेनोपासितेन ब्रह्मणा वाकं वागभिमानिनीं देवतां प्रतिमिमीते। वचेर्वञि कुत्वे मत्मर्थे अच्। तेन वाकेन प्रयोजकेन वाकं महावाक्यं उपनिषदभिमानिनीं देवतां प्रतिमिमीते। ततो ब्रह्मलोकक्रमेण मुक्तिर्वक्ष्यते। त्रैष्टुभशब्दे— उत्सादिभ्योऽञ्। अथ क्रमप्राप्तं जागतं ब्रह्म त्यक्त्वा त्रैष्टुभब्रह्मणा तुल्यफलत्वात् प्रासङ्गिकविद्यात्रयमेकफलमाह। द्विपदा द्विपदामन्त्रेण प्रतिपाद्यं ब्रह्म। द्विपदा त्वेषा द्विपदी ब्रह्मविद्या। द्विपदा ब्रह्मणा उपासितेन वाकं प्राप्य तेन प्रयोजकेन वाकमुपनिषद्देवतां प्रतिमिमीते। उपासकसंप्रदायप्राप्तं द्वैपदं वाक्यमुदाहरिष्यामः। द्वित्रिभ्यां पाद्दन्मूर्धसु बहुव्रीहौ—इत्युत्तरपदाद्युदात्तत्वम्। चतुष्पदा इत्यत्र बहुव्रीहिस्वरः। चतुष्पदा अनुष्टुभा बृहत्या च प्रतिपाद्यं ब्रह्म सामान्यसंज्ञया चतुष्पात्। विशेषसंज्ञया आनुष्टुभी बार्हती चोच्यते। चतुष्पदा ब्रह्मणा उपासितेन वाकं प्रतिमिमीते उपासकः। अत्र संप्रदायप्राप्तानि द्वैपदानुष्टुभबार्हतानि उदाह्रियन्ते। तत्र द्वैपदं पराशर आह—

आदित्ते विश्वे क्रतुं जुषन्त शुष्काद्यद्देव जीवो जनिष्ठाः।

इति। यदा ते तव परमात्मनोऽग्रे क्रतुं प्रज्ञानं सम्यग्ज्ञानं जुषन्ते सेवन्ते आश्रयन्ते आदित् तदैव विश्वे सर्वात्मका मुक्ता भवन्ति। यदा तु शुष्कात् क्रतोर्नीरसात् अहंग्रहणशून्यात् सगुणज्ञानात् भो देव जीवो जनिष्ठाः जीवात्मा जायते इति। अथ आनुष्टुभम्—

आपो अद्यान्वचारिषं रसेन समगस्मसि।
पयस्वानग्न आ गहि तं मा सं सृज वर्चसा॥

इति। भो आपः उदकाभिमानिन्यो देवताः इदं शृणुत। अद्य अस्मिन्नहनि अन्वचारिषं अनुचरो जातोऽस्मि एतावन्तं कालम्। किमर्थम्। रसेन पारमार्थिकेन रूपेण ब्रह्मणा समगस्मसि संगतो भवानि इति धिया। रसो वै सः। रसं ह्येवायं लब्ध्वानन्दी भवति—इति श्रुतेः। अतश्च पयस्वान् उदकमध्यवर्ती त्वं च भो अग्ने अग्रणीः परमात्मन् आगहि आगच्छ। आगत्य च तं प्रागुक्तकारणवन्तं सेवमानं त्वदभिन्नात्मकं वर्चसा तेजसा स्वस्वरूपेण संसृज संयोजय इत्याशास्महे। अथ बार्हतं ब्रह्म उच्यते। तत्र प्रगाथ आह—

मा चिदन्यद्वि शंसत सखायो मा रिषण्यत।
इन्द्रमित् स्तोता वृषणं सचा सुते मुहुरुक्था च शंसत॥

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

इति । परमात्मनोऽन्यद्वस्तु मा चित् मैव विशंसत विशेषेण सत्यमित्यवोचत । अन्यशंसने संसारः स्यादित्याह । भोः सखायः मा मैव रिषण्यत रेषं पुनः पुनर्हिंसनं मैत । रिषण इति कण्ड्वादौ पठन्ति । किंतु इन्द्रमित् इन्द्रमेव स्तोता भजत । वृषणं मनोरथवर्षकं सचा सह भवत च । सुते यज्ञे मुहुः पुनः पुनश्च उक्थानि श्रेष्ठानि वचांसि शंसत ब्रूत । गायत्रादिषु सगुणब्रह्मप्रतिपादकेषु महावाक्येष्वनुगतः यः प्रणवः तमाश्रित्य अपरा अस्ति ब्रह्मविद्या इति ब्रह्मवित्प्रसक्तानुप्रसक्त्या तामप्याह अक्षरेणेति । अक्षरमिति यत्तत्प्रतिपाद्यब्रह्मापि अक्षरमुच्यते । अक्षरसंज्ञकेन उपासितेन ब्रह्मणा मिमते गच्छन्ति सप्तसंख्याका वाणीः छन्दोरूपवागभिमानिनीर्देवताः । प्रणवार्थस्तु अकारो-कारमकाराः तत्त्वमसिपदार्थान् आहुः । एभिस्तु राजससात्त्विकतामसं ब्रह्मविष्णुरुद्रात्मकं क्रमेण परमात्मनो रूपमुच्यते जाग्रत्स्वप्नसुषुप्त्यवस्था वा भूर्भुवःस्वर्लोका वा ऋग्यजुः-सामानि वा । ओं इति पदेन तुरीयं निर्गुणं स्वरूपमुच्यते । तस्मादोंकारशरीरो भगवान् समुदायात्मकेन । ओंकारो जपसमाधिभ्यां साक्षात्करणीय इति । एषा विद्या अक्षर-ब्रह्मविद्येत्युच्यते । कल्पस्तु—

गायत्रवाग्यज्ञ इयर्ति सूर्यं सूर्येण सामाथ स याति वाकम् ।
यस्त्रैष्टुभे ब्रह्मणि धीसमेतो वाकेन वाकाख्यमुपैति देवम् ॥
इदमेव फलं याति द्विपदानुष्टुभेन च ।
ब्रह्मणा बार्हतेनापि प्रसङ्गादुदितं त्रयम् ॥
आदित्ते विश्व इत्याह शक्तिपुत्रः पराशरः ।
आपो अद्येति चाह स्म सिन्धुद्वीपः स्वकं मनुम् ॥
मा चिदन्यदिति प्राह प्रगाथो बार्हतीं गिरम् ।
अक्षरेणेति सत् प्रापि छन्दोहंकारिदेवता ॥
प्रसक्तानुप्रसक्त्येतदुदितं प्रणवाश्रयम् ।
क्रमेण ब्रह्मसंप्राप्तिर्गायत्रादिषु वक्ष्यते ॥

इति—गायत्रेण प्रति—इति मन्त्रस्य कल्पे पञ्चश्लोकाः सन्ति ॥

जगता सिन्धुं दिव्यस्तभायद्रथन्तरे सूर्यं पर्यपश्यत् ।
गायत्रस्य समिधस्तिस्र आहुस्ततो मह्ना प्र रिरिचे महित्वा ॥ २९ ॥

जगतीच्छन्दस्कायामृचि उत्पन्नं साम जगत् । तेन **जगता** ब्रह्मा सृष्टिकाले **सिन्धुं** स्यन्दनशीलं उदकस्य स्यन्दकं वा आदित्यं **दिवि** द्युलोके **अस्तभायत्**

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

स्तम्भितवान् । जागतो वा एष य एष तपति—इति श्रुतिः । **र॒थ॒न्त॒रे** एतन्नामके साम्नि स्तम्भितं **सूर्यं॒ परि॑ अ॒प॒श्य॒त॒** परिदृष्टवान् प्रजापतिः । तदाधारभूतायामृचि—स्वर्दृशम्—इति सूर्यप्रतिपादकशब्ददर्शनात् । असौ वाव स्वर्दृक्—इति हि श्रुतिः । अत एव तत्र सूर्यदर्शनं विधीयते—रथन्तरे प्रस्तूयमाने संमीलयेत् स्वर्दृशं प्रति वीक्षेत—इति सामब्राह्मणेन । **गा॒य॒त्रस्यं॑** गायत्र्यामुत्पन्नस्य साम्नः **स॒मिधः॑** समिन्धनाः **ति॒स्रः** विभक्तीः **आ॒हुः** । पादत्रयमाहुः इत्यर्थः । अथवा तिस्र ऋच आहुः । **ततः॑** हेतोः **म॒ह्ना** बलेन **म॒हि॒त्वा** महत्त्वेन **प्र रि॑रि॒चे** परिच्यते । अन्यानि सामानि पृथक्पृथक् निर्मितवान् । यद्वा गायत्रशब्दः छन्दोवाची तस्य तिस्रो मूर्तीराहुः क्रमेणाष्टाक्षरैकादशाक्षरद्वादशाक्षरैः गायत्रीत्रिष्टुब्जगत्यात्मिकाः । यस्मादेवं ततः तस्मात् गायत्री छन्दसां कनिष्ठा सती मह्ना बलेन महत्वेन च प्ररिरिचे सर्वाणि छन्दांसि अतिक्रामति येनैव बलेन सोममाहृतवती तादृशेनैवं भवति ॥

२५. र॒थ॒म्ऽत॒रे-सं॒ऽइधः॑-म॒हि॒ऽत्वा इति पदपाठः ।

प्रकृतमवशिष्टं जागतं ब्रह्माधिकृत्योच्यते । जगता जागतेनोपासितेन ब्रह्मणा सिन्धुं समुद्राभिमानिनीं देवतं दिवि स्वर्लोके अस्तभायत् वशीकरोति । द्युस्थानप्रसङ्गाद्वियान्तरमाह । रथन्तरे रथन्तरसामप्रतिपाद्यं यत् ब्रह्म तत् रथन्तरसाम । प्रतिपाद्यत्वं सामाभिव्यङ्ग्यत्वमात्रम् । साम्नं वर्णपदवाक्यात्मकत्वाभावात् । रथन्तरे ब्रह्मणि उपासिते सति सूर्यं वशीकृतं परितः पश्यति । रथन्तरसामानि तु अस इत्यन्तवन्ति । छन्दःसामानि तु—अभि त्वा शूर नोनुमः । रहस्यग्रन्थे तु—आ एना वोऽग्निम् । छन्दसि तु—एना वो अग्निं नमसा—इति । प्रत्यु अदर्श्यायवाम् । आ इमा उ वाम् । छन्दसि तु—इमा उ वां दिविष्टयः । अत्र—गीतिषु सामाख्या—इति वचनात् गीतिमात्रस्य सामत्वं निराधारगीत्यसंभवात् आधारत्वमात्रमृचाम् । न च गीत्यर्थे ब्रह्मणापि वक्तुं शक्यः । अतः ऋग्द्वारेणोपयोगो गीतेः । अतः छन्दसि ग्रन्थे पठितानामेव ऋचामर्थः कथनीयः न साम्नाम् । अतो रथन्तरसामार्थो नोच्यते । अत एव साम्नां महाकल्पे उक्तम्—

साम्नां नार्थोऽस्ति बह्वेत्र सामर्थ्यं तेषु विद्यते ।
सर्ववेदोत्तमं साम तत्रान्ये अंशभाजिनः ॥

इति । अथ गायत्र्यादीनां रथन्तरान्तानां विद्यानां महाफलमाह । गायत्रस्य अजहल्लक्षणया गायत्रादेः सप्तकस्य गणस्य गायत्रत्रैष्टुभजागतद्वैपदानुष्टुभबार्हतरथन्तराख्यानां

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

विद्यानाम्। समिधः फलाभिव्यञ्जकास्तिस्रो मूर्तयो भवन्ति। अयमर्थः। गायत्र्याद्युपासकानां ब्रह्मा वा विष्णुर्वा शिवो वा अवान्तरफलभोगानन्तरं अर्चिरादिमार्गेण स्वकान् लोकान् नयन्ति। तत्र ते तदुपासकानां तारतम्येन तेभ्यः फलविशेषान् ददति। ब्रह्मादयस्त्रयोऽपि सगुणं ब्रह्म इत्युच्यते। तेषां लोको ब्रह्मलोक इत्येवोच्यते। आह च योगयज्ञावल्क्यः—

अहंग्रहेण सगुणब्रह्मणः सेवकान् नरान्।
सगुणब्रह्मसंज्ञा ये ब्रह्मद्यास्ते स्वकं पदम्॥
ब्रह्मलोकाख्यमानाय्य नन्दयन्ति यथायथम्।
लयकाले तु तैः सार्धं मुच्यन्ते भावितात्मभिः॥

इति। ततो ब्रह्मलोकभोगानन्तरं मह्ना महता विष्ण्वादिना सगुणेन ब्रह्मणा सह तदुपदिष्टसगुणोपासनं श्रुत्वा क्षणमवधार्य प्ररिरिचे प्रकर्षेण प्रपञ्चात् पृथग्भवन्ति महित्वा महत्त्वेन मुक्तत्वेन हेतुना। तदुक्तं ब्रह्मपुराणे—

ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसञ्चरे।
परस्यान्ते यतात्मानः प्रविशन्ति परं पदम्॥

इति। वाचस्पतिनाप्युक्तम्—

विद्याकर्मस्वनुष्ठानैस्तोषितेश्वरचोदिताः।
अधिकारं समाप्यैतत् प्रविशन्ति परं पदम्॥

इति। कल्पस्तु—

यो जागतं वेद स सिन्धुलोकं रथन्तरज्ञः परिसूर्यदर्शी।
ब्रह्मादयस्तान् स्वपदं नयन्ति ते तैः सहान्तेऽश्नुवते निजं स्वम्॥

इति॥

प्रवर्ग्यो घर्मधुगाह्वानकाले—उपह्वये—इत्यादिके द्वे ऋचौ। उपह्वये सुदुघां धेनुमेतां इति द्वे—इति सूत्रितत्वात्।

उप॑ ह्वये सु॒दुघां॑ धे॒नुमे॒तां सु॒हस्तो॑ गो॒धुगु॒त दो॑हदेनाम्।
श्रेष्ठं॑ स॒वं स॑वि॒ता सा॑विषन्नो॒ऽभीद्धो॑ घ॒र्मस्तदु॒ षु प्र वो॑चम्॥ २६॥

अहं होता उप॑ ह्वये उपेत्य आह्वयामि। किम्। एतां धेनुं आगच्छन्तीं क्षीरेण प्रीणयित्रीं गां प्रवर्ग्यार्थाम्। पुनः कीदृशीम्। सुदुघां सुष्ठु दोग्ध्रीम्।

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

उत अपि च **एनां** उक्तलक्षणां गां **सुहस्तः** शोभनहस्तः दोहनकुशलः । **गोधुक्** गोदोग्धा अध्वर्युः **दोहत्** दोग्धि । यस्मादेवं तस्मादुपह्वये इत्यर्थः । तदर्थं **सविता** सर्वस्यानुज्ञाता परमेश्वरः **नः** अस्मदीयं **श्रेष्ठं** प्रशस्यं **सवं** सोमयागं क्षीरं वा **साविषत्** अनुजानातु । कथमेवम् । तच्छब्दश्रुतेर्यच्छब्दाध्याहारः । यत् यस्मात् **घर्मः** प्रवर्ग्यः । यद्घ्रूँ इत्यपतत् तद्घर्मस्य घर्मत्वम्—इति तैत्तिरीयकम् । तादृशः **अभीद्धः** अभिदीप्तः । **तत् उ** । उशब्द एवकारार्थः । तस्मादेव कारणात् **सु प्र वोचं** सुष्ठु प्रवीमि इति । यद्वा एतां पुरतो दृश्यमानां धेनुं वृष्ट्या प्रीणयित्रीं मेघलक्षणां धेनुं उपह्वये आह्वयामि वर्षदोहाय । किंच एनां धेनुं सुहस्तः शोभन-दोहनकुशलहस्तोपेतो गोधुक् गोदोग्धा आदित्यो वायुर्वा दोहत् दोग्धि । तदधीनत्वा-द्वर्षणस्य । किंच तदर्थं सविता प्रेरकः परमेश्वरः नः अस्मदर्थं अस्मदुपभोगादृष्टमपेक्ष्य साविषत् अनुजानातु । प्रतिबन्धं मा करोतु इत्यर्थः । किमिति इदमुच्यते इति । उच्यते । घर्मो ग्रीष्मः अवर्षणजनितः सस्यशोषः । अभीद्धः प्रवृद्धः । तदुषु प्रवोचं तस्मादेव कारणात् ब्रवीमि । ब्रवीतेर्लुङि वच्यादेशे—अस्यतिवक्ति—इत्यादिना च्लेरङ् । छान्दसः अडभावः ॥

२६. सुऽदुघाम्-सुऽहस्तः-गोऽधुक्-अभिऽईद्धः-ऊं इति—इति पदपाठः ।

वैश्वामित्रहैरण्यस्तूपसाप्तगवपाराशरसैन्धुद्वीपप्रागाथराथन्तराः सप्त पक्षा उक्ताः । य इत्तद्विदुः इति स्वमतमुक्तम् । शास्त्रान्तरे च अन्येऽपि पक्षाः सन्ति । तेषां परस्परवि-रुद्धानां मध्ये कः पक्षो ज्यायान् । तत्रोत्तरम् । उप उपग्राह्यत्वेन ह्वये स्वीकरोमि । सुदुघां सुष्ठु दोहिकां शुभकर्मभिर्व्यासादिभिः सूत्रप्रणयनेन दुह्यमानत्वात् । न वैशेषिकादिमतानुसारिभिः । दुहः कप् घश्च । धेनुं कामधेनुस्थानीयाम् । धिनोति प्रीणयति इति धेनुः । ताम् । आपो वाव धेनवः । ता हि इदं सर्वं धिन्वन्ति इति । एतां प्रसिद्धां प्रकृतां च अध्यात्मपरां श्रुतिम् । ननु श्रुतिव्याख्यानरूपाणामपि दुर्बोधत्वात् सूत्रव्याख्यातश्रुत्यर्थो दुर्बोध एव । तत्राह—उत तथा एनां प्रकृतां श्रुतिं दोहत् दोग्धि । कः । गोधुक् व्याससूत्राणां भाष्यकरणद्वारा सूत्रवाचां दोग्धा । सूत्रवाक्यतात्पर्यविवेचक एव श्रुतिं दोग्धि । तात्पर्यकथनेन श्रुत्यर्थसारं कथयति । न च भेदमाश्रित्य व्याससूत्र-भाष्यकारादिमतं इह ग्राह्यं इत्याह—सुहस्तः सुखहस्तः सुखकरः शङ्कराचार्यः । स गोधुक् सूत्रवाचां तात्पर्यज्ञः भाष्यकारो व्यासादिसूत्रव्याख्यानद्वारा यथा गां श्रुतिं

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

दोग्धि तथैव । तदर्थो नान्यार्थ इत्यर्थः । यद्वा उत एव । स एव दोहद्दोग्धा एनां उपनिषदम् । न च शङ्कराचार्यो मर्त्यमात्रं इत्यत आह—श्रेष्ठं अज्ञानलक्षणस्य अन्तस्तमसो हन्ता । सवं जन्म । सविता साविषत् आसादितवान् नः अस्मदर्थम् । नृशब्दसंबुद्धिरेषा इति केचित् । तत्र सवितापि जीवमात्रं इत्यत आह—अभीद्ध इति । अध्यात्मप्रकाशितः । घर्मः । घृ क्षरणदीप्त्योः । विगलिताविद्यः परमात्मैवात्र सूर्यपदेन विवक्षितः । महापुरुष इति यमवोचाम—इत्यारभ्य खण्डसमाप्तिपर्यन्तं एतां अनुविद्यासहितां इत्यनेनोपनिषद्वाक्येन अयमर्थः स्फुटमुक्तः । ननु अध्यात्मप्रकरणे शङ्कराचार्योत्पत्तिनिरूपणं व्यर्थम् । तत्राह—तदु तद्वाच्यं ब्रह्मैव सु सुष्ठु असंशयं प्र प्रकर्षेण अविपर्ययेण अवोचं उक्तवानस्मि । अत्र शिवपुराणे वाराणसीमाहात्म्ये लगुडेश्वरोपाख्याने कणादाद्युत्पत्तिनिरूपणावसरे नारदं प्रति सनत्कुमारवचनम्—

कृते ज्ञानप्रदः सत्यस्त्रेतायां दत्त एव तु ।
द्वापरे व्यासनामा तु कलौ शङ्करनामधृक् ॥
सत्यः सुमेधसो ब्रह्मा पुत्रभावमुपागतः ।
अत्रेर्दत्तः शक्तिपुत्रस्ततो व्यासः प्रकीर्तितः ॥
विष्णुतेजःसुतः साक्षाच्छङ्करः परिकीर्तितः ।
सत्यो ब्रह्मा हरिर्दत्तो व्यासो रुद्रः प्रकीर्तितः ॥
शङ्करः सविता साक्षादीश्वरः सर्वदैवतम् ।
युगे युगे प्रनष्टस्य शास्त्रस्योद्धारणाय वै ॥
श्रुतिस्मृत्यर्थबोधाय पाखण्डनिधनाय च ।
अध्यात्मशास्त्रविज्ञप्त्यै लोकानुग्रहकारणात् ॥
सुराद्यभ्यर्थितो देव ईश्वरः परमेश्वरः ।
अवतारांश्चकारासौ श्रुतिस्मृत्युदितान् स्वकान् ॥

इति कल्पस्तु—

प्रामाणिकः श्रुत्युदितः स योऽर्थो
 व्यासोक्तरीत्या प्रतिपादितश्च ।
व्यासोदितं शङ्करबोधितं च
 यः शङ्करोऽसौ सविता स ईशः ॥
व्याकुर्वन् व्याससूत्रार्थं श्रुत्यर्थांश्च यथोचितान् ।
श्रुत्यर्थो यस्तथैवासौ शङ्करः सविता ततः ॥

इति ॥

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

हि॒ङ्कृ॒ण्व॒ती व॑सु॒पत्नी॒ वसू॑नां व॒त्सम॒िच्छन्ती॒ मन॑सा॒भ्यागा॑त् ।
दु॒हाम॒श्विभ्यां॒ पयो॑ अ॒घ्न्येयं सा व॑र्धतां मह॒ते सौभ॑गाय ।। २७ ।।

यथाहूता गौः **हि॒ङ्कृ॒ण्व॒ती** वत्सं प्रति हिङ्कारं कुर्वती **वसू॑नां व॒सु॒पत्नीं** क्षीरदध्याज्यादिबहुधनानां सर्वदा पालयित्री । वृत्त्यवृत्तिभ्यां वसुनः पालयितृत्वम् । तस्यैवाधिक्यं च प्रतिपाद्यते । पुनः कीदृशी । **मन॑सा व॒त्सं इ॒च्छन्तीं** । ईदृशी सा **अ॒भि आ अ॒गा॒त्** अभ्यागमत् । **इ॒यं** आगता **अ॒घ्न्या** । गोनामैतत् । अहननीया गौः । **अ॒श्विभ्यां** ताभ्यां अथाय । **पयः** क्षीरम् । **दु॒हां** दुग्धाम् । **सा** तादृशी **म॒ह॒ते** सौभगाय प्रवृद्धाय सौभाग्याय । **व॒र्ध॒तां** प्रवृद्धा भवतु । यद्वा अस्मै सौभगाय क्षीरं वर्धयताम् । अत्रापि वृष्टिपरत्वेन यथायोगं योग्यम् । हिङ्कृण्वती वर्षणाय शब्दयन्ती वसूनां गोसस्यादिधनानां बहूनां वसुपत्नी तेषामेव पालयित्री वत्सं लोकं वत्सवत् पोषणीयं मनसा इच्छन्ती प्रीणयितुमभ्यागात् अभ्यागच्छति मेघरूपा । सा च अघ्न्या अहन्तव्या । प्रस्तुता इत्यर्थः । पयः उदकं अश्विभ्यां व्याप्ताभ्यां स्थावरजङ्गमाभ्यामर्थाय । यद्वा अश्विनौ वाय्वादित्यौ । ताभ्यां सकाशात् दुहां दुग्धाम् । तौ हि वृष्टेर्मोचयितारौ । शिष्टमविशिष्टम् ।।

२७. हि॒ङ्ऽकृ॒ण्व॒ती-व॒सु॒ऽप॒त्नीं-अ॒श्विऽभ्याम्—इति पदपाठः ।

श्रीशङ्कराचार्यव्याख्यायां ब्रह्मविद्यैव निष्कृष्यते इत्याह—वसुपत्नी ब्रह्मविद्या । वसू देवौ जीवपरमात्मानौ वसनौ छादनशीलौ पती ईशौ विषयत्वेन पतनीयौ ज्ञापनीयौ यस्याः सा वसुपत्नी जीवपरावेकत्वेन प्रकाशयन्ती । विभाषा सपूर्वस्य—इति ङीष् । नकारश्चान्तादेशः । पुनः कीदृशी । वसूनां वत्समिच्छन्ती । वसुः इति रश्मिनाम देवतानाम च । वामदेवादीनामंशानां देवतात्वेन भावितात्मनां ब्रह्मविद्याचार्याणां वत्सं पुत्रं भावितं शिष्यं इच्छन्ती ममायमस्तु इति काङ्क्षन्ती । अत्राह वेदमित्रः—

ईशत्वेनैव योगेन भावितोऽस्य गुरुः स हि ।
पुत्रस्य भावं प्राप्तो यः स च शिष्यस्तु संप्रति ।।

इति । हिङ्कृण्वन्ती । हि गतौ वृद्धौ च । हि प्रसिद्धं गतं अनुभवसिद्धं च देशकालानवच्छिन्नं सर्वशास्त्रप्रसिद्धं च ज्ञानं यस्य तत् ब्रह्म हिङ् ।

पञ्चमा ज्ञानवाचकाः ।

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

इत्येकाक्षरनिघण्टुः । ब्रह्मैव हिङ्कारः—इति श्रुतिः । तं वत्सं हिङ्कृण्वती ब्रह्म कुर्वन्ती ब्रह्मभावं नयन्ती । लक्षणहेत्वोः क्रियायाः—इति शतृप्रत्ययः । मनसा । मन निर्वचनकर्मा । मननेन गुरुवचनेन अभि आगात् अभ्यागच्छति । अत्यादरादेव निश्चितार्था भवति इति शिष्यस्य आत्मसात् भवति । श्रद्धया हृति स्थिरा भवति । सा पुनर्विद्या वेदान्तविचारादेव निश्चितार्था भवति इत्याह—दुहां अश्विभ्यां पयः । दुहां दुह्यते परमानन्दाख्यं पयः । अश्विभ्यां इन्द्रियाभ्यां गुरुशिष्याभ्याम् । द्विकर्मको दुहिः । कर्मणि प्रत्ययः द्वितीया छान्दसी । पयः ब्रह्म अमृतं क्षीरं च । अध्न्या । गोनामैतत् । गौश्चात्र श्रुतिः । अघं नयन्ती अहन्तव्या नित्या पापहन्त्री इयं उपनिषल्लक्षणा महावाक्यलक्षणा सा वर्धतां दीर्घा भवताम् । असकृदावर्तमाना दीर्घकालमनुवर्तते । आवृत्त्यवधिमाह—महते सौभगाय महानन्दाय महानन्दमनुसर्तुम् । यावदानन्दाविर्भावस्तावत् इत्यर्थः । सुभगान्मन्त्रे—इत्यञ् । कल्पस्तु—

आचार्यः शिवभावितो निजसुतस्थानी तु शिष्यो मतो
जीवेशौ विषयीकरोति निजसाद्भूतात्मविद्या यथा ।
शिष्यं ब्रह्म करोति सा श्रुतिमयी जीवेन दोह्या मति-
र्वर्त्या सानलसैर्नरैर्निजसुखप्रादुर्भवः सोऽवधिः ॥

इति ॥

प्रवर्ग्येऽभिष्टवे दोहनसमये वत्से मातुः सकाशादपनीयमाने—गौरमीमेत्—इत्येषा । सूत्रितं च—गौरमीमेदनु वत्सं मिषन्तं नमसेदुप सीदत—इति ।

गौर॑मीमे॒दनु॑ व॒त्सं मि॒षन्तं॑ मू॒र्धानं॒ हिङ्ङ॑कृणो॒न्मात॒वा उ॑ ।
सृक्वा॑णं घ॒र्मम॒भि वा॑वशा॒ना मिमा॑ति मा॒युं पय॑ते॒ पयो॑भिः ॥ २८ ॥

गौः धेनुः **मि॒षन्तं॑** निमीलिताक्षं **व॒त्सं अनु॑** प्राप्य **अ॒मी॒मे॒त्** शब्दं करोति । मीमयतिः शब्दकर्मा । यद्वा उक्तं वत्समनु आत्मानं प्रक्षिपति । किंच तस्य वत्सस्य **मू॒र्धानं॑ मा॒त॒वै** मातुं निर्मातुं लेहनेन शोधयितुम् । **उ**शब्दोऽवधारणे । **हिङ् अ॒कृ॒णो॒त्** हिङ्कारमकरोत् करोति । किं च **सृ॒क्वा॑णं** वत्सस्य वदनप्रान्तं फेनस्य स्रष्टारं **घ॒र्मं** क्षीरस्य क्षरणशीलं वत्सं **अ॒भि** अभिलक्ष्य **वा॒व॒शा॒ना** भृशं कामयमाना । **मा॒युं** शब्दं **मिमा॑ति** निर्माति करोति । तादृशी सती **पयो॑भिः** प्रभूतैः क्षीरैः **पय॑ते** प्यायते आप्यायनं करोति वत्सम् । अत्रापि मेघपरतया

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

योजनीयम् । एवमाहूता मेघरूपा गौः धेनुः मिषन्तं वृष्टिरूपक्षीराभावेन निमीलिताक्षं लोकाख्यं पुत्रमनु अनुसृत्य अमीमेत् गर्जनशब्दं वर्षणचिह्नरूपं करोति । मूर्धस्थानीयां भूमिं मातवै उ निर्मातुमेव सस्यादियुक्तां कर्तुं हिङ्ङकृणोत् हिङ्कार-रूपं शब्दमकरोत् । प्रतिपादनभेदादपुनरुक्तिः । किंच सृक्वाणं फलस्य स्रष्टारं घर्मं दीप्तं पुत्रमभि वावशाना आभिमुख्येन कामयमाना पयोभिरुदकैः पयते प्यायते आप्यायनं करोति ॥

२८. ॐ इति॑-पय॑ः॒ऽभिः—इति पदपाठः ।

उपह्वये—इत्यादयश्चत्वारो मन्त्रा भारद्वाजीये सूत्रे वाश्यमानधेन्वनुमन्त्रणे विनियुक्ताः । तथापि तद्विनियोजकः अधियज्ञविषयः । अस्मद्व्याख्या तु अध्यात्म-विषया । इत्युक्तं प्रागेव । इदानीं ब्रह्मविद्याप्रचुरश्रुतेः प्रवृत्तिविशेषानाह—गौः श्रुतिः अमीमेत् द्रमहममीमगतौ । रूपसिद्धिश्छादसी । पालयते वत्सं पुत्रभावमापन्नं शिष्यं ब्रह्मविद्यायामुपदिष्टम् । मिषन्तम् । मिष दर्शने । पश्यन्तम् । सर्वदा ज्ञानमारूढम् । अनु उपलक्षयित्वा । अनेन आरूढभावं प्रतिपन्ने शिष्ये प्रवृत्तिर्दर्शिता । अथ तदधरमनु-भाविनं प्रति आह—हिङ् ब्रह्म । इदमुक्तं पूर्वमन्त्रे । मातवै उ । तवै चान्तश्च युगपत् —इति युगपदुदात्तद्वयम् । अन्तर्भावितोऽत्र ण्यर्थः । मापयितुम् । ज्ञापयितुमेव पूर्वोक्तं वत्सम् । मूर्धानं मुख्यं प्रवर्तकं श्रुतौ स्मृतौ चोपदेष्टारं अज्ञानहिंसकं अकृणोत् करोति । कृवि हिंसायाम् । अनुभवी तु लोकहितकर्ता आत्मानं परं च संसारादुद्धरति । स हि— ब्रह्म तत्त्वमसि—इति बोधयति शिष्यम् । अथ तदधरमभ्यसिनं प्रति आह—सृक्वाणम् । सृजेः क्वनिपि कुः— इति भोजः । सृक्वा वदनैकदेशः । चर्वणाधारः इति भट्टभास्कर-मिश्र आह । लेलिहान इत्यपरे । सृक्वाणं प्रयतमानं इत्यर्थः । धर्मं अभ्यस्यन्तं अभ्य-सिनं अभि लक्षयित्वा वावशाना स्निह्यतो हितकारिणी श्रुतिः अभ्यासकालवर्जं मिमाति प्रतिपादयति धर्मज्ञं धर्मं नित्यनैमित्तिकात्मकम् । अथ तदधरं मुमुक्षुं प्रति आह—मां प्रामां प्रमितिमात्मने इच्छन्तं वत्सं जिज्ञासुं मुमुक्षुं पयते । अय पय गतौ । गत्यर्थाः ज्ञानार्थाः । अन्तर्भावितण्यर्थः । बोधयति पयोभिः गमकैर्हेतुभिः विचारैः । पयते इत्यत्र एकवाक्ये इति प्रकृत्य युष्मदस्मदादेशा वक्तव्याः—इति वार्तिककारवचनात् निघातः । अत्रारूढानां लक्षणानि श्रीशङ्कराचार्यशिष्यद्रमिडस्वामिना उक्तानि—

अप्रसक्तसमाधिस्थदेहमात्रस्थितिक्रियः ।
आरूढः स्यात् परानन्दी काललीलाक्रियोचितः ॥

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

समाधावपरोक्षात्मविज्ञानानुभवो भवेत् ।
समाधिविद्भिः प्रारब्धेतरकर्माकरा इति ॥

तथा—

वाक्यैः संवाद्य सच्छास्त्राण्यभ्यसन् स्वपरोक्षधीः ।
वर्ततेऽभ्यासकाले तु त्यजन् कर्म सदा त्वयम् ॥
मुमुक्षुर्मोक्षकामी च स्वक्रियौवं सकृत् त्यजेत् ।
साधनाल्पमहत्त्वेन मुमुक्षुस्तारतम्यतः ॥

इति । कल्पस्तु—

नारूढे विधिरस्ति संविदधिके कर्मावकाशोज्झिते
लोके चानुभवी प्रवर्तकतया श्रुत्या प्रथां प्रापितः ।
अभ्यासी निगमोदितेषु रमते त्वभ्यासकालं विना
मोक्षेच्छुर्विहिताः क्रियाः प्रकुरुते काम्यां निषिद्धां विना ॥

इति ॥

अयं स शिङ्क्ते येन गौरभीवृता मिमाति मायुं ध्वसनावधि श्रिता ।
सा चित्तिभिर्नि हि चकार मर्त्यं विद्युद्भवन्ती प्रति वव्रिमौहत ॥ २९ ॥

सः अयं वत्सः **शिङ्क्ते** अव्यक्तध्वनिं करोति । **येन** वत्सेन **गौः** माता **अभीवृता** आगत्य अभितो वेष्टिता भवति । किंच सा गौः **मायुं** शब्दं **मिमाति** निर्मिमाति । कुत्र स्थिता । **ध्वसनौ अधि श्रिता** ध्वसनस्थाने गवां निवासाश्रये अधिष्ठिता । **सा** तादृशी **चित्तिभिः** ज्ञानैः तत्पूर्वकैः कर्मभिर्वा **मर्त्यं नि चकार हि** नीचैः करोति । ज्ञानविशिष्टा मनुष्या यथा बालकस्य आह्वानस्तनपानादिस्नेहं कुर्वन्ति ततोऽप्यतिशयं इयं करोति इत्यर्थः । किंच **विद्युत् भवन्ती** बहुक्षीरतया विद्योतमाना सती **वव्रिं** स्वकीयं रूपम् । वव्रिरितिरूपनाम । रूपं **प्रति औहत** प्रकाशयति । यद्वा वत्सस्नेहातिशयस्वरूपं विद्युद्भवन्ती विद्युदिव शीघ्रदर्शना सती औहत । अयमेकोऽर्थः ।

अर्थान्तरं च । शाकपूणिर्नाम निरुक्ताचार्यः सकलमन्त्रदेवताः जानामि इति अभिमानितवान् । दुर्ज्ञेयस्य तत्त्वस्य स्वरूपमसौ जानाति किल । एनं व्यामोहयामि । इति मनसि कृत्वा सन्दिग्धोभयलिङ्गा देवता प्रादुरासीदथ तस्य पुरतः । स च तां

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

न बुबुधे। बुभुत्सया च तां स्वरूपं प्रदर्शय इति पप्रच्छ। सा च—अयं स शिङ्क्ते इत्येषा मद्देवता। तत्र प्रतीयमानं मत्स्वरूपं—इत्युपदिदेश। कथमत्रोभयलिङ्गत्वम्। वस्तुत उभयलिङ्गत्वे कथं देवतैक्यं इति। उच्यते। अत्र उभयलिङ्गत्वमुभयथा संभवति स्त्रीपुँल्लिङ्गद्वयेन मध्यमोत्तमलिङ्गद्वयेन च। तत्कथम्। अयं सः येन इति पुँल्लिङ्गवाचिना शब्दत्रयेण मेघः प्रतीयते। अधि श्रिता सा इत्यादिना स्त्रीलिङ्गवाचकेन माध्यमिका वाक्। अत उभयलिङ्गत्वम् तथा विद्युद्भवन्ती इत्येवं मध्यमलिङ्गं तत्र मेघस्तनितयोर्माध्यमिकयोः प्रतीतेः। तथा सति वव्रिमौहत इत्यत्र वर्षेण पृथिवीं प्रच्छाद्य तस्या रसं प्रत्यादत्ते इत्ययमर्थो विवक्षितः। स च आदित्यव्यापार इत्युत्तमलिङ्गत्वम्। तर्हि वस्तुत उभयलिङ्गत्वप्रतीतेः उभे अपि देवते। यल्लिङ्गं सा देवता—इति न्यायात्। अतः कथमेकदेवतासिद्धिः इति। अयं सः येन इत्येतेषां व्यत्ययाश्रयणेन सर्वदेवतानां अधिष्ठानात्मिकाया एकत्वाश्रयणेन वा सर्वफलदात्रात्मन एकत्वाश्रयणेन वा देवतैक्योपपत्तेः। अनेन मध्यमोत्तमभेदेन उभयलिङ्गत्वपक्षेऽपि देवतैक्यमुक्तं भवति। अतः—एकैव वा महानात्मा देवता—इत्युक्तत्वात् वस्तुतो देवतैक्यं अधिष्ठात्रधिष्ठानभेदेन भेदश्च न विरुध्यते। अयं स शिङ्क्ते इयं सा माध्यमिकाया वाचः अधिष्ठात्री देवता शिङ्क्ते अव्यक्तध्वनिं करोति। येन गौरभीवृता। गौरिति वाङ्नाम। माध्यमिका वाक्। यया अभिवृता अभितो व्याप्ता। अधिष्ठिता इत्यर्थः। सा इयं शिङ्क्ते। अथवा अयं स शिङ्क्ते इति नैव माध्यमिका वाक् निर्दिश्यते। अपि तु मेघः। तस्यां वाचि शिञ्जानायां स एव शिङ्क्ते इति उपचर्यते। मञ्चाः क्रोशन्ति इतिवत्। अयं स मेघः शब्दं करोति येन माध्यमिका वाक् अभिव्याप्ता। शब्देन प्रकार एवोच्यते। मिमाति मायुं स्तनितलक्षणं शब्दं करोति। अथवा इयं लुप्तोपमा। मिनोति स्वतेजः सर्वत्र प्रक्षिपति इति मायुः आदित्यः। तमिव अतिदीप्तं करोति इत्यर्थः। अथवा सामर्थ्यादात्मानं आदित्यसदृशं निर्मिमीते। कुत्र स्थिता। ध्वसनौ अधि श्रिता ध्वंसने मेघे अधिश्रिता। सा ईदृशी चित्तिभिः। कर्मनामैतत्। स्वकर्मभिर्वृष्टिरूपैः। मर्त्यं मरणधर्माणं स्थावरजङ्गमरूपं कृत्स्नं जगत्। नि हि चकार नीचैः करोति। मनुष्यान् प्रणतान् करोति। ओषध्यादिकं फलेन अवनतं करोति। अथवा चित्तिभिः द्योतनलक्षणैः कर्मभिः। विद्युति विद्योतमानायां सर्वे

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

जनाः भीत्या शिरांसि नतानि कुर्वन्ति । कथं भूता नीचैः करोति इति उच्यते । विद्युद्भवन्ती विद्युद्रूपतामा पद्यमाना प्रति वव्रिं औहत । वव्रिरिति रूपनाम । ऊहतिरत्र सामर्थ्यात् उपसंहारवाची । प्रत्युपसंहरति उदकलक्षणं रूपं पुनरादत्ते रश्मिद्वारा वृष्टमुदकं पुनर्घर्मकाले आदत्ते । एकस्यैव ज्योतिषः त्रेधाकरणात् विद्युतः सूर्यरश्मिभाव उपपद्यते ।

तमू अकृण्वन् त्रेधा भुवे कम् ।

इति वक्ष्यमाणत्वात् स्तनितस्य विद्युद्भावः मेघविद्युत्स्तनितानां अभेदाभिप्रायेण ॥

२९. अभिऽवृ॑ता-चि॒त्तिऽभिः-वि॒ऽद्युत्—इति पदपाठः ।

पयोभिः इत्युक्तम् । विचारप्रवृत्तिरपि स्वप्रज्ञाकारिता नैव हिताय । किंतु आचार्यप्रवर्तितैव । इति वक्तुं आचार्योपदेश उच्यते—अयं जीव एव सः स्वस्य परोक्ष-ब्रह्मप्रतिपन्नः शिङ्क्ते एकान्ते उपदिशति । शिजि अव्यक्ते शब्दे । येन शिञ्जनकत्रा आचार्येण गौः श्रुतिः अभीवृता अनुप्रयोगादन्वर्था कृता । अन्यत्र ध्वसने शब्दे तद्देशे नासाग्रे च वर्तते यद्यपि तथापि प्रकृतानुपयोगादन्यार्थता । धुः इति मनुष्यनाम । अस्यति प्रेरयति इति असनः परः । द्वन्द्वसमासः । ध्वसनौ जीवपरौ । श्रिता विषयी-कुर्वती । अधि अधिकं यथा तथा मिमाति बोधयति । कम् । मायुं मां प्रमितिमात्मने इच्छन्तं मायावन्तं वा । मतुपो लोपः । मायुर्वचसि मायायाम्—इति निघण्टुः । सा गौः चित्तिभिः चिन्तनाभिः निवर्तनीभिः युक्तिभिः विद्युदपरोक्षरूपा भवन्ती इति । प्रमाणजनितज्ञानस्यैव अविद्यानिवर्तकत्वादेवमुक्तम् । कार्यकारणयोरभेदोपचारः । श्रुतिरेव प्रमाणमस्माकम् । श्रुतिजनितं ज्ञानमेव मननादिहीयमानसंशयादिदोषमपरोक्षं ज्ञानं भवति । अस्मिन् पक्षे अन्तःकरणवृत्तिज्ञानानां क्षणिकत्वनियमो नास्ति । सहानवस्था-ननियमश्च नास्ति । तदुक्तं विवरणे—

श्रवणजनितबुद्धिः संशयादि प्रमृष्ठा सुकृतमननमृष्टा नैव सा स्यात् परोक्षा ।
निकषति किमविद्यामप्रमाणं चरित्वा मतिषु च युगपत्त्वं स्थैर्यमिष्टं न यद्वैः ॥

इति । ननु अविद्यानिवर्तकं वृत्तिलक्षणं यज्ज्ञानं तन्निवर्तते न वा । न चेत् द्वैतं स्यात् । तन्निवर्तते चेत् तन्निवर्तकं ज्ञानान्तरं स्यात् । तथाच अनवस्था । इत्याशङ्क्य अविद्या-निवर्तकं परोक्षज्ञानं स्वत एव निवर्तते इत्याह—वव्रिं रूपं निवर्तकज्ञानस्य रूप स्वत एव प्रत्यौहत । प्रत्यूहो विघ्नः । व्यहन्यत स्वयमेवोपरमति । तदुक्तं वाचस्पतिना--

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

यथा कतकरजो रजोन्तराविले जले प्रक्षिप्तं रजोन्तराणि भिन्दत् स्वयमपि भिद्यमानं अनाविलं पयः करोति एवमपरोक्षमात्मज्ञानं अविद्यां निवर्तयत् स्वयमपि निवर्तमानं निरवद्यमात्मतत्त्वं अवशेषयति—इति । ननु अपरोक्षज्ञानाश्रितः प्रपञ्चः कथं तेन शिक्षनकर्त्रा आचार्येण दृश्यते व्यवहीयते च। तत्राह—विद्युद्वन्ती सा गौः मर्त्यं अनित्यप्रपञ्चं निचकार निराकरोत् । निकारो न्यक्कारः । अपरोक्षज्ञानेन मिथ्यात्वबोधमात्रं क्रियते न विनाशः । तेन दृशिव्यवहारः न लुप्यते । तथापि ज्ञान्यज्ञानिनोः प्रवृत्तिविशेषः अस्त्येव । यथा कश्चित् मृदा चण्डालपुत्तलौ द्वौ द्वे च कपिले कृत्वा द्वाभ्यां प्रयच्छति । तत्र तयोश्चण्डालकपिलाबुद्धयः मृद्बुद्धयश्च भवन्ति । तत्र एकस्य मृद्बुद्धिः प्रबला । तथा अन्यस्य चण्डालकपिलबुद्धिः । नासौ स्नाति मृन्मयचण्डालस्पर्शने । अथ च मृन्मयचण्डालकपिले पश्यति व्यवहरति च । यस्य तु चण्डालकपिलाबुद्धी प्रबले तस्य भ्रान्तिमूलो व्यवहारः अन्यथैव एवं प्रकृतेऽपि । इति न कश्चित दोषः । कल्पस्तु—

जीवोऽप्ययं ब्रह्म भवेद्गुरुः स्यात् तदत्र वेदो वदतीशजीवौ ।
स युक्तिमृष्टो ह्यपरोक्षबोधः स्वं निर्मलीकृत्य वृथैव नश्येत् ॥

इति ॥

इदं शरीरं जीवावस्थायाम् । अनेन देहस्य असारता जीवस्य नित्यत्वं च प्रतिपाद्यते ॥

अनच्छये तुरगातु जीव-
मेजद्ध्रुवं मध्य आ पस्त्यानाम् ।
जीवो मृतस्य चरति स्वधाभि-
रमर्त्यो मर्त्येना सयोनिः ॥ ३० ॥

अनत् प्राणनं कुर्वत् **जीवं** जीवनवत् **तुरगातु** स्वव्यापाराय तूर्णगमनं **सत् एजत्** तत् **शये** शेते वर्तते । पश्चात् प्राणापगमनानन्तरं उक्तविलक्षणं सत् **ध्रुवं** अविचलितं सत् **पस्त्यानां** गृहाणां **मध्ये आ** शेते च स्थाणुवत्तिष्ठति । आकारः पूरणो वा । जीवस्य वैलक्षण्यमाह— **मृतस्य** शरीरस्य संबन्धी **जीवः मर्त्येन** मरणधर्मकेण शरीरेण **सयोनिः** पूर्वं समानोत्पत्तिस्थानः । यद्यपि जीवस्य न जन्मास्ति तथापि वपुषस्तद्भावात् तत्संबन्धेन उपचर्यते । तदेवाह—**अमर्त्यः** अमरणस्वभावः ।

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

जीवापेतं वाव किलेदं म्रियते न जीवो म्रियते—इति श्रुतेः। उक्तस्वभावो जीवः **स्वधाभिः चरति** पुत्रकृतैः स्वधाकारपूर्वकदत्तैरन्नैः चरति। वर्तते इत्यर्थः ॥

३०. तुरऽगातु-सऽयोनिः—इति पदपाठः।

व्यतिरेकेण पूर्वोक्तदृढत्वाय संसारी कथ्यते। सौकर्यायादौ द्वीतीयाधव्याख्या ; जीवः अङ्गीकृतजीवभाव आत्मा। मृतस्य नष्टस्य पूर्वपूर्वदेहस्य संबन्धिभिः स्वधाभिः। अन्ननामैतत्। उत्तरदेहभोगसाधनैः स्वधाभिः आत्मीयं भोगं दधद्भिर्वा धर्माधर्मसंस्कारैः चरति। चर गतिभक्षणयोः। विषयान् उपभुङ्क्ते। देहधर्मैः कथं देही लुप्यते तदभिमानात् इत्याह—सयोनिः सजन्मा देहादिजन्मादीनि आत्मनि मन्यमानः मरणादिधर्मवता देहेन्द्रियादिना सयोनिः। न च रूपादिवत् लोकायतिकचैतन्यवत् मदशक्तिवच्च देहेन सहोत्पत्तिरपारमार्थिकी शङ्कनीया इत्याह—अमर्त्यः देहधर्मैरपरामृष्टः। लोकायतिकेतरसर्वमते स्वात्मनो नाशे कृतनाशाकृताभ्यागमदोषप्रसक्तिः। लोकायतिकमतं तु—को ददर्श—इत्यत्र श्रुत्यैव भग्नं सर्वैर्दूषितं भ्राम्यति। ननु किमयं जीवः परात् भिन्नो न वा इत्याह—पस्त्यानां मध्ये त्रयाणां सावस्थानां कारणलिङ्गस्थूलानां देहानां मध्ये वर्तमानं ध्रुवं अचलं नित्यं ब्रह्मैव जीव उच्यते। कुतः। अनत्। अन प्राणने। प्राणधारणात् क्रियायोगात्। शये शिष्ये। शीङ् सुप्तौ। छान्दसो द्विर्वचनाभावः। छन्दस्युभयथा—इति सार्वधातुकत्वात् गुणः। छन्दसि लुङ्लङ्लिटः। सुषुप्तौ अज्ञानमात्रोपाधिकम्। ततः तुरगातु स्वप्ने तुरेण त्वरावता केवलेन मनसैव गमनशीलम्। ततो जागरे विषयवायुविक्षिप्तप्रायम्। एजत् सर्वतः कम्पते। दृढमेकरूपमपि अनाद्यविद्याया ईशाश्रिताया अंशे जीवज्ञानं कारणदेहस्थितं ब्रह्मजीवः सुप्तिवदिव भवति। ततः कारणदेहकार्ये लिङ्गे स्थितं जीवान्तरं स्वप्नवदिव भवति। ततो लिङ्गकार्यस्थूलदेहे स्थितं ब्रह्म जागरवदिव भवति जीवतमः। एवं ब्रह्मैव जीवः सदानादिस्थसहधर्मादिभिः चरति। स एव देहादिगुणवानिव। कल्पस्तु—

मायाया एकदेशे धृतमपि परमं सुप्तिसज्जीवसञ्ज्ञं
लिङ्गं तत्स्थूलजीवस्वपनयुगथ तज्जागरे स्थूलदेहे।
स्थूले स्थूलाख्यजीवव्यवहृतिपरिगो जीव एव प्रमत्तो
धर्माद्यैः पूर्वसृष्टैर्भ्रमति स तु वृथा यावदात्मज्ञता स्यात् ॥

इति ॥

प्रवर्ग्ये अभिष्टवे—अपश्यं गोपाम्—इत्येका विनियुक्ता। सूत्रितं च—अपश्यं गोपामनिपद्यमानं स्रवे द्रप्सस्य—इति।

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

अपश्यं गोपामनिपद्यमानमा
च परा च पथिभिश्चरन्तम् ।
स सध्रीचीः स विषूचीर्वसान आ
वरीवर्ति भुवनेष्वन्तः ॥ ३१ ॥

अहं **गोपां** सर्वस्य लोकस्य वृष्टिप्रकाशादिना गोपायितारम् । **अनिपद्यमानं** कदाचिदप्यविषण्णम् । तथा **पथिभिः** विचित्रैर्मार्गैः अन्तरिक्षरूपैः । **आ चरन्तं च परा** चरन्तं **च** उदयप्रभृति आमध्याह्नं आगच्छन्तं मध्याह्नप्रभृति आसायं पराङ्मुखं गच्छन्तम् । एवं महानुभावमादित्यं **अपश्यं** याथात्म्येन पश्येयम् । किंच **सः** आदित्यः **सध्रीचीः** सह अञ्चन्तीः । **सः विषूचीः** विष्वगञ्चन्तीः रात्रावपि चन्द्रभौमादित्यानां प्रकाशयित्रीः त्विषः **वसानः** आच्छादयन् । **भुवनेषु** भुवनैकदेशेषु लङ्कादिप्रदेशेषु **अन्तः** मध्ये । **आ वरीवर्ति** उदयास्तमयं कुर्वन् पुनः पुनरावर्तते । तमपश्यमित्यर्थः । एष वै गोपा एष हीदं सर्वं गोपायति—इत्याद्यस्मद्ब्राह्मणम् । अपश्यं गोपामित्याह असौ वा आदित्योः गोपा स हीमाः प्रजाः गोपायति—इत्यादि तैत्तिरीयकं च द्रष्टव्यम् ॥

३१. अनिऽपद्यमानम् पथिऽभिः-अन्तरिति—इति पदपाठः ।

एवं तावत् जीवजीवतरजीवतमादिरूपेण त्वंपदार्थगतान् विशेषानुक्त्वा तत्पदार्थगता विशेषा वक्ष्यन्ते । सन्ति च पञ्च चैतन्यावष्टम्भाः—

ईशो गुरुश्च जीवश्च तदन्तर्यामिसाक्षिकौ ।
चैतन्यस्कन्धकाः पञ्च मुक्तिरेतद्विवेचने ॥

इति महायोगशास्त्रे । अपश्यं पश्यामि । माहाभाग्यादृषिरेवमाह । गोपां गोप्तारमीशम् । अथ गुरुम् । अनिपद्यमानम् । पदनं संसारः । तदाख्यायां निशब्दः । ततो निवृत्तः । तमपश्यम् । गोपां इति । एष वै गोपाः—इत्याद्युपनिषद्ग्रन्थोऽप्येवमेव योज्यः । अथ जीवः । आचरन्तं धर्मं कुर्वाणं पराचरन्तं अधर्मं कुर्वाणम् । चकारौ अन्योन्यमिश्रधर्माधर्मार्थौ । यद्वा मर्त्यलोकमागच्छन्तं परलोकं च गच्छन्तम् । चकारात् आगच्छन्तं च । पथिभिः पुराणाद्युक्तमार्गैः । यद्वा देवयानः पितृयानः जायस्व म्रियस्व इत्येव तृतीयं स्थानं इति च तृतीयः पन्थाः । तैः ।

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

आपथयः—इत्याद्युक्तैर्वा । सापि ऋक् व्याक्रियते । केचिन्नरा आपथयः ब्रह्मविद्यामार्गिणः । अपरेविपथयः विरुद्धमार्गिणः पापिनः । अन्ये तु अन्तस्पथाः अस्पृष्टमार्गिणः । परे तु अनुपथाः अनुसृतमार्गिणः । भक्त्या देवतोपासकाः । अनुपथाः ऋजुमार्गिणः । एतैर्नामभिः निर्मितैर्मार्गैः रश्मिमतैर्मार्गैः । विस्तारयन्ति इति विष्टारो नाम मनुष्या मह्यं मां प्राप्तुं यज्ञं क्रियाकलापमूहन्ते वहन्ति । आह च वेदमित्रः—

ब्रह्मपापक्रियाभक्तिमार्गाश्चत्वार एव नः ।
पापवर्जा नरा एतैस्त्रिभिः श्रेयो वितन्वते ॥

इति । पापमार्गस्तु नानुष्ठेयः इति । प्रतिपाद्यमानश्रेयोहेतुरिति भावः । अथान्तर्यामी । स एव परमात्मा । सध्रीचीः । सह अञ्चति इति । सन्ध्याक्रियादौ देवताभिः सह अञ्चिताः पूजिताः दिशः । प्राच्यै दिशे नमः—इत्यादिभिर्मन्त्रैः वसानः स एव विषूचीः विगतगतीः कोणगतीरवान्तरदिशश्च वसानः नियच्छन् अन्तर्यामी इत्युच्यते । यस्तु वस्त्राणि वस्ते आच्छादयति तान्यसौ अवश्यं नियमयति इति दृष्टम् । दिगुक्ता हि जीवाः नियम्या अभिप्रेताः । अथ साक्षी । आवरीवर्ति आवृणोति अतिशयेन । भुवनेषु जगत्सु अन्तः मध्ये यद्यत्तत्सर्वमावरणं चैतन्यात् इति तत्प्रकाशकः साक्षी उक्तः । तन्नास्त्येव यत् साक्षिणा अप्रकाशितम् । सर्वं हि वस्तु ज्ञाततया अज्ञाततया साक्षिचैतन्यस्य विषय एव । सर्वोपाधिविशिष्टेषु अवशेषितं उपलक्षितं चैतन्यं साक्षी इत्याहुः । कल्पस्तु—

ईशो गुरुर्जीव उदीरितोऽन्तर्यामी च साक्षी परमात्मभेदाः ।
बोधोपदेष्टा भुवनेषु गन्ता स चोदको वेदक एष एकः ॥

इति ॥

य ईं चकार न सो अस्य वेद य ईं ददर्श हिरुगिन्नु तस्मात् ।
स मातुर्योना परिवीतो अन्तर्बहुप्रजा निर्ऋतिमा विवेश ॥ ३२ ॥

अत्र गर्भवासक्लेशपूर्वकजननप्रतिपादनेन तत्परिहाराय आत्मा ज्ञातव्यः इति अर्थात् प्रतिपाद्यते । **यः** पुमान् पुत्रार्थी **ईं** एनं गर्भं **चकार** करोति विक्षिपति वा तत्कारणभूतस्य विक्षेपद्वारेण **न सः** पुमान् **अस्य** तत्त्वं **वेद** । कर्मणि षष्ठी वा । एनं गर्भं न जानाति । कथंभूतः कथं वा केन प्रयोजनेनेति सर्वात्मना न जानाति इत्यर्थः । **यः** च **ईं** मातुरुदरस्थं **ददर्श** उदरवृद्ध्यन्यथानुपपत्त्या अनुमानेन वा

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

ददर्श **तस्मात्** द्रष्टुः सकाशात् सः **हिरुक् इत् नु** । हिरुक् इति अन्तर्हितनाम । इच्छब्द एवकारार्थः । नु निश्चये । अत्यन्तमन्तर्हित एव खलु । यद्वा यः संसारावस्थायां ईं एनं कृषिवाणिज्यवेदाध्ययनादिकं चकार सः अस्य एतत् न वेद लोकान्तरे जन्मान्तरे वा । तथा यः ईं एनं ददर्श गिरिनदीसमुद्रबन्ध्वादिकं ददर्श जीवनसमये तस्माम् दृष्टात् हिरुक् इत् नु पृथगेव । अत्रानुभूतं सर्वं न जन्मान्तरे लोकान्तरे वा अनुभवति इत्यर्थः । **सः** तादृशः **मातुः** जनन्याः **योनौ** योनौ **अन्तः परिवीतः** उल्वजरायुभ्यां परितो वेष्टितः सन् । **बहुप्रजाः** बहुजन्मभाक् । अथवा उत्पन्नः सन् स्वयमप्यपत्योत्पादनेन बहुप्रजाः । एवं गर्भदुःखं अनुभवन् **निर्ऋतिं आ विवेश** निर्ऋत्यभिधानं प्रदुःखं अनुभवति यावत् स्वरूपभूतात्मज्ञानम् । अतः तत्परिहाराय आत्मा ज्ञातव्यः इत्युक्तं भवति । एवमात्मविदामभिप्रेतोऽर्थः ।

नैरुक्तानां तु मते—य ईं चकार मध्यस्थानो वायुर्मेघो वा एतद्वृष्ट्युदकं करोति सः अस्य । तत्त्वमिति शेषः । अथवा एतत् कर्म । न जानाति । तयोरचेतनत्वादिति भावः । यस्तु ईं एतत् ददर्श पश्यति तस्मादपि हिरुक् अन्तर्हितः । प्राणिकर्मवशेन काले वर्षिता परमेश्वरः आदित्यात्मनि गूढः इत्यर्थः । यः ईं हिरुक् अन्तर्हितं एतत् ददर्श पश्यति स वृष्टिलक्षणः पुत्रो मातुः निर्मातुरन्तरिक्षस्य योनौ योनिवदुत्पत्त्याधारभूते अन्तरिक्षे । उभयोरप्यन्तरिक्षनामत्वात् सामान्यविशेषभावो द्रष्टव्यः । अन्तरिक्षैकदेशे योन्यां अन्तः मध्ये बहुप्रजाः बहुप्रजातान्नः बहुप्राण्युपकारी । अथवा जनिरत्र अन्तर्भावितण्यर्थः । बहूनां धाराणां सस्यनिष्पादनद्वारेण प्राणिनां वा प्रजनयिता सन् । निर्ऋतिं निरमणसाधनां भूमिं आ विवेश प्रविशति । प्राप्नोति इत्यर्थः ॥

३२. परिऽवीतः-बहुऽप्रजाः-निःऽऋतिम् इति पदपाठः ।

प्राक्प्रतिपादितात्मज्ञानादेव मोक्षः न कर्मणा नापि समुच्चयेन इति वक्तुं ज्ञानकर्मसमुच्चयनिराकरणम् । य ईं इदं कर्म करोति स नैवास्य ईं इमसात्मानं वेद वेत्ति । यस्तु ईं इमं आत्मानं पश्यति स पुरुषः तस्मात् कर्मकर्तुः सकाशात् हिरुक् नु पृथगेव । कर्तृकरणबुद्ध्योः युगपदेककर्तरि विरोधात् । यस्तु एते न्यायादिविरुद्धे ज्ञानकर्मणी मोक्षे समुच्चिते

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

मन्यते स उभयभ्रष्टः मातुर्योनौ गर्भे स्यात् । सर्वगतोऽपि परिवीतो वस्त्रादिना अन्तश्च अविद्यादिना परिवीतः बहूनां प्रजाः पुत्रत्वेन अनेकजन्मवान् । अन्तोदात्तत्वात् तत्पुरुषः । अर्थातिशयाच्च । अन्ये तु बहुव्रीहावपि—बहुप्रजाश्छन्दसि—इति निपातनात् स्वरसिद्धिमाहुः । निर्ऋतिं मृत्युं आविवेश आविशति । कल्पस्तु—

य: कर्मकर्ता न स आत्मवेदी य आत्मवेदी स पृथक्कृती स्यात् ।
एकत्र कर्तर्युभयं विरुद्धं मृत्युं व्रजेदित्यपमन्यमानः ॥

इति ॥

द्यौर्मे पिता जनिता नाभिरत्र बन्धुर्मे माता पृथिवी महीयम् ।
उत्तानयोश्चम्वो३र्योनिरन्तरत्रा पिता दुहितुर्गर्भमाधात् ॥ ३३ ॥

दीर्घतमा ब्रवीति । **मे** मम **द्यौः** द्युलोकः **पिता** पालकः । न केवलं पालकत्वमात्रम् । अपि तु **जनिता** जनयिता उत्पादयिता । तत्रोपपत्तिमाह—**नाभिः अत्र** नाभिभूतो भौमो रसः अत्र । तिष्ठति इति शेषः । ततश्च अन्नं जायते । अन्नाद्रेतः । रेतसो मनुष्यः । इत्येवं पारम्पर्येण जननसंबन्धिनो हेतोः रसस्यात्र सद्भावात् । अनेनैवाभिप्रायेण जनिता इत्युच्यते । अत एव **बन्धुः** बन्धिका । तथा **इयं मही** महती **पृथिवी मे माता** मातृस्थानीया । स्वोद्भूतौषध्यादिनिर्मात्री इत्यर्थः । किंच **उत्तानयोः** ऊर्ध्वतनयोः । **चम्वोः** सर्वस्य अन्योः भोगसाधनयोः द्यावापृथिव्योः **अन्तः** मध्ये **योनिः** सर्वभूतनिर्माणाश्रयमन्तरिक्षम् । वर्तते इति शेषः । **अत्र** अस्मिन्नन्तरिक्षे **पिता** द्युलोकः । अधिष्ठात्रधिष्ठानयोरभेदेन आदित्यो द्यौरुच्यते । स्वरश्मिभिः । अथवा इन्द्रः पर्जन्यो वा । **दुहितुः** दूरे निहितायाः भूम्याः **गर्भं** सर्वोत्पादनसमर्थं वृष्ट्युदकलक्षणम् । **आ अधात्** सर्वतः करोति ॥

सगुणब्रह्मविद्यायां तु ज्ञानकर्मसमुच्चयो युक्त एव इति वक्तुं कांचन सगुणब्रह्मविद्यामाह—या द्यौः सैव मम पिता तथा जनिता सैव मम नाभिः सनाभिः सहोदरा स्वसा । जनं कश्यपं इता जनिता । तारकादित्वात् इतच् । जनो हि कश्यपो यदजीजनज्जगत् इति भृगुर्वारुणिः । यद्वा जनं कश्यपं इयति इति कर्तरि निष्ठा । तृचि ङीष्प्रत्ययः । अत्र जगति यो बन्धुः भ्राता अग्निर्वा सोमो वा स एव ममापि बन्धुर्भ्राता । भृगुः शशी ।

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

देहेन सह जायेते सोमाग्नी भ्रातरौ विदुः ।
तयोरन्यतरच्छेदे वेदः पतति सर्वथा ॥

इति योगमित्रः ।

या पृथिवी सैव मम माता मही इयं गोर्नामिष्ट ।
या मही कामधेनुरधिदैवं सैव मम गृहे इयं गौः ॥
द्यौर्नः पिता ॥
पृथिवी माता ॥

इति च मन्त्राभ्यां एतत् सर्वं सूचितम् । द्यौर्मे पिता—इत्यादिरूपेण ध्यायेत् इति विधिकल्पना । यथा द्रव्यदेवतासंबन्धाद्विधिः कल्प्यते एवं अर्थवादे वेदभागे वेद्य दर्शनाद्विधिकल्पना । वेद्यं हि विद्यायाः स्वरूपम् । न च—अस्य वामस्य पलितस्य होतुः इति वैश्वदेवम्—इति वैश्वदेवशंसनशेषता । तत्प्रयोगे तथात्वं अस्तु । इह हि ज्ञानमोक्षाक्षरप्रशंसा इत्युच्यते । अतः स्वातन्त्र्यमेतेषां मन्त्राणाम् । यदि केनचिद्विधिना अवच्छिद्य कस्मिन्नप्यर्थे विनियुज्यते तदा तत् स्वातन्त्र्यं तच्छेषार्थम् । अत्रापि यदा जपपारायणादौ विनियोगः तदा स्मार्यस्य प्रयोगसमवेतस्य अर्थस्याभावात् अध्यात्मपरता उचिता । अन्यच्च यदत्र किंचिद्वक्तव्यं तत् सर्वमूह्यम् । तत्र ध्यानान्तरं समुच्चिनोति । उत्तानयोः अन्योन्याभिमुखयोः चम्वोः । अध्यात्मपक्षे ऊर्ध्वाधोदेहभागयोः । अधिदेवतापक्षे तु ब्रह्माण्डस्य ऊर्ध्वाधोभागयोः । अन्तः मध्ये योनिः जगद्बीजं ईश्वरः अस्ति । तदुक्तम्—

ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति ।
भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया ॥

इति । अध्यात्मपक्षे तु हृद्युपास्यो जगद्धेतुः देहेन्द्रियादिप्रवर्तकः ईशः अस्ति । अधिदैवपक्षे तु क्षीरसागरशायी नारायणो जगद्योनिः प्रसिद्धोऽस्ति । अत्र जगद्योनावीश्वरे नारायणे बहिर्निर्गतरूपो जगतिपता चतुर्मुखाख्यो ब्रह्मा जातः । स च स्वदुहितुः सरस्वत्याः योनौ अन्तः वीर्यं आहितवान् । तस्माद्वीर्यात् सर्गविशेषः इति । प्रजापतिर्वै स्वां दुहितरमभ्यध्यायत्—इत्यत्र खण्डे अयमर्थः स्पष्ट उक्तः । अध्यात्मपक्षे तु अत्र हृदयस्थे देहादिप्रापके जगद्योनौ ईश्वरे बहिर्निर्गतरूपश्चतुर्मुखस्थानीयः पिता तृतीयजन्मदातृत्वेन ममायं पिता इति शिष्यैर्भावितो ब्रह्मविद्याचार्यः ब्रह्मा अनुरूपं अन्तस्तत्त्वं गर्भं अधात् । अन्तर्भावितोऽत्र ण्यर्थः । आधापितवान् आधारयत् । अस्खलितमचीकरद्वा । आरोपितवान् वा । डुधाञ् धारणपोषणयोः । अनेन पिण्डब्रह्माण्डयोः जीवपरयोश्च

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

ऐक्यं सूचितम्। देहोऽपि ब्रह्माण्डः। तदाह श्रुतिः—पुरुषो ह वा अयं सर्व आन्दः—इत्यादिना खण्डसमाप्तिपर्यन्तेन ग्रन्थेन। एतद्विद्याफलं तु कश्यपसंहितोक्तं ज्ञेयम्—

ब्रह्मविद्याप्रसङ्गोक्तविधानं ज्ञानतः फलम्।
ब्रह्मविद्यासमुत्पत्तिरनुक्तं चेत् फलान्तरम्॥

इति। वामनस्त्वाह—

न ब्रह्मलोकसंप्राप्तिरहंग्रहमृते भवेत्।
अन्यत्रोक्तं फलं कल्प्यं प्रत्यभिज्ञा फलं यदि॥
अनारभ्योक्तविद्यानां न्यायशास्त्रफलं विदुः।
अङ्गाच्च ब्रह्मविद्यानां कर्मसंपत् फलं विदुः॥
अङ्गाच्च ब्रह्मविद्यासु प्रोक्तं फलमति व्रजेत्।
प्रणयाश्रितगोदोहफलं यत् पृथगिच्छताम्॥

इति। कल्पस्तु—

नाको मे जनको दितिर्भगिनिका सोमानिलौ भ्रातरौ
माता भूः सुरधेनुका गृहगवीत्येवं विचिन्त्यं ततः।
देहार्धद्वयमध्यचित्तु दुहिता गर्भे पितुर्ब्रह्मदात्
तत्त्वं स्वाकृतिविष्णुनाभिजनितादाधात् सरस्वत्यथ॥
ध्यायेदेवं ततः पिण्डे जीवेशौ न पृथक् स्मरेत्।
एवं चिन्तयतो ब्रह्मविद्योदेति विमोचिनी॥

इति॥

आश्वमेधिके मध्यमे अहनि ब्रह्मोद्ये होत्रादयः—पृच्छामि—इत्यनया यजमानं पृच्छेयुः। तथा च सूत्रितम्—एकैकशो यजमानं पृच्छति पृच्छामि त्वा परमन्तं पृथिव्याः—इति।

पृ॒च्छामि॑ त्वा॒ पर॒मन्तं॑ पृथि॒व्याः पृ॒च्छामि॒ यत्र॒ भुव॑नस्य॒ नाभिः॑।
पृ॒च्छामि॑ त्वा॒ वृष्णो॒ अश्व॑स्य॒ रेतः॑ पृ॒च्छामि॑ वा॒चः प॑र॒मं व्यो॑म॥३४॥

हे यजमान **त्वा** त्वां **पृच्छामि** प्रश्नं करोमि। किम्। **पृथिव्याः परं अन्तं** उत्कृष्टां काष्ठाम्। यत्र सर्वा पृथिवी समाप्यते तत् पृच्छामि। तथा त्वां

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

अन्यत् **पृच्छामि**। किं तत् इत्युच्यते। **यत्र भुवनस्य** भूतजातस्य **नाभिः** संनाहः बन्धनम्। यत्र सर्वं संनद्धं भवति तं इत्यर्थः। किंच **त्वा** त्वां **वृष्णः** वर्षकस्य **अश्वस्य** व्याप्तस्यादित्यस्य। असौ वा आदित्यो वृषाश्वः—इति तैत्तिरीयकम्। तस्य **रेतः** रेतोवत् कारणम्। तत् किमिति **पृच्छामि**। तथा **वाचः** सर्वस्य वाग्जातस्य **परमं** निरतिशयं **व्योम** स्थानम्। सर्वस्य वचसः कारणम्। **पृच्छामि**। एतत् प्रश्नचतुष्टयं पृच्छामि ॥

३४. विऽओम—इति पदपाठः।

प्रासङ्गिकनिवृत्तये पुनः प्रकृतानुसन्धानाय च चतुरः प्रश्नानाह—जीवरूपेण परमात्मदृष्टिरहं त्वा परमात्मरूपमीशं पृच्छामि पृथिव्या देव्याः महत्या मायाया अन्तं निवर्तकम्। प्रलयव्यावृत्त्यर्थमाह—परमात्यन्तिकं तथा पृच्छमि। यत्र कारणे सति भुवनस्य प्रपञ्चस्य नाभिर्वाहनं बन्धनमविश्लेषणम्। तत्कारणं पृच्छामि। महामायायाः साधारण्यात् जगद्वैचित्र्यजनकमसाधारणं कारणं पृच्छामि इत्यर्थः। तथा पृच्छामि त्वां वृष्णो देहेन्द्रियादिस्वामिनो जीवस्य यः अश्वः इन्द्रियम्।

इन्द्रियाणि हयानाहुर्विषयांस्तेषु गोचरान्।

इति श्रुतेः। तच्च इहान्तरं मनः सर्वेन्द्रियाण्यश्नुते व्याप्नोति। बलवत्त्वाच्च वेगवत्त्वाच्च तस्याश्वस्य मनसो रेतो रयणम्। रीङ् गतौ। स्नरीभ्यां तुट् च। चरमधातुवशाच्चेष्टते—इति गर्भोपनिषदुक्तेश्च। उदकनामैतत्। आप्यायकमश्वं स्वमनसश्चेष्टकं चेतनं पृच्छामि इत्यर्थः। तथा वाचो वेदात् परमं हरम्। परं ब्रह्मेति केचित्। तच्चिन्त्यम्। व्योम विशेषेण अवितृ रक्षकं पृच्छामि। अवितृ चेत् कथं वाचः परमं निर्गुणम्। वाचः परमं निर्गुणं चेत् कथमवितृ। छान्दसं संप्रसारणम्। ओणेर्वा णिलोपः। ओणृ अपनयने। यतो निर्गुणशंसनं संसारापनेतृ पृच्छामि। कल्पस्तु—

मायानिवर्तकं किं स्याद्वैचित्र्यं किं निबन्धनम्।
मनसः प्रेरकं किं स्यात् श्रुतेर्दूरः क ईश्वरः ॥

इति ॥

अथैवं पृष्टो यजमानः—इयं वेदिः—इत्यनया प्रतिब्रूयात्। इयं वेदिः परो अन्तः पृथिव्या इति प्रत्याह—इति सूत्रितम्।

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

इयं वेदिः परो अन्तः पृथिव्या अयं यज्ञो भुवनस्य नाभिः ।
अयं सोमो वृष्णो अश्वस्य रेतो ब्रह्मायं वाचः परमं व्योम ॥ ३५ ॥

पृथिव्याः प्रथनवत्या भूम्याः **परः अन्तः** परमन्तं पर्यवसानं **इयं वेदिः** । न हि वेद्यतिरिक्ता भूमिरस्ति । एतावती वै पृथिवी यावती वेदिः—इति श्रुतेः । तथा **अयं यज्ञः भुवनस्य** भूतजातस्य **नाभिः** संनहनम् । तत्रैव वृष्ट्यादिसर्वफलोत्पत्तेः सर्वप्राणिनां बन्धकत्वात् । अथ **वृष्णः** वर्षकस्य **अश्वस्य** आदित्यस्य **रेतः अयं सोमः** रसात्मकः । अग्नौ हुतः सोमरसः आदित्यं प्राप्य वृष्ट्यादि फलं जनयति । **अयं ब्रह्मा** प्रजापतिरेव **वाचः** मन्त्रादिरूपायाः **परमं व्योम** उत्कृष्टं रक्षकं स्थानम् । तत्रैवोत्पत्तेः तत्रैव पर्यवसानात् ॥

३५. विऽओम—इति पदपाठः ।

उत्तराण्युच्यन्ते । इयं ब्रह्मवित्सु प्रसिद्धा वेदिः ब्रह्मानुभूतिः पर आत्यन्तिकः अन्तः हेतुः पृथिव्या मायायाः । तथा अयं सर्ववादिप्रसिद्धः यज्ञः । अजहल्लक्षणया धर्माधर्मसंस्कारात्मकपुण्यपापराशिः भुवनस्य प्रपञ्चस्य विश्लेषकारकः असाधारणो हेतुः । तथा अयं प्रसिद्धः सोमः जगदीश्वरः जीवः सन् प्रेरकः वृष्णो जीवस्य यः अश्वः मनः तस्य रेतः । ब्रह्मा ब्रह्मीभूतः चतुर्मुखो विष्णुर्वा ।

आचार्यो ब्रह्मणो मूर्तिः ।

इति स्मृतेः । भृगुशप्तत्वात् ब्रह्मणो विष्णुशिववत् साक्षात् पूज्यत्वाभावात् गुरुरूपेण पूज्यत्वाच्च अयं प्राकृतो ब्रह्मा ब्रह्मविद्यागुरुरेव । वाचः वेदात् परमं दूरं व्योम परमन्तब्रह्म परमार्थतः । शिष्यभाग्यवशाच्च विशेषेण अवितृ संसारापनेतृ च । कल्पस्तु—

मायानिवृत्त्यै स्वनिजैक्यबोधो धर्मादिसंस्कारशुभैर्विशेषैः ।
ईशो हि जीवस्य मनोविनोदी वेदात् परं ब्रह्म गुरूदितं स्यात् ॥

इति ॥

सप्तार्धगर्भा भुवनस्य रेतो विष्णोस्तिष्ठन्ति प्रदिशा विधर्मणि ।
ते धीतिभिर्मनसा ते विपश्चितः परिभुवः परि भवन्ति विश्वतः ॥ ३६ ॥

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

सप्त सर्पणस्वभावाः सप्तसंख्या वा रश्मयः । अर्धगर्भाः संवत्सरस्यार्धे गर्भे गर्भस्थानीयं उदकं धारयमाणाः । यद्वा ब्रह्माण्डस्यार्धे मध्ये अन्तरिक्षे गर्भवद्वर्तमानाः । भुवनस्य लोकस्य रेतः सारं वृष्टिप्रदत्वेन रेतोभूताः । तादृशा रश्मयः विष्णोः व्यापकस्य आदित्यस्य विधर्मणि जगद्धारणव्यापारे प्रदिशा प्रदेशेन तिष्ठन्ति वर्तन्ते । किंच ते धीतिभिः प्रज्ञाभिः ते मनसा जगदुपकारः कर्तव्यः इति बुद्धया च । विश्वतः सर्वतः । द्वितीयार्थे तसिः । विश्वं परि भवन्ति परितो भावयन्ति । कृत्स्नं जगत् व्याप्नुवन्ति इत्यर्थः । यस्मादेवं तस्मात् ते एव विपश्चितः बुद्धियुक्ताः परिभुवः सर्वत्र व्याप्ताश्च । यद्वा सप्तार्धगर्भाः सप्त महदहंकारौ पञ्च तन्मात्राणि इति मिलित्वा सप्तसंख्यानि तत्त्वानि अर्धगर्भा अविकृतिरूपाः । विकाराश्रयाया मूलप्रकृतेः प्रकृतिविकृतेरुदासीनस्य आत्मनश्च उत्पन्नत्वात् अर्धांशेन प्रपञ्चाकारेण परिणामात् अर्धगर्भाः । पुरुषांशस्याविक्रियत्वात् इत्यभिप्रायः । अत एव तेषां प्रकृतिविकृतित्वम् । यस्मादेवं तस्मात् भुवनस्य रेतः कारणम् । कारणभूतानि तान्येव विष्णोर्व्याप्तस्य पुरुषस्य विधर्मणि प्रदिशा प्रदेशेन तिष्ठन्ति । इतरत् समानम् ॥

३६. अर्धऽगर्भाः-प्रऽदिशा विऽधर्मणि-धीतिऽभिः-
विपःऽचितः-परिऽभुवः—इति पदपाठः ।

परमे व्योमन् यस्य वक्ष्यमाणज्ञानकथनेन इत्याह—सप्त अर्धगर्भाः अर्धकायाः अर्धकारणरूपाः । प्रकृतयो विकृतयश्च इत्यर्थः । भुवनस्य षोडशकस्य प्रकृतिविकारस्य रेतः कारणम् । विष्णोः प्रदिशा आज्ञयैव तिष्ठन्ति प्रवर्तन्ते । चेतनासहायजडानां प्रवृत्त्यनुपपत्तेः । विधर्मणि विरुद्धधर्मवत्याम् । ते च उक्ताः चतुर्विंशतितत्त्वात्मकाः पदार्थाः । धीतिभिः धार्यमाणैः अविनश्वरैः धर्माधर्मसंस्कारैः ते त्वया मनसा चेतसा च युक्ताः परिभुवः परिभवनधर्माः । विश्वतः । ल्यब्लोपे पञ्चमी इयम् । सर्वशास्त्राणि विज्ञापयन् विपश्चितोऽपि पुरुषान् परिभवन्ति संसारयन्ति । कथम्—ते—इत्यत्र—त्वया—इत्युक्तम् । जस्पर एव तेशब्दः प्रसिद्धः । उदात्तश्च तेशब्दः । अतः तच्छब्द-प्रकृतिकः । अत्र अव्ययवृत्तिकारोक्तमुत्तरम्—

तेमेशब्दावुदात्तौ चेत् तृतीयाथ स्वरादिषु ।
अनुदात्तावपादादावन्वादेशे च ङेङसोः ॥

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

इति । साङ्ख्यशास्त्रसमुत्थापकोऽयं मन्त्रः । तदुक्तं साङ्ख्यशास्त्रे—

मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त ।
षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः ॥

इति उपन्यस्य साङ्ख्यशास्त्रमिह दूषितं विज्ञेयम् । विष्णोः प्रदिशा तिष्ठन्ति इति । विष्णाति स्नुह्यति स्निह्यति विश्नोति अज्ञानलक्षणं विषं नुदति इति वेवेष्टि इति नोदनात् विशति इत्यादिधातुभ्यः विष्णुशब्दः साधितो विष्णुपदसिद्धौ मयैव । नुडुप्रत्ययान्ता एते । विषस्य लोपः । आदिशब्दाद्वदति । विष्णोते वन्दते वदन्ति इत्यादयोऽपि इष्णुन्-प्रत्ययान्ताः । विशति वेष्टयति इति च ।

कारकेषु तु भावे स्यादिति व्युत्पत्तिसप्तकम् ।
कालत्रयेण तद्भेदादेकविंशतिरूपकम् ॥

प्रागुक्तधातुभ्यः कर्मकर्तृकरणेषु बहुलवचनात् संप्रदानापादानयोर्भावे इत्येवं सप्त व्युत्पत्तयः । ताश्च कालत्रयभेदात् एकोनविंशतिधा भिद्यन्ते ।

एवं व्युत्पत्तयो विष्णावसंख्यातमुदीरिताः ।
सर्वशब्दार्थको विष्णुशब्दो विष्णावुदीरितः ॥

इत्यलमतिप्रसङ्गेन । कस्पस्तु—

सप्तार्धगर्भा कृतषोडशापि विष्णावजा तिष्ठति मूलहेतौ ।
सत्त्वानि धर्मादिभिरुज्ज्वलानि संसारयन्त्येव विपश्चितोऽपि ॥

इति ॥

न वि जा॑नामि॒ यदि॑वे॒दमस्मि॒ नि॒ण्यः संन॑द्धो॒ मन॑सा चरामि ।
य॒दा माग॑न् प्रथम॒जा ऋ॒तस्यादिद्वा॒चो अ॑श्नुवे भा॒गम॒स्याः ॥ ३७ ॥

अहं **यदि॑व इदं** यदपीदं विश्वं **अस्मि** कृत्स्नः प्रपञ्चोऽपि अहमेवास्मि । नामरूपांशमपरमार्थं त्यक्त्वा सर्वत्रानुगतोऽस्मि । योऽयं सच्चिदानन्दाकारोऽस्ति सोऽहमस्मि इति **न वि जानामि** विविच्य नाज्ञासिषम् । परं शास्त्रजनितं इदमहमस्मि इति ज्ञानं जातम् । अविवेकी अहमित्यर्थः । कार्यकारणयोरभेदात् । कृत्स्नप्रपञ्चस्यापि ब्रह्मानन्यत्वेन ब्रह्मैकत्वावगमे प्रपञ्चजातमपि स्वस्वरूपमेव भवति । इदं सर्वं यदयमात्मा ब्रह्मैवेदं सर्वमात्मैवेदं सर्वं स ईक्षत बहु स्यां प्रजायेयेत— इत्यादिश्रुतिभ्यः एकविज्ञानेन सर्वविज्ञानप्रतिज्ञानात् । तदनन्यत्वमारम्भणशब्दा-

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

दिभ्यः—इत्याद्युपपत्तिभिश्च प्रपञ्चस्य ब्रह्मानन्यत्वं सिद्धम् । यद्वा इवशब्द उपमार्थ एव । यदिव यत् परोक्षज्ञानं सर्वैकात्म्यरूपं आनुभाविकमस्ति तदिव तद्वदेवाहमस्मि । इदं सर्वमहमस्मि—इति ज्ञानं मे जातम् । अपितु एतद्दार्ष्टान्तिकभूतम् । आनुभाविकं सार्वात्म्यं यदस्ति तन्न विजानामि न प्राप्तोऽस्मि । शास्त्रजनितं सार्वात्म्यं जातम् । न तु आनुभाविकं इत्यर्थः । तत्र कारणमाह—यतोऽहं **निण्यः** । अन्तर्हितनामैतत् । अन्तर्हितो मूढचित्तः । चित्तप्रत्यक्प्रवणताभावेन परिच्छिन्न इत्यर्थः । तत्रोपपत्तिमाह—**संनद्धः** अविद्याकामकर्मभिः सम्यग्बद्धः वेष्टितः । अत एव **मनसा** युक्तः भावनासहिष्णुना बहिर्मुखेन विक्षिप्तेन चेतसा युक्तः । **चरामि** संचरामि संसारे । अथवा मनसा संनद्धः चरामि । इन्द्रियपरवश एव सन् संसारे दुःखमनुभवामि । न सार्वात्म्यं जानामि इति परिदेवते । यास्कोऽपि इमं परिदेवनार्थत्वेन उदाजहार—अथापि परिदेवना कस्माच्चिद्भावात् न विजानामि यदिवेदमस्मि—इति । बहिर्मुखचेतसः स्वरूपापरिज्ञानं जनितं दुःखं अन्यत्र श्रूयते ।

पराञ्चि खानि व्यतृणत् स्वयंभूस्तस्मात् पराङ् पश्यति नान्तरात्मन् ॥

इति । तर्हि कदा एतद्भवति इत्याह—**यदा आ अगन्** आगमिष्यामि तदा । किं तत् इत्युच्यते—**ऋतस्य** परमार्थस्य परस्य ब्रह्मणः **प्रथमजाः** प्रथमोन्मेषः प्रथमोत्पन्नश्चित्तप्रत्यक्प्रवणजनितोऽनुभावः । स यदा **मा** मां प्राप्नोति । **आत् इत्** अनन्तरमेव अव्यवधानेन **अस्याः वाचः** ऐकात्म्यप्रतिपादिकाया उपनिषद्वाचः यदिवेदमस्मि—इत्युक्ताया वा **भागं** भजनीयं शब्दब्रह्मणा व्याप्तव्यं परं ब्रह्मपदं **अश्नुवे** प्राप्नोमि । चित्तस्य बहिर्मुखतां परित्यज्य अन्तर्मुखतैव दुःसंपादा । सा यदा स्यात् तदानीमेव स्वरूपं द्रष्टुं सुशकं भवति । पश्चाद्विलम्बाभावात् यथा गिरिशिखरात् पतन् पाषाणोऽविलम्बेन पतति तद्वत् । चित्तप्रत्यङ्मुखत्वस्य दुःशकत्वमपि तत्रैव श्रूयते ।

कश्चिद्धीरः प्रत्यगात्मानमैच्छदावृत्तचक्षुरमृतत्वमिच्छन् ॥

इति ॥

३७. यत्ऽ ईव-संऽनद्धः-प्रथमऽजाः—इति पदपाठः ।

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

कीदृशः परिभवः । कथं च तन्निवृत्तिः इत्यत्रोच्यते । महाभाग्ययोगाद्दीर्घतमा एव तत्स्वरूप इव भूत्वा आह—न विजानाभि जानन्नपि विशेषेण न वेद्मि इदं जगत् यदिव यदीये सत्त्वचित्त्वे गृहीत्वा । यदि वा चिदिव अवभाति । अहं च यदिव अस्मि तन्न विजानामि । तत्र हेतुः । निण्यः श्रुत्यादिभिर्निर्णीतोऽपि अविद्यया आच्छादिन्या अन्तर्हितोऽहम् । ण्यत् शब्दः । तलोपः छान्दसः । निण्यः निर्णीतः । अन्तर्हितनामधेयम् । ततः सन्नद्धः सम्यक् बद्धः । केन । मनसा सङ्कल्पविकल्पात्मना पुण्यपापसंस्कारहेतुना । ततः चरामि ऊर्ध्वाधोमध्ये चरामि विषयान् उपभुञ्जे वा । यदा यस्मिन् काले मां प्रति आगन् आगच्छन्ति । प्रथमजाः ब्राह्मणाः सनकादिसमाश्च । आदित् अनन्तरमेव ऋतस्य ब्रह्मणः संबन्धिन्याः अस्याः प्रकृतायाः ब्रह्मविद्यारूपिण्याः वाचः श्रुतेः भागं भजनीयं अश्नुते प्राप्तवानस्मि । कल्पस्तु—

आदाय सच्चित्त्वमिदं यदीयं सच्चिद्भवेत्तन्न हि वेद्मि तेन ।
बद्धो यदा मामगमन्महान्तो ब्रह्मा तदैवाविदमित्युवाच ॥

इति ॥

अपाङ् प्राङेति स्वधया गृभीतोऽमर्त्यो मर्त्येना सयोनिः ।
ता शश्वन्ता विषूचीना वियन्ता नि१न्यं चिक्युर्न नि चिक्युरन्यम् ॥ ३८ ॥

अमर्त्यः अमरणधर्मा अयमात्मा **मर्त्येन** मरणधर्मणा भूतात्मना देहेन **सयोनिः** समानस्थानः । यत्र परिच्छेदको देहोऽस्ति तत्र सर्वत्र सोऽयमपि तिष्ठति इत्यर्थः । यद्वा समानोत्पत्तिः । सहवासेन स्वस्मिन्नप्युत्पत्तिरुपचर्यते । एवंभूतः सन् **स्वधया** अन्नोपलक्षिततद्भोगेन **गृभीतः** । यद्वा स्वधाशब्देन अन्नमयं शरीरं लक्ष्यते । तेन गृहीतः सन् **अपाङ् एति** अशुक्लं कर्म कृत्वा अधो गच्छति । **प्राङ्** एति ऊर्ध्वं स्वर्गादिलोकं प्राप्नोति । परमात्मैव सूक्ष्मशरीरोपाधिकः सन् नानाविधकर्म कृत्वा तद्भोगाय जीवसंज्ञां लब्ध्वा शरीरत्रयेण संबद्धः लोकान्तरेषु संचरति । स्थूलसूक्ष्मोभयशरीरपरिग्रहेण लोके गुणत्रयान्वितः सन् परिभ्रमति । तथा च श्रूयते—

गुणान्वयो यः फलकर्मकर्ता कृतस्य तस्यैव स चोपभोक्ता ।
स विश्वरूपस्त्रिगुणस्त्रिवर्त्मा प्राणाधिपः संचरति स्वकर्मभिः ॥

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

इति। इदानीं उभयप्राधान्येनाह—**ता** तौ भूतात्मकर्त्रात्मानौ **शश्वन्ता** अविभागेन सर्वदा वर्तमानौ। यद्वा सूक्ष्मशरीरपक्षे सर्वदा सहवास उपपद्यते। स्थूलशरीर-पक्षेऽपि सात्त्विकजातेः। तत्कारणानां भूतसूक्ष्माणां सद्भावात् तत्र शरीरसंबन्ध उपपद्यते। **विषूचीना** इह लोके सर्वत्रगमनौ **वियन्ता** तत्तत्फलोपभोगाय सर्वत्र लोकान्तरेषु गच्छन्तौ वर्तेते। तत्र नरा **अन्यं** भूतात्मानं **नि चिक्युः** नितरां विशेषेण पश्यन्ति जानन्ति। **अन्यं** अपरं देहवच्छायातिरिक्तं **न नि चिक्युः** न जानन्ति। केचन पामराः देहव्यतिरिक्तं न जानन्ति। केचन विवेकिनः कर्तृत्व-भोक्तृत्वोपेतो देहातिरिक्तः कश्चिदस्तीत्यनुमिमते। न केऽपि देहत्रयव्यतिरिक्त-मात्मानं जानन्ति। अतो दुर्लभमात्मज्ञानं इत्यर्थः ॥

३८. सऽयोनिः-विऽयन्ता— इति पदपाठः।

ननु अज्ञानाद्बन्धो ज्ञानान्मोक्षः इत्यवोचः। तर्हि ज्ञानाद्भवेन्मोक्षो जीवतो न वा। आद्ये जीवन्मुक्तलक्षणं वाच्यम्। द्वितीये ज्ञानादेव मोक्ष इति नियमो न। किंतु ज्ञानमरणाभ्यां मोक्षः इति स्यात्। तत्राह जीवन्मुक्तलक्षणम्—अपाङ्। अप निकृष्टं अञ्चति इति क्वचित् अपकृष्टाधर्मशील इव लक्ष्यते। प्राङ्। क्वचित् प्रकृष्टं धर्ममाचरन्निव लक्ष्यते। तथापि अस्य न पुण्यपापसंबन्ध एति अपगच्छति। यतः एति च। स्वधया ब्रह्मविद्यया। न ब्रह्मविद्यावतः पुण्यपापसंबन्धः। स्वया ब्रह्मविद्यया धीयते। अथवा स्वं दधाति इति स्वधः परमात्मा। तं याति प्रापयतीति। क्विन्। तृतीयैकवचनम्। आतो धातोः। अवग्रहाभावे हेतुरुक्त एव। रुढिशङ्का च जीवन्मुक्तौ न दृश्यते इति केचित्। मर्त्येन स्थूलदेहेन गृभीतः संबद्धः। दुर्ग्रहः संबन्धश्चेत् तर्हि इतरेभ्यः अस्य को भेदः। तत्राह—अमर्त्यः स्वयं न म्रियते कारणदेहच्छेदेऽपि विशीर्यमाणे लिङ्गदेहेऽपि स्थूलदेहानुवृत्तेः। उक्तं च योगशास्त्रे—

कुलालचक्रकं यद्वच्छिन्नमूलोऽङ्कुरो यथा।
यद्वच्छरस्तथाज्ञानच्छिन्नोऽप्यास्ते भवः सताम् ॥

इति। यतः सयोनिः ससंस्कारः। संस्कारोऽपि कारणत्वाद्योनिरुक्तः। यद्वा सयोनिरिव कदाचित् ग्रहस्थाश्रमसहित इव। उपलक्षणत्वात् वर्णाश्रमधर्मवानिव। ननु जीवन्मुक्त-स्थितिरुक्ता न जीवन्मुक्तलक्षणम्। तत्राह—तानि प्रसिद्धानि शश्वन्ता पुनः पुनर्भवानि शरीराणि। बह्वृचारण्यके शरीराणी३ इत्युक्तम्। विषूचीना लोकगतिना। वियन्ता

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

विशिष्टात्मज्ञानेन छेत्ता । यम उपरमे । एष जीवन्मुक्तः । किं सर्वे जीवन्मुक्ताः लिङ्गैर्ज्ञायन्ते । न इत्याह—अन्यं कंचन जीवन्मुक्तं जना लिङ्गैर्निचिक्युः अजानन् । अन्यं न निचिक्युः न अजानन् ।

क्वचिद्दुष्टः क्वचित्तुष्टः क्वचित् पापः क्वचिच्छुचिः ।
जीवन्मुक्तो भ्रमत्येवं नैव कुत्रापि सज्जते ॥
दुर्विज्ञेया गतिस्तेषां योगसंत्यक्तकिल्बिषाः ।
जीवन्मुक्ता विरूपेण पर्यटन्ति महीतले ॥

कल्पस्तु—

धर्मी क्वचिद्धर्मविपर्ययी वा विद्यावशात्तत्र न लिप्यतेऽसौ ।
छेत्तात्मबुद्ध्याखिलदेहबन्धं स जीवमुक्तः क्वचिदेव दृश्यते ॥

इति ॥

ऋचो अक्षरे परमे व्योमन् यस्मिन् देवा अधि विश्वे निषेदुः ।
यस्तन्न वेद किमृचा करिष्यति य इत्तद्विदुस्त इमे समासते ॥ ३९ ॥

पूर्वमन्त्रे देहात्मजीवात्मानावुक्तौ । तयोरन्यस्य जीवात्मनः पारमार्थिकं रूपमस्ति । तदत्रोच्यते । **ऋचः अक्षरे** । अत्र ऋक्शब्देन ऋक्प्रधानभूताः साङ्गापरविद्यात्मकाः चत्वारो वेदा उच्यन्ते । ऋगादीनामपरविद्यात्वं मुण्डके श्रूयते —द्वे विद्ये वेदितव्ये—इति प्रतिज्ञाय—तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदः— इत्यादिना । तस्याः संबन्धिनि अक्षरे अदृश्यादिगुणके क्षरणरहिते अनश्वरे नित्ये सर्वत्र व्याप्ते ब्रह्मणि । अक्षरशब्दस्य ब्रह्मवाचकत्वम्—एतद्वै तदक्षरस्य प्रशासने गार्गि—यया तदक्षरमधिगम्यते—

येनाक्षरं पुरुषं वेद सत्यम् ।

इत्यादिश्रुतिषु प्रसिद्धम् । ऋगक्षरयोः प्रतिपाद्यप्रतिपादकभावः संबन्धः । सर्वैर्वेदैः खलु ब्रह्माधिगम्यते । तं त्वौपनिषदं पुरुषं पृच्छामि—इत्यादिश्रुतेः । ननु उपनिषद्भागानां तथास्तु । इतरेषां तु कथं ब्रह्मविषयत्वं इति । उच्यते । यद्यपीतरभागानां यागादिविषयत्वं तथापि बुद्धिः श्रुत्युत्पादनद्वारा वेदनसाधनत्वेन ब्रह्मविषया भविष्यति । वेदानुवचनेन ब्रह्मणा विविदिषन्ति—इत्यादिश्रुतेः । तदेव विशेष्यते—**परमे**

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

उत्कृष्टे निरतिशये। **व्योमन्** व्योमनि व्योमसदृशे। अलेपत्वनीरूपत्वव्यापित्वादिसादृश्येन व्योमेत्युक्तम्। यद्वा विशेषेण सर्वस्य रक्षके। निरधिष्ठा न कस्यचिदस्ति स्वाध्यः। तस्य सर्वस्याधिष्ठानत्वेन रक्षकत्वात्। तादृशे तत्त्वे सर्वमध्यस्तं इत्यर्थः। पुनस्तदेव विशेष्यते—**यस्मिन्** परमात्मनि **विश्वे** सर्वे **देवाः अधि निषेदुः** निषीदन्ति आश्रित्य तिष्ठन्ति तस्मिन्। यद्वा उक्तलक्षणे वस्तुनि ऋगुपलक्षिताः सर्वे साङ्गा वेदाः पर्यवसिताः इत्यर्थः। **यः** यो मर्त्यः **तत्** तादृशं देवादीनां स्वरूपलाभास्पदं कृत्स्नवेदैः प्रतिपाद्यं तात्पर्यं यद्वस्तु **न वेद** न जानाति स मर्त्यः **ऋचा** पूर्वोक्तेन ऋगादिशब्दजालेन **किं करिष्यति**। वेदनसाधनेन वेदेन वेद्यमविदित्वा किं साधयति इत्यर्थः। प्रयोजनाभावात् सर्वस्यापि वेदस्य नैष्फल्यादिति भावः। अथवा यः अक्षरमविदित्वा कर्मणां कर्ता भवति यागादीननुतिष्ठति तेन किंचिदपि कर्म कृतं न भवति इत्यर्थः। **ये इत्** ये एव **तत्** तत्त्वं **विदुः** जानन्ति **ते इमे सं आसते** ते एव इमे ज्ञातारः समासते सम्यक् तिष्ठन्ति। अपुनरावृत्त्या स्वरूपेऽवस्थानं समासनम्। यद्वा ये विदुरित् ये जानन्त्येव नानुतिष्ठन्ति। इच्छब्दोऽवधारणे। ते इमे ते एव समासते। गवामयनादिसहस्रसंवत्सरसत्रपर्यन्तानि सहोपयन्ति। सहार्थे संशब्दः। सत्त्रादधिकानां यागानामभावात् तेषामपि फलमेतज्ज्ञानेनैव प्राप्तं भवति इत्यर्थः। कर्तॄणां बहुत्वात् बहुवचननिर्देशः।

अन्ये तु अन्यथा वर्णयन्ति। ऋचः। ऋक् अर्चनीयमादित्यमण्डलं ऋगादिमयं वा। ऋग्भिः पूर्वाह्णे दिवि देव ईयते—आदित्यो वा एष एतन्मण्डलं तपति तत्र ता ऋचः---इत्यादिश्रुतेः। तस्य संबन्धिनि अक्षरे परमे व्योमन् इति उक्तलक्षणे ब्रह्मणि—य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते—इत्यादिश्रुत्युक्तस्वरूपे। यस्मिन् सर्वे देवा द्योतमाना रश्मयो निषेदुः वर्तन्ते। यः एतन्न वेद सः केवलया ऋचा किं करिष्यति। ये जानन्ति भावयन्ति ते एव विद्वांसः समासते भूम्यां सुखेन रोगादिरहिता भोगिनः सन्तः चिरकालं जीवन्ति।

अपरे प्रकारान्तरेण प्रतिपादयन्ति। ऋचः अक्षरे ऋगुपलक्षितसर्ववेदसंबन्धिनि अक्षरे प्रणवरूपे ओंकारे अविनाशिनि सर्ववेदेषु व्याप्ते वा। प्रणवस्य सर्ववेदसारत्वं ब्राह्मणे श्रूयते— तान् वेदान् अभ्यतपत्। तेभ्योऽभितप्तेभ्यः त्रयो वर्णा

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

अजायन्त अकारः उकारः मकारः इति । तानेकधा समभरत् । तदेतदों इति— इति । परमे निरतिशये । न हि प्रणवादधिकं किंचिन्मन्त्रजातमस्ति त्रिकालातीतस्य ब्रह्मणः प्रतिपादकत्वात् । यच्चान्यत् त्रिकालातीतं तदप्योंकार एव—ओमिति ब्रह्म—इत्यादिश्रुतेः । वेदानां प्रणवस्य स्थानप्रतिनिधिभावः संबन्धः—यो ऋचोऽधीते—इत्याद्युपक्रम्य—यः प्रणवमधीते स सर्वमधीते ओमिति प्रतिपद्यते । एतद्वै यजुः । त्रयीं विद्यां प्रत्येषा वागेतत् परममक्षरम्—इत्यादिश्रुतेः । यस्मिन् विश्वे सर्वे देवा अधि निषेदुः । प्रणवस्य सर्वमन्त्रात्मकत्वात् मन्त्रेषु सर्वदेवानां निवासात् सर्वदेवनिवासत्वम् । ब्रह्माधिष्ठानत्वाद्वा ब्रह्मणि सर्वदेवानां निवासात् । शिष्टमविशिष्टम् । अयं मन्त्रो निरुक्ते व्याख्यातः ।

अपरे त्वपरथा वर्णयन्ति । ऋचः । ऋक् अर्चनीयो जीवः । तस्य संबन्धिनि अक्षरे अविनाशे व्याप्ते वा । परमात्मनि इत्यर्थः । अत एव जीवापेक्षया परमे उत्कृष्टे निरुपाधिके व्योमन् विशेषेण सर्वाधिष्ठानत्वेन रक्षके व्योमसदृशे वा । यस्मिन् परमात्मनि देवा गमनवन्तो व्यवहरन्तो वा इन्द्रियसंज्ञका विश्वे सर्वे अपि अधिनिषेदुः निषीदन्ति आश्रित्य वर्तन्ते । यस्तन्न वेद न जानाति उपाध्यंशपरित्यागे तदेव स्वरूपमिति न पश्यति सः स्थूलो जनः किमृचा करिष्यति । केवलेन जीवेन जीवभावेन किं फलं प्राप्स्यति । जननमरणादिक्लेशस्य अत्यागात् इति भावः । ये तत्तत्त्वं विदुः ते इत्यादि सिद्धम् ॥

३९. विऽओमन्-नि॒ऽसे॒दुः—इति पदपाठः ।

वियन्ता विशिष्टात्मज्ञानेन छेत्ता इत्युक्तम् । किं तद्विशिष्टमात्मज्ञानम् । तत्रोत्तरम् । ऋचः अजहल्लक्षणया अत्र ऋग्वेदादयो वेदाः । अक्षरे । अश्नुते व्याप्नोति विषयान् इत्यक्षरम् । तस्मिन्नक्षरे जीवात्मनि । परैर्मीयते इति परमम् । तस्मिन् तत्पदार्थे । व्योमन् व्यापके । वाक्यार्थे ब्रह्मात्मैक्ये । वाक्यार्थे व्यापके । असिपदार्थे इत्येके । एवं त्रिधैव वेदं इति । कर्मकाण्डविषया वेदाः त्वंपदार्थविषयाः । सगुणेशविषया वेदाः तत्पदार्थविषयाः । वेदान्तास्तु ब्रह्मात्मैक्यपराः । एवं सर्वेऽपि वेदाः ब्रह्मात्मैक्यविषया इति ज्ञात्वा ब्रह्मात्मैक्यावधारणं विशिष्टात्मज्ञानम् । यस्मिन् त्रिधा स्थिते आत्मनि वेदाः इन्द्रियदेवाः । ईशज्ञप्त्या आधिकारिका अन्तरिक्षादिस्थानगा देवाश्च

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

वैराजाश्विन्मया देवाश्च । अधि उपरि । उपरि विशिष्टाः सर्वेऽपि निषण्णाः अन्तर्भूताः इति काण्डत्रयविषया वेदाः ब्रह्मविषया एव । यस्तु पुरुषः तत् ब्रह्म न वेद स ऋचा ऋगादिवेदैः किं करिष्यति । केनोपायेन आत्मानं संसारादुद्धरिष्यति । ये तु तद्ब्रह्म विदन्ति ते इमे दृष्यमाना जीवन्त एव समासते सम्यगासते । समासनं मुक्तिः । कल्पस्तु—

वेदास्तु जीवे परमे तदैक्ये तात्पर्यवन्तस्त्रिविधाः सुराश्च ।
पुमांस्तु तद्ब्रह्म न वेत्ति येन किं तस्य वेदैः स्वधिया वियुक्तैः ॥

इति ॥

अग्निहोत्रार्था धेनुः यदि कुत्सितं शब्दं कुर्यात् तदानीम्—सूयवसात्—इत्यनया यवसादिकं प्रयच्छेत् । तथा च सूत्रितम्—वाश्यमानायै यवसं प्रयच्छेत् सूयवसाद्भगवती हि भूयाः—इति । प्रवर्ग्ये अभिष्टवे एषैव परिधानीया । सूत्रितं च—सूयवसात् भगवती भूयाः इति परिदध्यात्—इति ।

सूयवसाद्भगवती हि भूया अथो वयं भगवन्तः स्याम ।
अद्धितृणमघ्न्ये विश्वदानीं पिब शुद्धमुदकमाचरन्ती ॥ ४० ॥

हे अघ्न्ये । गोनामैतत् । अहननीये हे गौः त्वं **सूयवसात्** शोभनयवसस्य तृणादिकस्य अत्त्री **भगवती** । भग इति धननाम । सर्वैर्भजनीयप्रभूतक्षीरादिधनवती **भूयाः** भव । **हि** । हिः पूरणः प्रसिद्धौ वा । लोके यवसादिभक्षणेन क्षीरादिसमृद्धिः प्रसिद्धा । **अथो** अनन्तरमेव **वयं** यजमानाः अपि **भगवन्तः** प्रभूतेन धनेन तद्वन्तः **स्याम** । अथैकवारं पूर्वमुक्तं इदानीं सर्वदा कर्तव्यं इति प्रार्थयते । **विश्वदानीं** विश्वकालं सर्वदा **तृणं अद्धि** भक्षय । **आचरन्ती** सर्वतो निर्गच्छन्ती **शुद्धं** निर्मलं **उदकं पिब** । अयं च मन्त्रो यास्केन व्याख्यातः—सूयवसादिनी भगवती हि भवाथेदानीं वयं भगवन्तः स्यामाद्धि तृणमघ्न्ये सर्वदा पिब च शुद्धमुदकमाचरन्ती—इति ॥

४०. सुयवसऽअत्-भगऽवती-अथो इति-भगऽवन्तः-विश्वऽदानीम्-आऽचरन्ती—इति पदपाठः ।

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

ब्रह्मविद्यानुभवपर्यन्तं इतरकाण्डानुष्ठानमावश्यकं इत्याह। बुद्धिस्वरूपिणीं धेनुं पुरस्कृत्य उच्यते। भो बुद्धे अतिक्लेशात्मकतुच्छफलत्वेन अत्युग्रत्वाच्च कर्म त्याज्यं यथा पातित्यं न भवति तथा। कर्म त्यक्तुं न शक्नोषि चेत् सत्कर्मविषयिणी भूयाः। साधु यवसं सत्कर्म अभिविषयीकरोति इति सूयवसत्। ततो भगवत्येव भविष्यसि। ईश्वरार्पितं कर्म स्यादित्यर्थः। अथो अनन्तरं वयमपि भगवन्तः स्याम शुद्धान्तःकरणाः स्याम। तृणं तृणपर्यन्तं जगत् ईश्वररूपत्वेन अद्धि विषयीकुरु। भो अघ्न्ये भो अघहन्त्रि अहन्तव्ये। विश्वदानीम्। पशुभ्यो रात्रौ दीयमाना सांसारिप्रकृतिका दानी भवति। तत्स्थानीयां विश्वखण्डनीयाम्। आचरन्ती लक्षयन्ती शुद्धं निरवद्यं उद्गतानन्दं ब्रह्मरसं पिब आस्वादयस्व। यद्यपि अनया ऋचा वाश्यमानायै होमधेनवे यवसं दीयते तथापि अध्यात्मव्याख्यायां न सा रीतिरादर्तव्या इत्यवोचामः। तद्विनियोगदशायामेव तथाविधस्य उपयुक्तत्वात्। उदकमिति सुखनाम इति शाकपूणिः। यद्वा कं सुखं अकं दुःखम्। उद्गतं अकं यस्मात् तदुदकं सुखरूपं ब्रह्म। तर्हि पूर्वपदप्रकृतिस्वरः स्यात्। पाशादिपाठादन्तोदात्तत्वम्। छान्दसव्यत्ययश्च। यद्वा कात् दुःखात् उद्गतं उदकं इति तत्पुरुषत्वादन्तोदात्तः। कल्पस्तु—

> कार्या क्रिया चेद्विहितैव कार्या सैषार्पिता चेत् सकलात्मके धीः।
> मायाविनाशस्तत आत्मसौख्यप्राकट्यमेवं सति कामधेनुः॥

इति॥

गौरीर्मिमाय सलिलानि तक्षत्येकपदी द्विपदी सा चतुष्पदी।
अष्टापदी नवपदी बभूवुषी सहस्राक्षरा परमे व्योमन्॥ ४१॥

गौरीः गरणशीला माध्यमिका वाक्। सुलोपाभावः छान्दसः। **मिमाय** शब्दयति। किं कुर्वती। **सलिलानि** वृष्ट्युदकानि **तक्षती** सम्यक् संपादयित्री। **एकपदी** एकपादोपेता एकाधिष्ठाना मेघे वर्तमाना गमनसाधनेन वायुना एकपदी वा। **द्विपदी** मेघान्तरिक्षाख्यद्व्यधिष्ठाना। आदित्यो वा द्वितीयः। तथा **सा चतुष्पदी** पादचतुष्टयोपेता दिक्चतुष्टयाधिष्ठाना। अथ **अष्टापदी** विदिगपेक्षया अष्टपादोपेता अष्टाधिष्ठाना। **नवपदी** उपरिदिगपेक्षया सूर्येण वा नवदिगधिष्ठाना। **बभूवुषी** एवंभूता। भवेः छान्दसः क्वसुः। ततो ङीपि वसोः संप्रसारणम्। किमनया परिगणनया। **सहस्राक्षरा**। अपरिमितवचनोऽयम्। अपरिमितव्याप्ति-

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

युक्ता। बहुव्यापनशीलोदकवती इत्यर्थः। कुत्रेति तदुच्यते। **परमे व्योमन्** उदकाश्रयत्वेन उत्कृष्टे अन्तरिक्षे।

केचिदेवमाहुः—गौरीः गरणशीला शब्दब्रह्मात्मिका वाक् मिमाय माति। प्रसिद्धार्थे धातुः। सलिलप्रतिष्ठितानि घटादिद्रव्याणि तक्षती तत्तद्वाचकत्वेन एकप्रतिष्ठाना एकरूपा वा प्रणवात्मना द्विपदी सुप्तिङ्भेदेन पादद्वयवती। चतुष्पदी नामाख्यातोपसर्गनिपातभेदेन। अष्टापदी आमन्त्रितसहिताष्टविभक्तिभेदेन अष्टपदी। नवपदी बभूवुषी साव्ययैरुक्तैरष्टभिर्नवपदी। अथवा सनाभिकेषु उरः-कण्ठादिषु नवसु पदेषु भवन्ती। पश्चाद्बहुविधाभिव्यक्तिमुपेयुषी परमे व्योमन् उत्कृष्टे हृदयाकाशे मूलाधारे सहस्राक्षरा अनेकाकारेण व्याप्ता अनेकध्वनि प्रकारा भवति इत्यर्थः। अयं मन्त्रः आचार्येण एवं व्याख्यातः—गौरीर्मिमाय सलिलानि तक्षती कुर्वती एकपदी मध्यमेन द्विपदी मध्यमेन चादित्येन च चतुष्पदी दिग्भिरष्टा-पदी दिग्भिश्चावान्तरदिग्भिश्च नवपदी दिग्भिश्चावान्तरदिग्भिश्चादित्येन च सहस्राक्षरा बहूदका परमे व्यवने—इति।

४१. एकऽपदी द्विऽपदी-चतुःऽपदी-अष्टाऽपदी नवऽपदी-
सहस्रऽअक्षरा-विऽओमन्—इति पदपाठः।

ननु अनेकेषां ब्रह्मवादिनां अनेकधा प्रतिपादितप्रकाराः सन्ति। तत्र कीदृशः प्रामाणिकः प्रकारः कीदृशो न इत्युच्यते। अद्वैतपर्यवसायी सः सर्वोऽपि प्रामाणिक एव इत्यभिप्रेत्याह—गौरीः। गौरं शुद्धं ब्रह्म। तत्परा श्रुतिः गौरीः। मत्वर्थे ईप्रत्ययः। मिमाय प्रतिपादयति। सलिलानि। बहुनामैतत्। बहूनि वस्तूनि। यद्वा सलिलानि स्वयं प्रतिपादितान्यपि सन्ति लीलानि सम्यग्ज्ञाननिवर्त्यानि। यद्वा सः तत्पदार्थः। लिः त्वंपदार्थः। लं असिपदार्थः। तानि उदकादीनि तत्त्वानि। तत् कुर्वती एकं तत्त्वं प्रमिनयन्ती एकस्मिन् तत्त्वे विलापयन्ती सती एकपदी भवति। पद्यते ज्ञायते इति पादो विषयः। बहुव्रीहौ सुब्लोपे—पादोऽन्यतरस्याम्—इति ङीपि पदादेशः। एकः पादो विषयः प्रतिपाद्यो यस्याः। एकमेव ब्रह्म प्रतिपादयन्ती इत्यर्थः। तत्त्वंपदार्थविषयत्वेन द्विपदी इत्यपरे। द्वित्रिभ्यां पाद्दन्मूर्धसु बहुव्रीहौ—इति उत्तरपदाद्युदात्तत्वम्। इहारभ्य वक्ष्यमाणाः पक्षाः पूर्वपूर्वपक्षाशक्तविषयाः। एकपदी द्विपदी त्रिपदीत्यन्ये। तत्त्वमसि-पदार्थविषयत्वात्। सा गौरीः चतुष्पदी इत्यपरे। विश्वतैजसप्राज्ञतुरीयेश्वरविषयत्वात्।

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

द्विपदी चतुष्पदी षट्पदीत्यन्ये। धातुषट्कसमीक्षणात्। एकपदी द्विपती चतुष्पदी सप्तपदीति केचित्। धातुपञ्चकजीवेश्वरविषयत्वात्। अष्टापदी अष्टमूर्तिविषयत्वात्। नवपदी अष्टमूर्तिनिर्गुणविषयत्वात्। एवमनेकधा बभूवुषी भवति गौरीः। अनेन क्रमेण सहस्राक्षरा सहस्रस्यार्थानां प्रतिपादकान्यक्षराणि पदानि यस्याः सा तथोक्ता। एवं-भूता श्रुतिः परमे आत्मनि व्योमन् व्यापके विशेषेणाविद्याया ओतरि अपनेतरि विशेषेण रक्षके वा ब्रह्मणि एकस्मिन्नेव तात्पर्यवती कर्तव्या। तदुक्तं प्रशंसायाम्—

ज्ञातुरज्ञानबाहुल्यात् संप्रदायवशेन वै।
बहूनां कल्पनादेव वेदवाक्यानुसारतः॥
गुर्वी चेत् कल्पना लघ्व्या साधनं यदि जायते।
तत् क्रमेणैकपर्यन्तं ततो मुक्तिरदूरतः॥
अनेकप्रतिभानं चेद्ब्रह्मण्येवागतं भवेत्।
यर्हि वै यस्य सिद्ध्यर्थं यथेष्टं कल्पना तदा॥

इति। कल्पस्तु—

भूयांसि वस्तूनि जगाद वेदः साक्षात स एकार्थपरो बुधानाम्।
द्व्यादिः सहस्रान्तमनूद्य चार्थं तात्पर्यमेकत्र दधाति मुक्तौ॥

इति॥

तस्याः॑ समु॒द्रा अधि॒ वि क्ष॑रन्ति॒ तेन॑ जीवन्ति प्र॒दिश॒श्चत॑स्रः।
ततः॑ क्षरत्य॒क्षर॒ं तद्विश्व॒मुप॑ जीवति॥ ४२॥

तस्या॑ः उक्ताया गोः सकाशात् **स॒मु॒द्राः** वृष्ट्युदकसमुन्दनाधिकरणभूताः मेघाः। **अधि॑** अधिकं प्रभूतमुदकं **वि क्ष॒र॒न्ति॒** विविधं क्षरन्ति। **तेन॑** उदकेन **प्र॒दिश॑ः चत॑स्रः**। तत्स्थेषु ताच्छब्द्यम्। तत्स्थाः पुरुषाः **जी॒व॒न्ति॒**। **तत॑ः** पश्चात् तत् **अ॒क्षर॑ं** उदकं **क्ष॒र॒ति॒**। सस्यादिकमुत्पादयति इत्यर्थः। **तत्** सस्यादिकं **विश्व॑ं** जगत् **उप॑ जी॒व॒ति॒**। अयमपि यास्केन व्याख्यातः—तस्याः समुद्रा अधिवि-क्षरन्ति वर्षन्ति मेघास्तेन जीवन्ति दिगाश्रयाणि भूतानि ततः क्षरत्यक्षरमुदकं तत्सर्वाणि भूतान्युपजीवन्ति—इति॥

४२. प्र॒ऽदिश॑ः इति पदपाठः।

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

ननु सर्वासां श्रुतीनां ब्रह्मपरत्वे पुण्यविषयश्रुत्यभावेन पुण्यपापाभावः स्यात् । पुण्यपापाभावे तन्मूलसंस्कारवन्मोक्षाभावः स्यात् । तत्रेदमुत्तरम् । तस्याः ब्रह्मविषयायाः गौर्याः संबन्धिन्याः समुद्रा अवान्तरवाचः । वाक्यैकवाक्यतापक्षे एव श्रौतः । न तु पदैकवाक्यतापक्षे इति सूचितम् । तस्याः समुद्रा इति वाचः समुद्राः—इत्यनुक्रमणिका । समुद्रा इति वाच इत्यर्थः । तस्या अक्षरं इत्यापः । सा प्रस्तारपङ्क्तिः । तस्याः समुद्राः इति ऋगेव । समुद्द्रवन्ति अर्थान् इति च समुद्राः । समुद्द्रवन्त्याप एभ्य इति वाचः । तथा मुदं आनन्दं राति ददाति इति मुद्रा ब्रह्मविद्या इति च । तत्सहिताः तदेकवाक्यतां गताः अवान्तरवाचः समुद्राः । ब्रह्मविद्यायां महातात्पर्यवती गौरीः । आह चोपवर्ष.—

बोध्यान्तरात्यये वाचां महातात्पर्यमुच्यते ।
अन्यार्थमुच्यतेऽन्यच्चेत् तदवान्तरशब्दितम् ॥

इति । न चान्यपराणामर्थो न ग्राह्यः प्रमाणान्तरविरोधिप्रतीतार्थपरित्यागे कारणाभावात् स्वार्थपर्यवसितानामेव वाक्यानाम्—

सर्वे वेदा यत्पदमामनन्ति ।

इत्यादिश्रुतिस्मृत्यादिभिर्महातात्पर्यं ब्रह्मणि बोध्यते । ता वाचः अधि अधिकं धर्माधर्मात्मकं वस्तु विविधया विधिप्रतिषेधात्मकरीत्या क्षरन्ति उपलक्षयन्ति बोधयन्ति । यथा हि वत्सपायने तात्पर्यवन्त्योऽपि धेनवः प्रसङ्गात् स्वामिभ्योऽपि क्षीरं समर्पयति तथेत्यर्थः । तेन श्रुत्युपक्षिप्तधर्मादिना जीवन्ति जीवीभूय प्रयतन्ते । जीवा इव आचरन्ति । परमार्थतो मिथ्यात्वात् । आचारे क्विप् । प्रदिशः प्रदेशितस्य विधिप्रतिषेधात्मकरीत्या शास्त्रस्य योग्याः । चतस्रः ब्राह्मणाद्याश्चतस्रो जातयः । जातिमतामिह लक्षणा । ततः ब्राह्मणाद्याचरितधर्मादेः क्षरति वर्षासु पतति अक्षरमुदकम् । तद्विश्वं स्थावरजङ्गमात्मकं जगत् उप उपेत्य स्वीकृत्य जीवति निर्वहति । अतो जगद्धात्री भवतीत्यर्थः । कल्पस्तु—

या ब्रह्मसूत्या उपवाच एता धर्मादिमाहुस्तत एव लोकः ।
धर्मादिना तेन पयःप्रपातं तद्विश्वमादाय वहत्यजस्रम् ॥
अतः सर्वश्रुतीनां स्यान्महातात्पर्यमात्मनि ।
मानान्तराविरोधे तु प्रतीतोऽर्थो न चोद्यते ॥

इति ॥

शकमयं धूममारादपश्यं विषूवता पर एनावरेण ।
उक्षाणं पृश्निमपचन्त वीरास्तानि धर्माणि प्रथमान्यासन् ॥ ४३ ॥

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

शकमयं शकृन्मयं शुष्कगोमयसंभूतं **धूमं आरात्** नातिदूरे **अपश्यं** दृष्टवानस्मि। दिवा धूमस्य दूरे दृश्यमानत्वात् स एव दर्शनविषयतया उक्तः। **विषुवता** व्याप्तिमता **एना** अनेन **अवरेण** निकृष्टेन धूमेन **परः** परस्तात् तत्कारणभूतमग्निं अपश्यम्। अहं यजमानः इत्यर्थः। किंच **उक्षाणं** फलस्य सेक्तारं **पृश्निं** शुक्लवर्णम्। प्राश्नुते तेन फलं इति स्वयं प्राश्नुते इति वा पृश्निर्वल्लीरूपः सोमः। तं **वीराः** विविधेरणकुशलाः ऋत्विजः **अपचन्त**। अत्र धात्वर्थानादरेण तिङ्प्रत्ययः करोत्यर्थः। स च क्रियासामान्यवचनः। अत्र औचित्यादभिषवेण संपादितवन्त इत्यर्थः। **तानि** तत्साधनानि **धर्माणि** अनुष्ठानानि **प्रथमानि** प्रथमानि प्रकृष्टानि फलपर्यवसायीनि **आसन्** संपादितान्यासन्। यद्वा—

सोम उक्षाभवत् पूर्वं तं देवाः शकृतापचन्।
यज्ञार्थे तद्भवो धूमो मेध आसीत्तदुच्यते।
तत्परत्वेन वा मन्त्रो व्याख्येयोऽयं विचक्षणैः॥

४३. शकऽमयम्-विषुऽवता-इति पदपाठः।

ननु महावाक्ये स्थितानां का गतिः। का च अवान्तरवाक्येषु स्थितानाम्। महावाक्यप्राप्तौ च किं साधारणं कारणम्। एतेषां त्रयाणां प्रश्नानां क्रमेण उत्तरमाह। यागसमाप्तावपि अदग्धहविर्जनितो धूमः शकधूमः। तदुपस्थानमनेन—इति भारद्वाजसूत्रम्। उक्तं च—शकमयमिति शकधूमः इति। अत्रैव मन्त्रे उक्षाणं पृश्निम्—इति उक्षपदेन सोम उच्यते इत्यनुक्रमणिका। ज्ञानकाण्डे पुनः शकमयं धूमं इत्यस्य अन्य एवार्थः। अधियागाविनियोगविषयमन्त्रत्वे सति उपनिषत्सु सत्त्वात्। अत एव प्रयोगसमवेतार्थप्रकाशकत्वं नास्ति। प्रयोगाभावान्मन्त्रत्वेऽपि जपपारायणादिविनियुक्तानामदृष्टार्थानामर्थः प्रकाश्यते। अध्यात्मपरवाक्याभ्यासेन फलाधिक्यम्। तदाह वृद्धमनुः—

अध्यात्मवाक्यजपनादुक्तं कोटिगुणं भवेत्।
तदर्थमनुसंधत्ते जपंश्चेदीश एव सः॥

इति। शकमयं नानाशक्तिमयं धूमं धूमसदृशं आवरकाज्ञानं ऐश्वरम्। आरात् दूरतो गतं तद्विषये कुण्ठितशक्तिकम्। विषूवता सर्वत्र प्रसृतेन ब्रह्मणा एना प्रत्यक्षादिप्रमाणसिद्धेन अनेन अवरेण जीवराशिना सह स्थितं धूमम्। महावाक्यार्थधिया परो विगलिताविद्यः अहमपश्यं पश्यामि। अत्रेयं वेदान्तसंप्रदायस्थितिः। ईशमाया एका नित्या अनादि-

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

व्यापिका च। तच्छाया जीवमूलाख्या माया अनादयः अनन्ताश्च। ज्ञाननाश्यत्वात् ज्ञाने सति ज्ञानिनं प्रति ईशमाया कुण्ठितशक्तिर्भवति न नश्यति। सर्वमुक्तिप्रसङ्गात्। सूर्यसमीपस्थरात्र्यभाववत् रज्जुसमीपस्थसर्पाभाववच्च मुक्तं प्रति सर्वमायानामभावः। तदुक्तं वसिष्ठेन वेदान्तकारिकायाम्—

एका मायेशितुः स्याद्विनशनरहितानादिका व्यापिका स्या-
ज्जीवाविद्या अनन्ता प्रथमविरहिता ब्रह्मविद्याविनाश्याः।
ज्ञानी सर्वा च मायां परिहरति तथा सूर्यपार्श्वस्थरात्री
रज्ज्वाः पार्श्वस्थसर्पं शमयति महतीत्यन्यथा सर्वमुक्तिः॥

इति। अथ अवान्तरस्थितान् प्रति आह—उक्षाणं गोपयसा उक्षमाणं सिच्यमानं ज्ञीप्साविषयं सगुणरूपं कर्म च। उक्ष सेचने। अजहल्लक्षणया अत्र पशुपुरोडाशादेरपि ग्रहः। पृश्निम्। स्वर्गनामैतत्। साधने साध्योपचारः। यथा—गोभिः श्रीणीत मत्सरम्। नड्वलोदकं पादरोगः—इति। पृश्निं स्वर्गादिहेतुं काम्यसोमादिकं अपचन्त। धातूनामनेकार्थत्वात् संस्कुर्वन्ति। वीरा वैदिकाः। ऋग्वेदादिं विशेषेण वेदमीरयन्ति पठन्ति। अमहावाक्यप्राप्तौ साधारणकारणान्याह—तानीति अत्यन्तोत्कृष्टानि यच्छब्दाभावात् नित्यनैमित्तिकरूपाणि धर्माणि पूर्वोक्तानि सोमादीनि धर्मसाधनानि ज्ञानस्य पूर्वसाधनानि साधारणानि च आसन् भवन्ति।

जीवैः समेतां बहुरूपमायामैशीमपश्यं स्वधिया निवृत्ताम्।
अन्यश्रुतिस्था कृतिभिः सुराभा निष्कामकर्मात्मधियो हि हेतुः॥

इति॥

त्रयः॑ के॒शिन॑ ऋतु॒था वि च॑क्षते संवत्स॒रे व॑पत॒ एक॑ एषाम्।
विश्व॒मेको॑ अ॒भि च॑ष्टे॒ शची॑भि॒र्ध्राजि॒रेक॑स्य ददृशे॒ न रू॒पम्॥ ४४॥

के॒शिनः॑ केशस्थानीयप्रकृष्टरश्मियुक्ताः **त्रयः॑** अग्न्यादित्यवायवः। ते च **ऋ॒तु॒था** काले काले **वि च॒क्ष॒ते** विविधलक्षणां भूमिं पश्यन्ति। तेषां पृथक्पृथक् कार्यमाह—**ए॒षां** मध्ये **एकः॑** अग्निः **सं॒व॒त्स॒रे** अतीते सति यद्वा प्रतिसंवत्सरं **व॒प॒ते** दाहेन केशस्थानीयौषधिवनस्पत्यादिच्छेदनं नापितकार्यं करोति। **एकः॑** अन्य आदित्यः **विश्वं॑** सर्वं जगत् **शची॑भिः** स्वकीयैः प्रकाशवृष्ट्यादिकर्मभिः **अ॒भि च॒ष्टे॒** सर्वतः पश्यति। **एक॑स्य** वायोः **ध्राजिः॑** गतिः **द॒दृ॒शे॒** दृश्यते सर्वैः। **न रू॒पम्।**

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

अप्रत्यक्षत्वात् स्पर्शशब्दकम्पलिङ्गैः गम्यते इति हि न्यायविदो वदन्ति । अयमपि मन्त्रो यास्केनैवं व्याख्यातः—त्रयः केशिन ऋतुथा विचक्षते काले काले अभिविपश्यन्ति संवत्सरे वपत एक एषामित्यग्निः पृथिवीं दहति सर्वमेकोऽभिपश्यति कर्मभिरादित्यो गतिरेकस्य दृश्यते न रूपं मध्यमस्य—इति ॥

४४. ऋतुऽथा इति पदपाठः ।

लाक्षणिका क्रिया फलं कथं सूते । अचेतना च कथं फलदा । इत्याशङ्क्य तुष्टेशावयवा देवता एव तत्कर्मवशात् फलदा इति वक्तुं अनन्ता अपि देवाः त्रिष्वेव देवेषु अन्तर्भूताः इत्यभिप्रेत्य आह—त्रयो देवाः अग्निर्वायुः सूर्यश्च केशिनः दीप्तयः । तत्तस्थानस्था देवता एव वा केशाः । तद्वन्तः भूम्यन्तरिक्षस्वर्गस्थाः । पार्थिवाः सर्वे अग्नौ अन्तर्भवन्ति इति अग्निरुच्यते । एवमन्तरिक्षस्था देवा वायौ । एवं स्वर्गस्था देवाः सूर्ये । एवमग्निवायुसूर्याः । ऋतुथा । था हेतौ च छन्दसि—इति हेतौ सप्तम्यन्तात् था छन्दसि । हेतुश्च निमित्तं प्रयोजनं वा । काले कालनिमित्तम् । ऋतुरिति यदा नाम चैकेषां ऋतौ ऋतौ क्रियमाणत्वाद्वा ऋतवो यज्ञाः । ऋतुथा यज्ञनिमित्तम् । विचक्षते दीप्यन्ते स्वकार्यं कुर्वन्ति । संवत्सरे । अग्निरृतुः संवत्सरः—इत्युक्तं संवत्सरमध्ये । ऋतुद्वयं ऋतुद्वयम्—इति च विश्लिष्टोक्तिः । एषां त्रयाणां मध्ये एकः अग्निः वपते वसन्तग्रीष्मयोः दहति उपरिपतितं तृणादिकम् । तृणदाहदग्धा भूमिः अधिकमौषधादिकं जनयति ।

श्मश्रु वपसि प्रभूम ।

तथा—

अप्स्वग्ने सधिष्टव ।

विश्वं जलात्मकं एकः सूर्यः अभि अभ्यात्मं अन्तरस्थं प्रकाश्यते । अध्यात्मपरवाक्याभ्यासेन फलाधिक्यम् । यदाह वृद्धमनुः—

अध्यात्मवाक्यजपनादुक्तं कोटिगुणं भवेत् ।
तदर्थमनुसंधत्ते जपंश्चेदीश एव सः ॥

इति । अथ महावाक्यस्याकर्षणेन चष्टे दर्शयति हेमन्तशिशिरयोः । तदानीमेव औषध्यादिदर्शनपरिपाकादौ ऊष्माधिक्यापाताच्च । शचीभिः स्वव्यापारैः स्वप्रज्ञाभिर्वा ।

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

देवत्रयान्वितं एतत् पदम्। प्रावृट्शरदोस्तु ध्राजिः शब्द एव एकस्य वायोर्दृश्यते। नैव रूपमस्य दृश्यते। तथा—

आत्मा देवानां भुवनस्य गर्भः।

इति मन्त्रप्रापिकार्था वा उपलक्षणार्था इयमृक्। कल्पस्तु—

भूखस्वरीशा अनलानिलेनाः स्वकर्मभिश्चित्रितलोकयात्राः।
त्रिष्वेव देवाः सकलाश्च सन्ति दद्युः फलं कर्मणि नाशिनस्ते॥

इति॥

चत्वारि वाक् परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः।
गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति॥ ४५॥

वाक् वाचः कृत्स्नायाः **पदानि चत्वारि परिमिता** परिमितानि। लोके या वागस्ति सा चतुर्विधा विभक्ता इत्यर्थः। **तानि** पदानि **ब्राह्मणाः** वेदविदः **ये मनीषिणः** मनस ईषिणः मेधाविनः **विदुः** जानन्ति। तेषां मध्ये **त्रीणि गुहा** गुहायां **निहिता** स्थापितानि **न इङ्गयन्ति** न चेष्टन्ते। न प्रकाशन्ते इत्यर्थः। **वाचः तुरीयं** पदं **मनुष्याः** अज्ञास्तज्ज्ञाश्च **वदन्ति** व्यक्तमुच्चारयन्ति व्यवहरन्ति। कानि तानि चत्वारि इत्यत्र बहवः स्वस्वमतानुरोधेन बहुधा वर्णयन्ति। सर्ववैदिक वाग्जालस्य संग्रहरूपा भूरादयः तिस्रो व्याहृतयः प्रणव एकः इति वेदत्रयसारत्वात् तासां व्याहृतीनामेव सारसंग्रहभूतत्वादकाराद्यात्मकस्य प्रणवस्य इति सप्रणवासु व्याहृतिषु सर्वा वाक् परिमिता इति केचन वेदवादिनो वदन्ति। अपरे व्याकरण-मतानुसारिणः नामाख्यातोपसर्गनिपातभेदेन। क्रियाप्रधानमाख्यातम्। द्रव्य-प्रधानं नाम। प्रागुपसृज्यते आख्यातपदस्य इति उपसर्गः प्रादिः। उच्चाव-चेष्वर्थेषु निपतनात् निपातः अपितुचेत्यादिः। एतेष्वेव सर्वा वाक् परिमिता इत्यखण्डायाः कृत्स्नायाः वाचः चतुर्धा व्याकृतत्वात्। वाग्वै पराच्यव्याकृतावदत्। तामिन्द्रो मध्यतोऽवक्रम्य व्याकरोत्। तस्मादियं व्याकृता वागुद्यते—इति श्रुतेः। अन्ये तु याज्ञिका मन्त्राः कल्पो ब्राह्मणं चतुर्थो लौकिकी इति। याज्ञिकैः समाख्यातः अनुष्ठेयार्थप्रकाशको वेदभागः मन्त्राः। मन्त्रविधानप्रतिपादको वेदभागः —इति मन्त्राः। कल्पोऽत ऊर्ध्वम्—इत्यादिना उक्तः कल्पः। मन्त्रतात्पर्यार्थ-

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

प्रकाशको वेदभागो ब्राह्मणम्। भोगविषया—गामानय—इत्यादिरूपा व्यावहारिकी। एष्वेव सर्वा वाक् नियमिता इति याज्ञिकाः। ऋग्यजुःसामानि चतुर्थो व्यावहारिकी इति नैरुक्ताः। सर्पाणां वाक् वयसां क्षुद्रसरीसृपस्य च चतुर्थो व्यावहारिकी इत्यैतिहासिकाः। पशुषु तूणवेषु मृगेषु आत्मनि च इत्यात्मवादिनः। अपरे मान्त्रिकाः प्रकारान्तरेण प्रतिपादयन्ति। परा पश्यन्ती मध्यमा वैखरी इति चत्वारि इति। एकैव नादात्मिका वाक् मूलाधारादुदिता सती परा इत्युच्यते। नादस्य च सूक्ष्मत्वेन दुर्निरूपत्वात् सैव हृदयगामिनी पश्यन्ती इत्युच्यते। योगिभिर्द्रष्टुं शक्यत्वात्। सैव बुद्धिं गता विवक्षां प्राप्ता मध्यमा इत्युच्यते। मध्ये हृदयाख्ये उदीयमानत्वान्मध्यमायाः। अथ यदा सैव वक्त्रस्थिता ताल्वोष्ठादिव्यापारेण बहिर्निर्गच्छति तदा वैखरी इत्युच्यते। एवं चत्वारि वाचः पदानि परिमितानि। मनीषिणो मनसः स्वामिनः स्वाधीनमनस्का ब्राह्मणा गवाख्यस्य शब्दब्रह्मणः अधिगन्तारः योगिनः परादिचत्वारि पदानि विदुः जानन्ति। तेषु मध्ये त्रीणि परादीनि गुहानिहितानि हृदयान्तर्वर्तित्वात्। तुरीयं तु पदं वैखरीसंज्ञकं मनुष्याः सर्वे वदन्ति। व्याकरणप्रसिद्धानां आख्याताादिपक्षे मनीषिणो ब्राह्मणाः प्रकृति-प्रत्ययादिविभागज्ञाः वाग्योगविदः तानि पदानि जानन्ति। अवाग्योगविदः पामराः वाचो वाङ्मयस्य तुरीयं चतुर्थं भागं वदन्ति व्यवहरन्ति अर्थप्रकाशनाय प्रयुञ्जते। अयं मन्त्रो निरुक्ते व्याख्यातः। सोऽत्राप्यनुसन्धेयः—अथापि ब्राह्मणं भवति। सा वै वाक् सृष्टा चतुर्धा व्यभवत्। एष्वेव लोकेषु त्रीणि पशुषु तुरीयम्। या पृथिव्यां सा अग्नौ सा रथन्तरे। या अन्तरिक्षे सा वायौ सा वामदेव्ये। यादिवि सा आदित्ये सा बृहति सा स्तनयित्नौ। अथ पशुषु ततो या वागत्यरिच्यत। तां ब्राह्मणेष्वदधुः। तस्माद्ब्राह्मणा उभयीं वाचं वदन्ति या च देवानां या च मनुष्याणाम्—इति।

४५. परिऽमिता-निऽहिता-इति—पदपाठः।

नन्वेवं देवतासद्भावे सति उपासितप्रसन्नीकृतदैवतस्य अधीतवेदस्य श्रुतव्याकरण-मीमांसाद्वयव्युत्पन्नपदपदार्थस्य आचार्यं विनापि ब्रह्मज्ञानमुत्पत्स्यते इत्याचार्येण अलम्। तत्राह—चत्वारि वाक् वाचो वेदस्य परिमितानि गणितानि। पद्यन्ते इति पदानि

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

विषया:। तानि सर्वाणि कात्स्न्र्येन विदुः विदन्ति ब्राह्मणा वेदज्ञा:। न सर्वे ब्राह्मणा:। किंतु ये मनीषिण: ये गुरुप्रसादजनितज्ञानवन्त:। गुरुरहितानां तु गुहा गुहायां महापुरुषबुद्धौ त्रीणि पदानि निहितानि निलीनानि गुप्तानि नेङ्गयन्ति नात्मानं प्रकाशयन्ति नैव वा प्रकाशन्ते। तुरीयं भागं मनुष्या गुरुरहिता: प्रतिपादयन्ति। अयं भाव:। तुरीयप्राज्ञतैजसविश्वा: प्रत्येकं मनसा चतुर्भागीकरणीया:। तानि गुरुमन्त: कात्स्न्र्येन विदन्ति। गुरुरहिता: प्राज्ञा अपि भागत्रयं न विदन्त्येव। तेषां स तत्र चतुर्भागमात्रं प्रकाशते। अत: गुरुमन्त एव वेदतात्पर्यज्ञा:। अन्यस्त्वाह। तुरीयं प्राज्ञतैजसान्यं चतुर्थं मनुष्या वदन्ति इति। अपर आह। परा पश्यन्ती मध्यमा वैखरी इति। मनुष्या: वैखरीमेव वदन्ति इति। नामाख्यातोपसर्गनिपातेषु चतुर्थं भागं वदन्ति इत्यपरे। एवं धर्मार्थकाममोक्षेषु इत्यन्ये। कल्पस्तु—

> चत्वारि वाचो मिमते पदानि स्वाचार्यवन्त: खलु तानि विद्युः।
> त्रीण्यत्र गुह्यानि गुरूदितानि तुर्यं हि भागं प्रवदन्ति मर्त्या:॥

इति।

इन्द्रं॑ मि॒त्रं वरु॑णम॒ग्निमा॑हु॒रथो॑ दि॒व्यः स सु॑प॒र्णो ग॒रुत्मा॑न्।
एकं॒ सद्विप्रा॑ बहु॒धा व॑दन्त्य॒ग्निं य॒मं मा॑त॒रिश्वा॑नमाहुः॥ ४६॥

अमुमादित्यं ऐश्वर्यविशिष्टं **इन्द्रं आहुः**। तथा **मित्रं** प्रमीतेर्मरणात् त्रातारं अहरभिमानिनं एतन्नामकं देवं तमाहुः। **वरुणं** पापस्य निवारकं रात्र्यभिमानिनं देवमाहुः। तथा **अग्निं** अङ्गनादिगुणविशिष्टं एतन्नामकमाहुः। **अथो** अपि च **स:** अयमेव **दिव्य:** दिवि भव: **सुपर्ण:** सुपतनो **गरुत्मान्** गरणवान् पक्षवान् वा। एतन्नामको य: पक्षी अस्ति सोऽप्ययमेव। कथमेकस्य नानात्वमिति। उच्यते। अमुमेवादित्यं **एक** एव वस्तुत: **सत्** सन्तं **विप्रा:** मेधाविन: देवतातत्त्वविद: **बहुधा वदन्ति** तत्तत्कार्यकरणेन इन्द्राद्यात्मानं वदन्ति। एकैव वा महानात्मा देवता। स **सूर्य** इत्याचक्षते—इत्युक्तत्वात्। किंच तमेव **अग्निं** वृष्ट्यादिकारणं वैद्युताग्निं **यमं** नियन्तारं **मातरिश्वानं** अन्तरिक्षे श्वसन्तं वायुं **आहुः**। सूर्यस्य ब्रह्मणोऽनन्यत्वेन सार्वात्म्यमुक्तं भवति। अत्र ये केचित्—अग्नि: सर्वा देवता:—इत्यादि श्रुतित: अयमेवाग्निरुत्तरे अपि ज्योतिषी इति मत्वा अग्नेरेव सार्वात्म्यप्रतिपादकोऽयं मन्त्र: इति वदन्ति। तत्पक्षे प्रथमोऽग्निशब्द: उद्देश्य:। तमग्निमुद्दिश्य इन्द्राद्यात्मकत्व-

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

कथनम्। अयं मन्त्रो निरुक्ते एवं व्याख्यातः—इममेवाग्निं महान्तमात्मानमेकमात्मानं बहुधा मेधाविनो वदन्ति इन्द्रं मित्रं वरुणमग्निं दिव्यं च गरुत्मन्तम्। दिव्यो दिविजो गरुत्मान् गरणवान् गुर्वात्मा महात्मेति वा—इति।

४६. अथो इति॑ सु॒ऽप॒र्णः—इति पदपाठः।

ननु—चत्वारि वाक्—इति पदार्थानां नानार्थत्वमुक्तम्। तर्हि द्वैतापत्तिः इत्याशङ्क्य आह। एकैव देवता परमात्मा सर्वदेवता। एकस्यैव नानानामग्रहणं इत्युच्यते। यद्वा—त्रयः केशिनः—इत्यत्र देवतात्रित्वमुक्तम्। तर्हि इन्द्रादयो न काश्चिद्देवता इत्याशङ्क्याह। एकैव देवता परमात्मा सर्वदेवता। एकस्यैव नानानामग्रहणम्। त्रित्वोक्तिस्तु नानादेवतानां त्रित्वसंख्यावरोधार्थं यज्ञादिप्रवृत्त्यर्थम्। तदुच्यते—इन्द्रं परेशं आहुः—

अहन्नहिं पर्वते शिश्रियाणम्।

इत्यादौ। मित्रं परेशमाहुः—

मित्रो जनान् यातयति ब्रुवाणः।

इत्यादौ। वरुणं परेशमाहुः—

शतं ते राजन् भिषजः।

इत्यादौ। अग्निं परेशमाहुः—

त्वमग्ने रुद्र।

इत्यादौ। अथो तथा दिव्यः सूर्यः। तं परेशमाहुः—

चित्रं देवानाम्।

इत्यादौ। स परेशो गरुत्मान् सुपर्णः इत्याहुः।

सौवर्णपक्षममितद्युतिमप्रमेयं छन्दोमयं विविधयज्ञतनुं वरेण्यम्।
पक्षौ बृहच्च भवतो रथवच्च यस्य तं वैनतेयमजरं प्रणमामि नित्यम्॥

इदानीं अग्निं परेशमाहुः। अग्निशब्दोऽत्र नेत्राग्निमतो रुद्रस्य वाचकः।

स्थिरेभिरङ्गैः।
अर्हन् बिभर्षि।

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

इत्यादौ । यमं परेशमाहुः—

त्रिकद्रुकेभिः पतति ।

इत्यादौ । मातरिश्वानं परेशमाहुः—

आत्मा देवानां भुवनस्य गर्भः ।

इत्यादौ । इन्दति इति इन्द्रः । इदि परमैश्वर्ये । मितो हिंसायाः त्रायते इति मित्रः । एवं वृणुते इति वरुणः । अङ्गं नयति इत्यग्निः । अगि गतौ । णीञ् प्रापणे—इति । गत्यार्थाः ज्ञानार्थाः । दिवि महापुरुषबुद्धौ द्योतनवत्यां भवो दिव्यः । शोभनो मोक्षपक्षः सुपर्णः । संसारमोक्षाभ्यां गरुद्भ्यां गरुत्मान् । रोदयति इति रुद्रः । स एव अग्रणीत्वादग्निः । यमयति इति यमः । येन रुष्टेन मातरि मायायां क्षिप्तो जीवः श्वेव भवति स मातरिश्वा । एकं सत् ब्रह्म विप्राः ब्राह्मणत्वाद्यभिमानिनो यज्ञादिसिद्धये बहुधाभिधानेन इन्द्रादिरूपेण आहुः । योजनान्तरे तु विप्रा मेधाविनः तत्त्वविदस्तु इन्द्रादिरूपे बहुधा सद्ब्रह्म एकमाहुः । कल्पस्तु—

इन्द्रादिशब्दा गुणयोगतो वा व्युत्पत्तितो वापि परेशमाहुः ।
विप्रास्तदेकं बहुधा वदन्ति प्राज्ञास्तु नानापि सदेकमाहुः ॥

इति ।

वर्षकामेष्ट्यां तिस्रः पिण्ड्यो होतव्याः । तत्र—कृष्णं नियानम्—इति तृतीयस्यानुवाक्या । कृष्णं नियानं हरयः सुपर्णाः । नियुत्वन्तो ग्रामजितो यथा नरः—इति सूत्रितत्वात् ।

कृष्णं नियानं हरयः सुपर्णा अपो वसाना दिवमुत्पतन्ति ।
त आववृत्रन्त्सदनादृतस्यादिद्घृतेन पृथिवी व्युद्यते ॥ ४७ ॥

कृष्णं कृष्णवर्णं **नियानं** नियमेन गच्छन्तं मेघम् । **हरयः** उदकस्य हर्तारः । **सुपर्णाः** शोभनपतना रश्मयः । **अपः वसानाः** उदकानि वासयन्तो मेघेषु । अद्भिर्मेघान् पूरयन्तः इत्यर्थः । अन्तर्भावितण्यर्थात् द्विकर्मकत्वम् । यद्वा कृष्णं नियानं नियमनं रात्रिः । देवानां हि रात्रिर्दक्षिणायनम् । तत् प्रति । तस्मिन् वर्षकाले इत्यर्थः । एवं कुर्वन्तः **दिवं** द्युलोकं तदाश्रितमादित्यं वा उद्दिश्य **उत् पतन्ति** ऊर्ध्वं गच्छन्ति । **ते** रश्मयः **ऋतस्य सदनात्** उदकस्य स्थानात् आदित्य-

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

मण्डलात् **आ अववृत्रन्** आवर्तन्ते अर्वाञ्च आगच्छन्ति । **आत् इत्** अनन्तरमेव यदा अर्वाक् गच्छन्ति तदानीमेव **घृतेन** उदकेन **पृथिवी वि उद्यते** विविधं क्लिद्यते । कृष्णं निरयणं रात्रिरादित्यस्य हरयः सुपर्णा हरणा आदित्यरश्मयः— इत्यादि निरुक्तं द्रष्टव्यम् ॥

४७. नि॒ऽयान॑म्-सु॒ऽप॒र्णाः इति—पदपाठः ।

ननु दुरवगाहज्ञानमार्गात् भक्तिमार्ग एव ज्यायान् इत्याशङ्क्य पुनरावृत्तिदोषत्वेन ज्यायस्त्वं इत्यभिप्रेत्य भक्तस्वरूपादिकमाह––कृष्णं विष्णुं सगुणं ब्रह्म । नियानं नियमेन भक्तैर्यातव्यम् । हरयः सुपर्णाः सुपर्णं गरुडसमानजातिकं आरूढाः । सुपर्णमारोहन्ति इति । अपः । आपः इत्यन्तरिक्षनाम । अन्तरिक्षसमं सूक्ष्मवस्त्रं वसानाः परिदधानाः । दिवं स्वर्गं ते उन्मुच्य त्यक्त्वा पतन्ति पृथिवीं प्राप्नुवन्ति । विष्णवो भूत्वा सारूप्यादिना समानतां प्राप्ताः सुपर्णाः । ते विष्ण्वादिलोकं प्राप्ताः आ अववृत्रन् आवर्तन्ते । कुतः । तस्य ऋतस्य विष्ण्वादेः सगुणब्रह्मणः सदनात् लोकात् । आदित् आगमनसमकालमेव घृतेन उदकेन पृथिवी विशेषेण उद्यते आर्द्रीक्रियते । उन्दी क्लेदने । परस्माल्लोकात् भुवनमागच्छन्ति । मेघीभूय उदकीभूय वृष्टिरूपेण भुवमार्द्रयित्वा ओषधिवनस्पत्यादिरूपं प्राप्य तद्रूपेण पुरुषं प्राप्य स्त्रियो जठराज्जायन्ते । तदुक्तं शिवधर्मोत्तरे ––

वायुमेघाम्बुभूम्यन्तरेतोगर्भत्वमाश्रिताः ।
जायन्ते जठराज्जीवाः पतन्तः सर्वतो भुवि ॥

इति । कल्पस्तु—

सारूप्यमुख्यां पदवीं प्रपद्य विष्ण्वादिलोकान् द्रुतमाश्रयन्ति ।
वाय्वम्बुदे ओषधिवीर्यगर्भभावं प्रपन्नाः पुनरुद्भवन्ति ॥

इति ।

द्वाद॑श प्र॒धय॑श्च॒क्रमेकं॒ त्रीणि॒ नभ्या॑नि॒ क उ॒ तच्चि॑केत ।
तस्मि॒न्त्सा॒कं त्रि॒श॒ता न श॒ङ्कवो॑ऽर्पि॒ताः ष॒ष्टिर्न च॑लाच॒लासः॑ ॥ ४८ ॥

द्वाद॑श एतत्संख्याकाः **प्र॒धयः॑** परिधयः प्रहिता वर्तन्ते । तत्स्थानीयाः द्वादश मासाः **एकं** अद्वितीयं **च॒क्रं** क्रमणस्वभावं संवत्सराख्यं चक्रं आश्रिताः ।

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

तथा **त्रीणि** त्रिसंख्याकानि **नभ्यानि** नाभ्याश्रयाणि फलकानि तत्स्थानीयानि ग्रीष्मवर्षाहेमन्ताख्यानि आश्रितानि। यथा सूर्यरथचक्रस्य द्वादश परिधयो नाभ्यर्हाणि त्रीणि फलकानि सन्ति तद्वत् कालचक्रस्यापि। **कः उ** कोऽपि महत् **तत्** चक्रं **चिकेत** जानाति। **तस्मिन्** चक्रे **साकं** सह **शङ्कवः न** शङ्कव इव। अत्र पुरस्तादुपचारोऽपि नशब्दः सामर्थ्यादुपमार्थीयः। तस्मिन्नपि संवत्सरचक्रे **त्रिशताः** एतत्संख्याकाः **षष्टिः न**। नशब्दश्चार्थे। षष्टिश्च अराः अरस्थानीयान्यहानि। **अर्पिताः** अर्पितानि। कीदृशानि तानि। **चलाचलासः**। एकश्चलशब्दो द्विर्भावप्राप्तः। चलचलाः। चलनस्वभावानि इत्यर्थः। चरिचलिपतिवदीनामच्याचाभ्यासस्य—इति द्विर्वचनं आगागमश्च। ततोऽसुक्। षष्टिश्च वै त्रीणि च शतानि संवत्सरस्याहानि—इति ब्राह्मणम्। द्वादश प्रधयश्चक्रमेकमिति मासानाम्। मासा मानात्—इत्यादि निरुक्तम्॥

४८. प्रऽधयः ऊं इति त्रिऽशताः—इति पदपाठः।

जाताश्च कालेन संसारेण च व्याप्यन्ते इति वक्तुं कालसंसारस्वरूपवर्णनेन कालचक्रं वर्णयति। ननु—द्वादशारं नहि—इत्यत्र मन्त्रेऽपि एषोऽर्थः अभिहितः। सत्यम्। तस्यैव विवृत्तिरियं अधिकविवक्षया। द्वादश प्रधयः। प्रधीयन्ते इत्यराः मासात्मकाः। तैरारब्धमेकं संवत्सरात्मकं कालचक्रम्। तस्य च त्रीणि नभ्यानि तिस्रो नाभयः। ऋतुद्वन्द्वेन नाभिः। षड्तुः संवत्सरः—इति श्रुतेः। को ब्रह्मा। को वा पुरुषः तत् कालचक्रं उ चिकेत जानाति। तस्मिन् कालचक्रे साकं सहभवा अन्योन्यानुबद्धाः त्रिशताः षष्टिश्च इत्येवं संख्याताः सूक्ष्मा अराः शङ्कवः न कीलाः इव अर्पिताः। कीलका इव चक्रे निखाताः। अनेन त्रिविधं भूतपञ्चकं माससंवत्सरकर्तृरूपम्। कालचक्रे प्रवर्तकत्वात् तदात्मकमित्युक्तम्। न चलाचलासः न चलाः अव्यभिचारिणः। चरिचलिपति—इति अभ्यासान्ते दीर्घः। एवमधिभूतं सूर्यचक्रम्। अधिदैवम्। मासा एव प्रधयः। संवत्सरश्चक्रम्। ऋतवो नाभयः। षष्ट्यधिकं त्रिशतं सूक्ष्मा अरास्तु दिवसा रात्रयो वा। तत्सन्धयः पूर्वे वा परे वा। अध्यात्मं तु—प्रधीयन्ते प्रधानानि स्वीक्रियन्ते इति प्रधयो मनोबुद्धिसहितानि इन्द्रियाणि द्वादशारस्थानानि। तैरारब्धं चक्रं प्राणान्तःकरणात्मकं एकं लिङ्गशरीरं सर्वयोनिषु भेदाभावादेकांशस्य चक्रसदृशत्वात् चक्रम्। तस्य तिस्रो नाभयः अवस्थाः। त्रयः स्वप्नाः इत्युक्ताः। न चैतत् चक्रं भ्रमणादुपरमति

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

इति आह। क उ तत् ब्रह्म चिकेत वेत्ति क एव पुमान्। न च ब्रह्मज्ञानादृते तन्निवृत्तिः। ब्रह्मज्ञानं तु दुर्लभम्। तस्मिन् लिङ्गशरीरे आश्रितं साकं सहभावि स्थूलशरीरम्। अत्र च स्थूलदेहे त्रीणि शतानि षष्टिश्च शङ्कव इव स्थिताः अरा अस्थिरूपाः अर्पिताः अन्तर्निहिताः आधारस्तम्भसमानाः। तेन चञ्चला न। अतिदृढाः। अन्ये तु त्रिशतं षष्टिर्मज्जानः इत्याहुः। परे अस्थिसन्धय इत्याहुः। प्राणो वंशः। अथ कौण्ठरव्यः इत्येताभ्यां अधिदैवाध्यात्मविषयाभ्यां उपासनापराभ्यां खण्डाभ्यामयमर्थ उक्तः सूचितः। अत्रापि उपासना विवक्षिता इति अस्मज्ज्येष्ठभ्रातरः लक्ष्मीधराचार्याः उक्तवन्तः। कल्पस्तु—

मासोदितारैर्हित उक्तसंख्यैश्चक्रं त्रिनाभं त्रिशतत्रयं च।
षष्टिस्तु सूक्ष्मा अरका अचाल्याश्चक्रं रवेरधिभूतमिदं वदन्ति॥
अधिदैवं त्वरा मासास्तनुश्चक्रं तु वत्सराः।
त्रिनाभिरप्यराः सूक्ष्मा दिवसाः सन्धयो निशाः॥

इदमाधिदैवते। अध्यात्मं तु—

बुद्धिर्मनःखानि अरा द्विषट् च चक्रे च लिङ्गं त्रिपुरा व्यवस्थाः।
तत्र स्थितस्थूलशरीरभाजो ह्यस्थ्यादयोऽरा अणवः प्रसंख्याः॥

इति।

प्रवर्ग्ये अभिष्टवे यस्ते स्तनः इत्येका। सूत्रितं च—यस्ते स्तनः शशयो यो मयोभूः। गौरमीमेदनु वत्सं मिषन्तम्—इति। एषैव सारस्वते पशौ हविषो याज्या। सूत्रितं च—यस्ते स्तनः शशयो यो मयोभूः। त्वं सोम प्रविचिकितो मनीषा इति द्वे—इति।

यस्ते स्तनः शशयो यो मयोभूर्येन विश्वा पुष्यसि वार्याणि।
यो रत्नधा वसुविद्यः सुदत्रः सरस्वति तमिह धातवे कः॥ ४९॥

हे **सरस्वति ते** तव संबन्धी **यः स्तनः** स्तनवच्छिशुस्थानीयानां प्राणिनामाप्यायनकारी लौकिकवैदिकसुशब्दरूपः स्तनः। **शशयः** शयानः तव देहे वर्तमानः। **यः** च स्तनो **मयोभूः** रसास्वादिनां सुखस्य भावयिता। **येन** स्तनेन **विश्वा** सर्वाणि **वार्याणि** वरणीयानि अभिमतरूपाणि धनानि **पुष्यसि** भोक्तृभ्यः।

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

यः च स्तनः **रत्नधाः** बहुविधरमणीयरसानां धारयिता **वसुवित्** वसूनां वासयितॄणां घनानां वेत्ता लब्धा वेदयिता वा। किं च **यः** स्तनः **सुदत्रः** शोभनदानः। सुदत्रः कल्याणदानः—इति निरुक्तम्। अत्र असकृत् यच्छब्दश्रवणं स्तनस्य अतिप्रशस्तत्वस्य ज्ञापनार्थम्। हे देवि **तं** तादृशं सर्वप्राण्युपकारकं सूक्ष्ममयं स्तनं **इह** अस्मिन् कर्मणि इदानीं वा **धातवे** अस्माभिर्धातुं पातुं पानाय **कः** कुरु ॥

४९. मयःऽभूः-रत्नऽधाः-वसुऽवित्-सुऽदत्रः कुरिति कः—इति पदपाठः।

एवंविधकालचक्रसंसारचक्रनिवृत्तिः महावाक्यादेव इति वदन् सरस्वतीं पुरस्कृत्य किंचिद्विशेषमाह। त्रिविधा हि सरस्वती—पावका नः—इति तृचोक्ता। तत्र वाग्रूपिणी देवतारूपिणी नदीरूपिणी च क्रमादुक्ता। अत्र देवतारूपिणी कथ्यते। भो वाग्रूपिणि सरस्वति वेदविद्ये तव स्तनः कुचः अमृतस्रावकः। स्तनघन शब्दे। शब्दात्मकः। शशयः। शीङः अचि छान्दसं द्विर्वचनम्। शयानः अविद्यातो जीवः। तत्प्रधानवाक्यमपि लक्षणया शशय इत्युच्यते। यत्र परमात्मानुवादेन प्रत्यगात्मैवोच्यते तद्वाक्यं सरस्वत्याः स्तनस्थानीयम्। तं स्तनं धातवे। डुधाञ् धारणपोषणयोः। अस्मत्पोषणाय। कः कुरु सम्पादय। इह जीवात्मनि देशे काले च। तथा यश्च द्वितीयः स्तनः मयोभूः सुखरूपः परमात्मा तत्प्रधानं वाक्यमपि लक्षणया मयोभूः। यत्र परमात्मानुवादेन परमात्मा उच्यते तद्वाक्यं देवरूपं सरस्वत्याः द्वितीयस्तनस्थानीयम्। तं स्तनं धातवे अस्मत्पोषणाय संपादय। अथ नदीरूपिणी सरस्वती। भो नदीरूपिणि सरस्वति ते तव संबन्धिना स्तनेन अमृतस्रावकेन येन विश्वानि सर्वाणि वार्याणि वारिभवानि व्रीह्यादिधान्यादीनि पोषयसि स प्रवाहो बहिर्निपातितः क्षेत्राणि। प्राणिधान्याद्युत्पत्तिहेतुः स प्रवाहो नदीरूपः सरस्वत्या स्तनस्थानीयः। तं स्तनं धातवे धातुं ममात्मानं पालयितुं कुरु संपादय। धाञः तुमर्थे तवेप्रत्ययः। एवं सरस्त्युदकसाध्यसस्यादिसमृद्धिर्याचिता। तथा यश्च द्वितीयः स्तनः रत्नधाः रत्नानामुत्पादकः पालकश्च। यः सरस्वत्याः प्रवाहविशेषः समुद्रप्रविष्टः समुद्रोदकेन संसृज्यमानः तज्जलं प्राप्य प्रसृतः। शशयो वेदगुहाशयः। तद्गम्यफलभूतः इति यावत्। येन विश्वा सर्वाणि वार्याणि वरणीयानि ब्रह्मादीनि पुष्यसि पालयसि। यो रत्नानि जनयन्ति तं ते तव स्तनं धातवे संपादय। तदुक्तं रत्नशास्त्रे—

समुद्राधस्तलं प्राप्य सरस्वत्या जलं शुभम्।
जनयित्वाथ रत्नानि वर्तयत्यपि तं परम्॥

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

रत्नमुत्पाद्यते भोक्तृभोग्यादीशवशादपि ।
सरस्वतीनदीसङ्गादब्धिं रत्नाकरं विदुः ॥

इति। अनेन रत्नसमृद्धिः प्रार्थिता। क्षुत्पिपासादिनिवृत्तौ रत्नादिना अश्रीकत्वादिदोषनिवृत्तौ च नैश्चित्ये ज्ञानप्रवृत्तिः सुकरा इतिं उभयं प्रार्थ्यते। तथा च भो देवतारूपिणि सर्वदेवमयि सरस्वति प्रसीद। वसुवित्। वसू वसनाच्छादनकर्तारौ जीवेश्वरौ वेदयति ज्ञापयति। अन्तर्भावितोऽत्र ण्यर्थः। विदितब्रह्मविद्याचार्यो हि देवतारूपिण्याः सर्वदेवतारूपायाः सरस्वत्याः। स्तनस्थानीयः। कः परमानन्दरूपः। भो सरस्वति तं तव स्तनं इह धातवे संपादय। तथा यस्ते द्वितीयः स्तनः सुदत्रः धर्माधर्मापेक्षया फलदाता ईश्वरः सोऽपि देवतारूपिण्याः सर्वदेवतामय्याः सरस्वत्याः स्तनस्थानीयः। भो सरस्वति तं स्तनं इह धातवे संपादय। सुदत्रः इत्यत्र दद दाने। अतः सुपूर्वात् क्विप्। सुखं ददाति इति सुदत् धर्मः धर्मवान्। मतुपो लुक्। सुदतः त्रायते इति सुदत्र ईश्वरः। पूर्वपदप्रकृतिस्वरः। कथं तर्हि सुधर्मेण त्रायते इति। सुपि स्थः—इत्यत्र सुपि इति योगविभागात्। तत्पुरुषे तुल्यार्थे—इति पूर्वपदप्रकृतिस्वरः। कल्पस्तु—

यस्ते स्तनो वाणि सरस्वतीशजीवात्मबोधश्रुतिवाग्विशेषः ।
जीवेशबोधात्मकुचो द्वितीयो द्वयं तदेतत् कुरु नोऽवनाय ॥

तथा—

यस्ते स्तनस्तीर्थसरस्वति त्वत्सोमप्रदो धान्यतृणादिहेतुः ।
यश्चाब्धिगो रत्नसमृद्धयेऽन्यो द्वयं तदेतत् कुरु नोऽवनाय ॥
यस्ते स्तनो देवि सरस्वति त्वदंशो गुरुश्चेत् स इह द्वितीयः ।
प्रोक्तः स्तनः सर्वसुखात्मकत्वं द्वयं तदेतत् कुरु नोऽवनाय ॥

इति ॥

अग्निमन्थने यज्ञेन यज्ञं इत्येषा परिधानीया। यज्ञेन यज्ञमयजन्त देवाः इति परिदध्यात्—इति सूत्रितत्वात्।

य॒ज्ञेन॑ य॒ज्ञम॑यजन्त दे॒वास्तानि॒ धर्मा॑णि प्रथ॒मान्या॑सन् ।
ते ह॒ नाकं॑ म॒हि॒मानः॑ सचन्त॒ यत्र॒ पूर्वे॑ सा॒ध्याः सन्ति॑ दे॒वाः ॥९०॥

दे॒वाः व्यवहर्तारः यजमानाः। **य॒ज्ञेन॑** निर्मथ्याग्निना **य॒ज्ञं** होमसाधनं आहवनीयं **अ॒य॒ज॒न्त॒** पूजितवन्तः। अनुष्ठानाय संयोजितवन्त इत्यर्थः। अग्निं

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

मथित्वा प्रहरति । तेनैवाग्नय आतिथ्यं क्रियते—इति हि तैत्तिरीयकम् । **तानि धर्माणि** अग्निसाधनानि कर्माणि **प्रथमानि** । प्रथम इति मुख्यनाम । प्रतमानि प्रकृष्टतमानि **आसन्** फलप्रसवसमर्थानि अभवन् इत्यर्थः । **ते ह** ते च यजमानाः **नाकम्** । नास्मिन्नकं अस्ति इति नाकः स्वर्गः । तम् । **महिमानः** माहात्म्ययुक्ताः **सचन्त** संगताः । कीदृशं नाकम् । **यत्र** यस्मिन् नाके **पूर्वे** पूर्वतनाः **साध्याः** साधनाः यज्ञादिसाधनवन्तः । **देवाः** । कर्मदेवा इत्यर्थः । ते **सन्ति** निवसन्ति । तं सचन्त । तस्मादिदानीमपि मनुष्यैरेवं कर्तव्यं इत्यर्थः । यद्वा देवाः इदानीं देवभागमापन्नाः पूर्वं यज्ञेन अग्निना पशुभूतेन यज्ञं यष्टव्यमग्निं अयजन्त पूजितवन्तः । अग्नेरेव मूर्तिभेदेन देवत्वं च पशुत्वं च द्रष्टव्यम् । अग्निः पशुरासीत् । तमालभन्त । तेनायजन्त—इति श्रुतेः । शिष्टं पूर्ववत् । यत्र यस्मिन् स्वर्गे निमित्तभूते सति पूर्वे पूर्वतनाः साध्या देवाः साधनाश्छन्दोभिमानिनः । आदित्या अङ्गिरसश्च साध्या देवा उच्यन्ते । छन्दांसि वै साध्या देवाः । तेऽग्रेऽग्निनाग्निमयजन्त । ते स्वर्गं लोकमायन् । आदित्याश्चैवेहासन्नङ्गिरसश्च । तेऽग्रेऽग्निनाग्निमयजन्त । ते स्वर्गं लोकमायन्—इति ब्राह्मणम् । एते देवाः स्वर्गे सन्ति भवन्ति । स्वर्गप्राप्ता इत्यर्थः । यद्वा यज्ञेन ज्ञानादियज्ञेन यज्ञं विष्णुं अयजन्त पूजयन्ति । ते नाकं विष्णुलोकं महानुभावाः सचन्त संगच्छन्ते । यत्र पूर्वे साध्यादयो देवाः सन्ति तत्स्थानम् । अग्निनाग्निमयजन्त देवाः—इत्यादि निरुक्तमनुसन्धेयम् ।

अथ ब्रह्मविद्यान्तर्भूतावान्तरविद्यानां फलोक्तिः । यस्ते सरस्वत्यै । यज्ञेन साध्येभ्यः सकामेभ्यः । उपलक्षणमिदम् । निष्कामेभ्यो ब्रह्मलोकार्थिभ्यश्च । एवमेतदृक्प्रतिपादनाय—इत्यनुक्रमणिकार्थः । ये यज्ञेन काम्यकर्मणा यष्टव्यमीश्वरं यजन्ति ते देवा भवन्ति स्वर्गे देदीप्यमानाः । अथ निष्कामफलोक्तिः । तानि निष्कामत्वेन अत्यन्तोत्कृष्टानि । यच्छब्दरहितः तच्छब्दः अत्यन्तोत्कृष्टवाची । धर्माणि धर्मसाधनानि यज्ञादीनि ज्ञानयज्ञस्य प्रथमानि पूर्वसाधनानि संभवन्ति । ब्रह्मविद्यापि द्विधा । सगुणा निर्गुणा च । अत्र निर्गुणायाः फलमिदम । ते अत्यन्तोत्कृष्टाः ह एव नाकं सुखम् । अकं दुःखम् । अत्र द्वौ नञौ अतिशायिनं प्रकृतमर्थमाहुः इति नाकमानन्दरूपम् । नभ्राण्नपान्नवेदा—इति निपातनात् साधुत्वम् । महिमानो महान्तः ।

उपदिष्टमहावाक्यो महच्छब्देन कथ्यते ।

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

इति वचनात् उपदिष्टमहावाक्यात् जीवन्मुक्ताः सन्तः सचन्तः तेषां समवाये समवयन्ति । परमानन्दात्मका भवन्ति इत्यर्थः । सगुणब्रह्मविद्याफलम् । यत्र ब्रह्मलोके पूर्वे ब्रह्मादयः सन्ति तत्र साध्याः आध्यात्मसगुणध्यानेन सह वर्तमानाः सन्ति भवन्ति अपुनरावृत्ताः । कल्पस्तु—

काम्येन धर्मेण सुरादिलोको ज्ञानस्य निष्कामकृतिर्हि हेतुः ।
वाक्योपदिष्टाः स्युरिहैव मुक्ता ब्रह्मादिलोकः सगुणेशबुद्धया ॥

इति ॥

समानमेतदुदकमुच्चैत्यव चाहभिः ।
भूमिं पर्जन्या जिन्वन्ति दिवं जिन्वन्त्यग्नयः ॥ ५१ ॥

एतत् प्रसिद्धं **उदकं समानम्** । एकरूपमित्यर्थः । **अहभिः** कैश्चिदहोभिः ग्रीष्मकालीनैः । **उत् च एति** ऊर्ध्वं गच्छति । तथा अहभिर्वर्षकालीनैः **अव** तदुदकं अव **च** एति अवाङ्मुखं च गच्छति । चवायोगे प्रथमा—इति प्रथमाविभक्तिः न निहन्यते । रश्मिनाडचैव भूमिं प्राप्नोति । तदेवोच्यते । **पर्जन्याः** प्रीणयितारो मेघाः **भूमिं जिन्वन्ति** उदकसंस्त्यायेन सस्याद्युत्पादनद्वारा भूमिष्ठान् प्रीणयन्ति । तथा **अग्नयः** आहवनीयाद्याः स्वे हुतया आहुत्या **दिवं** द्युलोकस्थान् देवान् **जिन्वन्ति** प्रीणयन्ति ॥

५१. अहऽभिः-इति पदपाठः ।

ननु काम्यकर्मसगुणब्रह्मविद्ययोः देशान्तरप्राप्तिफलमुक्तम् । तन्न । तत् सृष्ट्वा तदेवानुप्राविशत्—इत्यधिकृत्य तस्यैव ब्रह्मणः प्रवेशश्रवणात् ब्रह्मात्मकस्य सर्वगतस्य निष्क्रियस्य जीवस्य मर्त्यत्वसंभवात् इत्याशङ्क्य उपाधिवशाद्गतिसंभवः इत्याह —समानं देशकालादौ समानमपि उदकं अकात् दुःखात् उद्गतमप्येतत् ब्रह्म अहभिः अहीयमानैः धर्माधर्मसंस्कारैरिन्द्रियैः प्राणैश्चोपहितं जीवभूतं सत् उदेति देवतादित्वमनुभवति । अव च नीचैरपि मर्त्यं मनुष्यादिरूपं अनुभवति च । एवमनुभाव्य जीवो यदा मनुष्यतां प्राप्तः तदा कर्माधिकारी जगद्यात्रां प्रवर्तयेत । अन्यथा जगज्जननदोषः स्यात् इत्याह—भूमिं मनुष्यादिसहितां पर्जन्याः हविषा जुष्टाः इन्द्रसूर्यादयश्च ये देवाः ते जिन्वन्ति प्रीणयन्ति वृष्ट्यादिना । दिवं देवादिसहितं

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

द्युलोकं जिन्वन्ति प्रीणयन्ति यजमानेन भूस्थेन समर्चिताः। भूस्थाः अग्न्यादयः हविर्दानेन स्वर्गस्थान् देवान् तर्पयन्ति इत्यर्थः। तदुक्तं भगवद्गीतायाम्—

सहयज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः।

इत्यारभ्य—

स मोघं पार्थ जीवति॥

इत्यन्तेन ग्रन्थेन। कल्पस्तु—

धर्मैरधर्मैरथवा सनाभिर्लिङ्गस्थजीवः स्वरुदेत्यपैति।

भूस्थाः सुरानारमयन्ति देवान् भूस्थान् सुरा आरमयन्ति वृष्ट्या॥

इति॥

सरस्वद्देवताके पशौ दिव्यं सुपर्णं इति वपायाज्या। दिव्यं सुपर्णं वायसं बृहन्तम्। स वावृधे नर्यो योषणासु—इति सूत्रितत्वात। अन्वारम्भणीयायां सरस्वद्यागे एषैव याज्या। सूत्रितं च—दिव्यं सुपर्णं वायसं बृहन्तम। आ सर्वं सवितुर्यथा—इति।

दि॒व्यं सु॑प॒र्णं वा॑य॒सं बृ॒हन्त॑म॒पां गर्भं॑ दर्श॒तमोष॑धीनाम्।
अ॒भी॒प॒तो वृ॒ष्टिभि॑स्त॒र्पय॑न्तं॒ सर॑स्वन्त॒मव॑से जोहवीमि॥ ५२॥

दि॒व्यं दिवि भवं **सुप॒र्णं** शोभनगमनं **वा॒य॒सं** गमनशीलं **बृ॒हन्तं॑** महान्तं **अ॒पां गर्भं॑** वृष्ट्युदकानां गर्भवदुत्पादकम्। **ओष॑धीनां** ओषधीः **द॒र्श॒तं** दर्शनाय। दर्शयन्तं इत्यर्थः। यद्वा ओषधीनां गर्भं दर्शतं इति पृथग्विशेषणम्। किंच **अ॒भी॒प॒तः** आनुकूल्येन **वृ॒ष्टिभिः॑ त॒र्पय॑न्तं** जगत् प्रीणयन्तम्। यद्वा अभीपतः अभिगमनवतः सलिलाधारान् तटाकादीन् तर्पयन्तम्। अथवा अभिगन्ता अहम्। **सर॑स्वन्तं** उदकवन्तम्। सरः इत्युदकनाम। देवं सूर्यं वा। **अव॑से** रक्षणाय **जो॒ह॒वी॒मि** पुनः पुनराह्वयामि॥

५२. सु॒ऽप॒र्णम् ·वृ॒ष्टिऽभिः॑ इति पदपाठः।

अत्र सूक्तार्थोपसंहारः। दिवि भवं दिव्यं स्वर्गिणं कर्मफलभोक्तारं सुपर्णम्। सुपर्णमारोहयति इति। णिजचौ। सुपर्णवाहनाधिरूढविष्ण्वादिलोकार्थं सगुणोपासकं स्वर्गिणं च कर्मविद्याभ्यां भ्रष्टम्। नीचकर्मकरणेन च वायसयोनिं प्राप्तम्। तथा बृहन्तं ब्रह्मरूपिणं आत्मानं च। तथा अपां गर्भं अप्प्रमुखसूक्ष्मभूतेन्द्रियाणां आपगानां गर्भं

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

कार्यं लिङ्गदेहिनम्। दर्शतं ज्ञानं च। ओषधय इमाः स्वामिन्यः पोषका यस्याः तां स्थूलां तनुं च। अभीपतः। सर्वत आपो यत्र पतन्ति गच्छन्ति स अभीपः समुद्रान्तः-स्थितभूप्रदेशः। ऋक्पूरब्धूःपथामानक्षे—इत्थं च समासान्तः। द्व्यन्तरुपसर्गेभ्योऽप इत्। सभीय इवाचरन्तीति क्विप्। संसाराब्धित्वात् अभीप इवाचरतोऽपि अतिसंसारिणो जीवान् ज्ञानामृतरसवृष्टिभिः तर्पयन्ति। सरस्वन्तम्।

अम्भो वाणी च तापी च ज्ञानं च सर उच्यते।

इति भोजनिघण्टुः। ज्ञानवन्तं गुरुं च अवसे रक्षणाय जोहवीमि प्रोक्तवानस्मि। ह्वयतेर्यङ्लुकि—ह्वः संप्रसारणम्। यङो वा—इति इट्। दिव्यादयोऽत्र सूक्ते मयोक्ता इत्यर्थः। इन्द्रं मित्रं इत्यनयोरस्य च मन्त्रस्य सौरत्वं रात्र्यध्ययननिवृत्त्यर्थम्। सूर्यस्य परमात्मत्वे सर्वमन्त्रावरोधश्च। परमार्थतः सौरत्वे सूर्यलिङ्गादर्शनहेतुर्वाच्यः। ऋग्भाष्यादौ नैवं व्याख्यातमिति चेत् न। यत्र ऋचो व्याक्रियन्ते तस्यैव ऋग्भाष्यत्वात्। स्कन्दो-द्गीथभाष्याणामपि भिन्नार्थता दृष्टा। स्वामिना तु अन्यथैव व्याख्यातम्। शाकपूणि-यास्कादिनिरुक्तेष्वपि व्याख्याभेद एव। तदुक्तं नारदीयपुराणे—

बिभेत्यल्पश्रुताद्वेदो मामयं प्रहरिष्यति।
इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्॥
वेदानामर्थनानात्वप्रतीतावपि सन्मतिः।
मुनिवाक्यानुरोधेन व्याख्यां कुर्वन् न दुष्यति॥

इति। अधियज्ञविषयं स्कन्दादिभाष्यम्। निरुक्तमधिदैवतविषयम्। इदं तु भाष्यमध्यात्म-विषयं इति। न च भिन्नविषयाणां विरोधः। अस्य भाष्यस्य मूलं विष्णुधर्मोत्तरे यत्र पुष्करनामा यक्षः श्रीरामं प्रति सर्वधर्माननुक्तवान्। तत्र च ऋग्विधानं यजुर्विधानं सामविधानं अथर्वविधानं च उक्तवान् पुष्करः। तत्र च कतिपयानां सूक्तानां संघातः कल्पश्चोक्तः। तत्रापि अस्यवामीयकल्पो महान् अध्यात्मविषयत्वात्। तथा च प्रतिमन्त्रं अर्थतो व्याख्यानं तत्र सूचितम्। वृद्धपराशरेणोक्तम्—

हविष्यान्तं पौरुषं च न तमाह इतीति च।
अस्य वामीयकं जप्त्वा महदेनो व्यपोहति॥
अस्यवामीयसूक्तं च ब्रह्महा शुचये जपेत्।
विचारयेत्तदर्थं चेज्जीवन्मुक्तो न संशयः॥

इति। कल्पस्तु—

स्वर्गी विष्ण्वादिलोकी दुरितजनजनिर्ब्रह्मभूतोऽपि लिङ्गं
ज्ञानं स्थूलाख्यदेहो नवजलधिगतो वारिकोशोपमोऽसौ।

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

एतेऽप्यन्ये पदार्था मुनिवरकथिता अस्यवामीयसूक्ते
संसाराद्रक्षणाय श्रुतिपठितवतस्तारयेयुर्भवाब्धिम् ॥

इति । अत्र वृद्धशौनकः—

उचथ्यदीर्घतमसौ जप्येते स्वाघनुत्तये ।
तेजस्वी ब्रह्मवर्चस्वी दिव्यधीर्दुःसहो मुनिः ॥
अङ्गिरा ब्राह्मणस्तस्मादुचथ्यो ममतापतिः ।
तस्मादधीतवेदादीननुज्ञातो बृहस्पतिः ॥
रिरंसुर्ममतां तां नो लेभे गुरुसुरक्षिताम् ।
उचथ्यः कारयन् यज्ञं जगाम प्रियवर्मणः ॥
लब्धावकाशस्तां रन्त्युमारेभेऽथ बृहस्पतिः ।
हृत्कोणोदरसंस्थोऽपि मुनीशः क्षितिमाप सः ॥
रेतो यतोऽत्र संकीर्णं निन्दितो गुरुरब्रवीत् ।
जात्यन्धो भव दुष्ट त्वमित्युक्त्वा तपसे गतः ॥
पिता ददौ वरं तस्मै ज्ञानचक्षुः शुचिर्भव ।
अथोपनीतमात्रोऽर्थं चक्रे दीर्घतमा दिवा ॥
स्त्रीगन्धधायको यक्ष्मदायकोऽनिष्टयोषिति ।
एवमादि दिवाजातं रात्रौ हरति सूक्ततः ॥
उद्विग्नैर्मुनिभिः सोऽथ मञ्जूषायां प्रवेशितः ।
मञ्जूषायां विपाशायां क्षिप्त्वा नद्यां प्रवाहितः ॥
प्रतिक्षिप्तास्ततोऽङ्गेन गृहीता स्यान्नृपेण सा ।
तं दीघतमसं ज्ञात्वा दत्ता भार्याथ च स्वयम् ॥
अजीजनत् सुतानस्य दास्यामुशिजि चात्मने ।
पुत्रमुत्पाद्य कक्षीवत्संज्ञं गोधर्ममाचरत् ॥
ततो दीर्घतमा वृद्धगोतमो गोतमस्ततः ।
गौतमेषु तदारभ्य सूक्तार्थः स्फुरति स्फुटम् ॥
तत्कुले विश्रुतो विष्णुस्ततो विष्णुप्रकाशकः ।
आत्मानन्दस्तदुत्पन्नस्तेनेदं भाष्यमीरितम् ॥
तदेतद्भाष्यकूपार्थपुण्यौघनिचयेन सः ।
प्रीयतां सुकृती स्वामी सहजानन्दकेशवः ॥
नमो विष्णुप्रकाशाय केशवाय गरीयसे ।
रामाय पुष्करायाथाप्यौचथ्यायौशिजाय च ॥

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

APPENDIX I

Citations and References

[The lines are numbered from the beginning of the commentary in the particular Page, if the commentary of the verse starts in the middle of the Page; otherwise it is from the beginning of the Page. This is the arrangement in both the Appendices.]

i. Sāyaṇa

Verse	Page	Line	Citation	Reference
Prefatory	2	2	प्रस्तारपङ्क्तिः पुरतः	Ping. Ch. Sut. 3. 4. 1
		4	आद्यौ चेत् प्रस्तारपङ्क्तिः	Sar. Par. 8. 6
		12	कृत्स्नसूक्तस्य विनियोगं शौनक आह— स्तेयं कृत्वा द्विजो मोहात्	Ṛgv. 1. 26
		17	अस्य वामस्य पलितस्य	A. Ā. 3. 2.
1	6	4	अदितिः पुत्रकामा	T. S. 6. 5. 6
		6	तद्योऽहं सोऽसौ	
		11	वायुना वै गौतम	Bṛ. Up. 3. 7. 2
		13	घृतमित्युदकनाम	Nigh. 1. 12
		14	पृष्ठं स्पृशतेः	N. 4. 3
		17	सर्वस्य पतिः सर्वस्येशानः	Bṛ. Up. 4. 4. 22
		25	द्वा सुपर्णा	R. V. 1. 164. 20
	7	1	अयं मन्त्रो यास्केन व्याख्यातः—अस्य वामस्य वननीयस्य	N. 4. 26
2	8	20	अनादिनिधनः कालः	*Cf.* Vis. Pu. 1. 2
	9	1	सप्त युञ्जन्ति रथमेकचक्रम्	N. 4. 27
4	11	13	नान्यत् किंचन मिषत्	A. Ā. 2. 4. 1
	12	1	न तु तद्द्वितीयमस्ति	
5	12	6	बडिति सत्यनाम	Nigh. 3. 10

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

Verse	Page	Line	Citation	Reference
6	14	2	अथ य आत्मा	Ch. Up. 8. 4. 1
		3	लोका रजांस्युच्यन्ते	Nigh. 4. 19
		11	अथ य एषोऽन्तरादित्ये	Mait. Up. 6. 1
		13	तिस्रो भूमीर्धारयन्	R. V. 2. 27. 8
11	21	7	सप्त च वै शतानि	A. Ā. 3. 2. 1
14	25	5	चक्षुः ख्यातेर्वा चष्टेर्वा	N. 4. 3
		6	उदकं रज उच्यते	N. 4. 19
15	26	2	थट् च छन्दसि	P. 5. 2. 50
		5	अस्ति त्रयोदशो मासः	T. S. 6. 5. 3. 4
		9	नि:सूर्योऽप्यधिको मासः—इत्यादिस्मृतेः	
		13	स रसमह वसन्ताय	T. S. 7. 2. 10. 1
16	28	14	त्वं स्त्री त्वं पुमान्	Śv. Up. 4. 3
		15	श्रुतिरपि तदभावं बोधयति—नैव स्त्री न पुमानेषः	Śv. Up. 5. 10
		21	उक्तमर्थमभिप्रेत्य ताण्डक ब्राह्मणम्—शिशुर्वा अङ्गिरसः	Tāṇ. Br. 13. 3. 24
17	34	5	अग्नौ प्रास्ताहुतिः	Man. 3. 76
		14	तं नयन्त्येताः	Muṇ. Up. 1. 2. 5
19	37	2	विश्वस्वदिन्द्रयुताः	
20	38	22	समाने वृक्षे पुरुषो निमग्नः	Muṇ. Up. 3. 1. 2
	39	9	आप्तकामस्य का स्पृहा	M. Up. Kār. 1. 9
		11	अनीशया शोचति	Muṇ. Up. 3. 1. 2
		13	द्वौ द्वौ प्रतिष्ठितौ	N. 14. 30
21	41	3	यत्र सुपर्णाः सुरतनाः	N. 3. 12
22	42	13	चर्मवदाकाशम्	Śv. Up. 6. 20
		14	ब्रह्म वेद ब्रह्मैव भवति	Muṇ. Up. 3. 2. 9
23	43	4	गायत्रोऽग्निः	T. S. 2. 2. 5. 5
		17	गायत्रं प्रातः सवनम्	T. S. 2. 2. 9. 5-6
	44	19	देवविशः कल्पयितव्याः	A. B. 3. 12
24	47	2	अर्को मन्त्रो भवति	N. 5. 4
		6	एकं साम तृचे क्रियते	
25		1	जागतो वा एषः	
		3	स्वर्दृशम्	R. V. 7. 32. 22

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

Verse	Page	Line	Citation	Reference
25		3	आसौ वाव वर्द्दक्	A. B. 4. 10
			रथन्तरे प्रस्तूयमाने	T. B. 7. 7. 15
26 Pref.	51	1	उपह्वये सुदुघम्	Āś. Śr. 4. 7
26	52	5	यद्ग्रौँ इत्यपातृ	T. Ā. 5. 1. 5
		13	अस्या वक्ति-	
28 Pref.	55	2	गौरमीमेदनु	Āś. Śv. 4. 7
29	57	10	शाकपूणिर्नाम निरुक्ताचार्यः	*Cf.* N. 2. 8
	58	10	यल्लिङ्गं सा देवता	Sar. An. 1. 139
		13	एकैव वा महानात्मा	
	59	6	तमू अकृण्वन्	R. V. 10. 88. 10
30	61	1	जीवापेतं वाव	Ch. Up. 6. 11. 3
31 Pref.		2	अपश्यं गोपाम्	Āś. Śr. 4. 6
31	62	8	एष वै गोपा एष हीदम्	
		9	अपश्यं गोपामित्याह	T. Ā. 5. 6. 4
34 Pref.	67	2	एकैकशो यजमानम्	Āś. Śr. 10. 9
34	68	3	असौ वा आदित्यः	T. Ā. 5. 3. 5
35 Pref.		2	इयं वेदिः परो अन्तः	Āś. Śv. 10. 9
35	69	2	एतावती वै पृथिवी	T. S. 2. 6. 4
37	71	6	इदं सर्वं यदयमात्मा	Bṛ. Up. 2. 4. 6
37	71	6	ब्रह्मवेदं सर्वम्	Nṛ. T. Up. 7
		6	आत्मैवेदं सर्वम्	Cha. Up. 7. 25. 2
		6	स ईक्षत बहु स्यां प्रजायेय	
		7	तदनन्यत्वमारम्भण-	Ved. Sū. 2. 1. 14
		11	अथापि परिवेदना	N. 7. 3
		14	पराञ्चि खानि	K. Up. 2. 4. 1
		24	कश्चिद्धीरः	K. Up. 2. 4. 1
38	73	10	गुणान्वयो यः	Śv. Up. 5. 7
39	75	4	द्वे विद्ये वेदितव्ये	Muṇ. Up. 1. 1. 5
		6	एतद्व तदक्षरस्य	Bṛ. Up. 3. 8
		8	येनाक्षरं पुरुषम्	Muṇ. Up. 1. 2. 13
		10	तं त्वौपनिषदं पुरुषम्	Bṛ. Up. 3. 9. 26
		13	वेदानुवचनेन ब्राह्मणाः	B. Up. 4. 4. 22
		19	ऋग्भिः पूर्वाह्णे	T. B. 3. 12. 9

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

Verse	Page	Line	Citation	Reference
39		19	आदित्यो वा एषः	T. Ā. 10. 13
	76	21	य एषोऽन्तरादित्ये	Cha. 1. 6. 6
		27	तान् वेदानभ्यपतत्	A. B. 5. 32
		3	यच्चान्यत् त्रिकालातीतम्	M. Up. 1
		3	ओमिति ब्रह्म	T. Ā. 7. 8
		5	यो ऋचोऽधीते	T. Ā. 2. 11. 4
		9	अयं मन्त्रो निरुक्ते व्याख्यात:	See N. 13. 10
40 Pref.	78	2	वाश्यमानायै यवसम्	Āś. Śr. 3. 11
		4	सूयवसाद्भगवती	Āś. Śr. 4. 7
40		8	सूयवसादिनी भगवती	N. 11. 44
41	80	10	गौरीर्मिमाय सलिलानि	N. 11. 40
42	81	5	तस्या: समुद्रा अधि	N. 11. 41
44	85	2	त्रयः केशिन ऋतुथा	N. 12. 27
45	86	13	वाग्वै पराच्यव्याकृता	T. S. 6. 4. 7. 3
		17	इति मन्त्राः । कल्पोऽत ऊर्ध्वम्	T. Ā. 1. 31. 2
	87	17	अथापि ब्राह्मणं भवति	N. 13. 9
46	88	10	अग्निः सर्वा देवता:	A. B. 2. 3
	89	1	इममेवाग्निं महान्तम्	N. 7. 18
47 Pref.	90	2	कृष्णं नियानं हरयः	Āś. Śr. 2. 13
47	91	3	कृष्णं निरयणम्	N. 7. 24
48	92	8	चरिचलिपति—	Vār. 6. 1. 12. 6
		9	षष्टिश्च ह वै	Ś. Br. 9. 1. 1. 43
		10	द्वादश प्रधय:	N. 4. 27
49 Pref.	93	1	यस्ते स्तन: शशय:	Āś. Śr. 4. 7
		3	यस्ते स्तनः शशय:	Āś. Śr. 3. 7
49	94	2	सुदत्र: कल्याणदानः	N. 6. 14
50 Pref.	99	1	यज्ञेन यज्ञमयजन्त	Āś. Śr. 2. 16
50	95	2	अग्निं मथित्वा प्रहरति	T. S. 6. 2. 1. 7
	96	2	अग्नि: पशुरासीत्	T. S. 5. 7. 26
		12	छन्दांसि वै साध्या:	A. B. 1. 16
		17	अग्निनाग्निमयजन्त	N. 12. 41
52 Pref.			दिव्यं सुपर्णं वायसम्	Āś. Śr. 3. 8
			दिव्यं सुपर्णं वायसम्	Āś. Śr. 2. 8

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

ii. Ātmānanda

Verse	Page	Line	Citation	Reference
Prefatory	2	2	स्कन्दभाष्य	
		2	उद्गीथ	
		2	भास्कर	
		2	शौनक	
		2	वेदमित्र	
		2	बृहद्देवताकार	
		3	अनुक्रमणिकाकार	
		3	विष्णुधर्मोत्तर	
		3	स्कन्दादिव्याख्या	
		3	निरुक्त	
		5	शौनकादि	
		6	शौनकादिमतस्य संग्रहीतुर्वररुचेः	
	3	1	अपर आह—अल्पिकाया देवताया	
		2	तदुभयमपि वेदमित्रो निषेधति—न देवताल्पिका	
	5	7	विष्णुधर्मोत्तरार्धे बृहति	
1	7	7	तदुक्तम्—ग्राम्यो विश्वः	
		10	घृ क्षरणदीप्त्योः	Dh. P. 3. 14
		15	ऊडिदंपदाद्यप्पुम्रैद्युभ्यः	P. 6. 1. 176
		16	इदमोऽन्वादेशेऽशनुदात्तस्तृतीयादौ	P. 2. 4. 32
		18	उक्तं पुष्करोक्ते कल्पे—मीमांसमानौ जीवेशौ	
2	9	3	शरीरं रथमेव च	K. Up. 3. 3
		7	नभ दीप्तौ	
		7	इडजादिभ्यः	
		13	तदुक्तं कल्पे—महदाद्या वहन्त्येतत्	
3	10	3	चक्र दीप्तौ प्रतीघाते च	*Cf.* Dh. P. 1. 93 and 820
		5	इन्द्रियाणि हयान्याहुः	K. Up. 3. 4
		7	णु स्तुतौ	Dh. P. 3-26

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

Verse	Page	Line	Citation	Reference
3	10	8	अत्र कर्मव्यतिहारे तु छन्दसि शप्	
		11	दिग्वातार्कप्रचेतोऽश्वि—	
		13	तदुक्तं कल्पे—सप्तचक्रमिदं देहम्	
		16	एतन्मन्त्रप्रशंसाप्रकरणेऽप्युक्तम्—मूर्धो-रोजठरम्	
	11	8	प्रवर्तेत निवर्तेत	
4	12	7	तदुक्तं कल्पे—कारणत्वादनन्तत्वात्	
5	13	4	अस्य वामस्य पलितस्य	R. V. 1. 164. 1
		4	विश्पतिं सप्तपुत्रम्	R. V. 1. 164. 1
		5	तत्त्वमसि	Ch. Up. 6. 8. 7
		6	बष्किर्हि गत्यर्थः	
5	13	10	तनिपत्योश्छन्दसि	P. 6. 4. 99
		11	वेञ् तन्तुसंताने	Dh. P. 1. 10. 55
		11	तवै चान्तश्च युगपत्	P. 6. 2. 59
		11	तुमर्थे सेसेनसे	P. 3. 4. 9
		12	अस्थन्वन्त यदनस्थाः	R. V. 1. 164. 4
		13	छन्दस्यपि दृश्यते	P. 7. 1. 76
		13	अत्र पुष्कर आह—पृच्छेत् पदानि पुत्रा भोः	
6	14	7	अत्र कल्पः—अज्ञः पृच्छाम्यहं तज्ज्ञाः	
7	15	6	वव्रिमिति रूपम्	N. 3. 7
		16	सर्वे वेदा यत्पदमामनन्ति	K. Up. 2. 15
	16	2	वेदैश्च सर्वैरहमेव वेद्यः	Bh. G. 15. 15
		4	ब्रह्मात्मविषया वेदाः	Mah. Bhār.
		6	तनूषु ते क्रतव इन्द्र भूरयः	R. V. 1. 55. 8
7	16	8	विष्णौ वेदाः प्रतिष्ठिताः	Purāṇa.
		10	हृदयकमलमध्ये दीपवद्वेदसारम्	Smṛti.
		15	बहुलं छन्दसि	P. 7. 1. 8
		16	समासस्य	P. 6. 1. 223
		16	गणेषु चायमन्तोदात्तः पठितः	
		17	अर्थसन्देहाच्च न द्विखण्डता	
		17	अत्र कल्पः—तत्त्वंपदे लक्षणया प्रवृत्ते	
8	17	9	धेट् पाने	Dh. P. 1. 951

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

Verse	Page	Line	Citation	Reference
8	17	10	क्तादल्पाख्यायाम्	P. 4. 1. 5
		12	रसो वै सः	T. Up. 1. 6. 1
	18	1	समो गम्यृच्छिभ्याम्	P. 1. 3. 29
		2	गमहन—	P. 6. 4. 96
		2	हि च	P. 8. 1. 34
3	18	2	कल्पस्तु—यद्दर्पणो बिम्बविभेदकः स्यात्	
9	18	2	एवं मुनिप्रश्ने सूतस्योत्तरम् —मायानिवर्तनी विद्या	
	19	3	मी गतौ	Dh. P. 10. 281
		7	छन्दसीवनिपौ	P. 5. 2. 122
		8	वा छन्दसि	P. 6. 1. 106
		8	उदात्तस्वरितयोर्यणः	P. 8. 2. 4
		9	कल्पस्तु—वाचं समभ्यस्यति	
10	20	5	ञिमिदा स्नेहने	Dh. P. 1. 7. 79; 4. 133
		6	अपरे तु—इन्वतिर्व्याप्तिकर्मा	Nigh. 2. 18
		6	ई प्रीणने	
		6	इवि सेचने	
		7	पदकारास्तु परभक्तं नुममाहुः	
		7	मिन्वन्शब्दः प्रधानवाचीत्यन्ये	
10	20	10	तदुक्तं केशवाचार्यैः—आब्रह्म कल्पितं यत्स्यात्	
		19	कल्पस्तु—मोमागिरो विष्णुसदाशिवाजान्	
11	21	7	कल्पस्तु—स द्वादशात्मा न हि	
12	22	3	तमोमोहो महामोहः	Viṣ. Pur. 1. 5. 5
		6	वेदान्तवादिन आहुः—प्रतीतिमाया मूलाख्या—इत्युपनिषद्वचनात् (उपवर्षावचनात् in A).	
		12	विष्णुपुराणाद्युक्तानि प्रकृतिविधात्रादीनि	
		14	दिव आहुः परे अर्धे	
		15	पुरीषिणमित्यस्यान्यमर्थं वदन्ति केचित्	
	23	2	निघण्ट्वादौ त्रिंशन्मेघनामसु मध्ये एकोनविंशति नामानि पर्वतस्याप्यभि-	

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

Verse	Page	Line	Citation	Reference
			हितानि भवन्ति इति संप्रदायज्ञा आहुः	
12	23	6	शुद्धप्रधानयोर्मध्ये—इति योगयाज्ञवल्क्य-श्लोकद्वयम्	
		10	कल्पस्तु—मायाशरीरी प्रथमस्तु	
13		2	द्विधा खानि च तन्मात्राः—इति वृद्ध-शौनकः	
	24	2	कृत्स्नः केचित्	
		4	उक्तं च—देशे कर्तरि चक्रं स्यात्	
		11	तदुक्तं योगग्रन्थे—शुद्धः कालः प्रधानं च	
		17	कल्पस्तु—पञ्चारके कर्तरि	
14	25	2	भ्रमतीति वा चरतीति वा चक्रमिति शाकपूणिः	
		6	अन्ये त्वाहुः—रथनेमिरिव	
14	25	12	श्रवणं मननं सिद्धिः—इति पञ्चरात्रे	
		20	कल्पस्तु—नित्यः प्रवाहेण	
15	26	4	परादिश्छन्दसि बहुलम्	P. 6. 2. 199
	27	1	पथ गतौ	Dh. P. 1. 900
		2	केचिदत्र सप्तशब्दात्	
		2	थट् च छन्दसि	P. 5. 2. 50
		8	प्राणा वाव ऋषयः इति श्रुतेः	*Cf.* Ś. Br. 6. 1. 1. 1
		9	अहं महान् प्रधानं च—इति प्रशंसाया-मुक्तम्	
		11	इषु गतौ	Dh. P. 4. 19
		11	इषु इच्छायाम्	Dh. P. 6. 59
		12	इष आभीक्ष्ण्ये	Dh. P. 9. 53
		12	अधिकरणवाचिनश्च	P. 2. 3. 68
		15	क्रियार्थोपपदस्य च	P. 2. 3. 14
15	27	18	कल्पस्तु—यत् पञ्चविंशात्मकमस्ति	
16	29	4	स्त्रीणां शूद्रान्धपङ्गूनाम्—इति वृद्धमनु-स्मरणात्	
		10	गोधादियोषितां स्त्रीत्वे—इति ममैव-ज्येष्ठभ्रात्रा लक्ष्मीधराचार्येणोक्तम्	

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

Verse	Page	Line	Citation	Reference
16		12	उक्तं च शङ्खेन—नोपनीतो नैव	
		15	चन्द्रिकाकारोऽप्याह्निके एवमेवोक्तवान्—तद्ब्रह्मवादिनीव्यतिरिक्तविषयं इत्यादिना ग्रन्थेन	
		18	अस्ति चात्रैतिह्यम—श्रीशङ्कराचार्यः	
		19	न च स्त्रियो नोपदेश्याः इत्यस्ति श्रुतिः	
16	29	20	तदुक्तम्—यथाधिकारः श्रौतेषु—इति यमस्मृतिः	
		26	अत एवात्रेदं केश्चिदुक्तम्—स्त्रीणां यत्र स्मृतौ	
	30	4	पितुः पुत्रो गुरुर्यत्र	
		11	अत एवोपनिषदि श्रूयते—कामं पित्रे वाचार्याय	
		12	हरिवंशेऽपि—पुरा ह्यधर्मादिविनष्टसंज्ञाः	
		15	आहुश्च . . . योगनिष्ठाः देवहूत्यै हितः पुत्रः	
		20	अस्ति च प्रसिद्धिः—स्त्रीशूद्रवर्जमधीष्व	
		21	अन्या चास्ति स्मृतिः—न ब्रह्म व्याहरेद्योषित्	
16	30	27	प्राग्जन्मवासनाजन्य—इति ऐतिह्यपठितं पुराणवचनम्	
	31	3	आहुश्च भट्टाचार्याः—तानेव वैदिकान् शब्दान्	
		7	महाभारते च—श्रुतिभिर्बोधयेत् कांश्चित्	
		12	नृसिंहमन्त्रराजकल्पे तु—नृसिंहब्रह्मविद्यायाम्	
		16	तस्माच्छूद्रो न वक्तव्यः—इति श्रुतिविरोधात्	
		18	निषादस्थपतिं याजयेत्	
		19	एह्येवा इदं मधू	A. B. 5. 1. 1. 26
		22	तथाचाथर्ववेदिनाम्—अर्यमणं नु देवम्	Āś. Gṛ. 1. 7. 13
	32	1	नावेदविद्भिः पठनीयमेतत्	
	16	3	श्रीभागवते तु—स्त्रीशूद्रद्विजबन्धूनाम्	

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

Verse	Page	Line	Citation	Reference
16	16	6	श्वेताश्वतरे—ज्ञानं श्रुत्वा ब्राह्मणात्	
		3	शिवधर्मोत्तरे—यस्तु वर्णावकृष्टः स्यात्	
		13	भगवद्गीतासु—मां हिपार्थ व्यपाश्रित्य	Bh. G. 9. 32
		10	एकादशस्कन्धे—स्त्रियो वैश्यास्तथा	Bh. Pur. 11. 5. 4
		19	याज्ञवल्क्योऽपि—भूतात्मनस्तपोविद्ये	Yāj. Smṛ. 3. 33
		22	ब्रह्मोपनिषत्परिशिष्टे—नैव स्त्री न पुमानेषः	
		27	वासिष्ठरामायणे — श्वपचनिषादचाण्डल-प्रश्नः	
16	33	2	स्कन्दपुराणे कालिकाखण्डे पञ्चदशे मुक्ति-खण्डे—ब्राह्मणश्चापि विप्रस्य	
		8	विष्णुरहस्ये—कात्यायिनी च मैत्रेयी	
		11	यत्तैत्तिरीयैरुक्तम् — पुंसामप्यपरिव्राज-कानाम्	
		14	ब्रह्मगीतायाम्—श्रुतौ स्मृतौ वा परमार्थ-वेदिनः	
		21	कल्पस्तु—पुंवदन्धश्च योषिच्च	
17	34	7	रीङ् गतौ	*Cf.* Dh. P. 9. 30
		7	अञ्चू गतौ	*Cf.* Dh. P. 7. 21
		9	टिप्पणकारस्त्वाह—सनाभिर्जोतिरि-त्यादेः	
	35	3	जोतिर्जनपदे	P. 6. 3
		4	वोपसर्जनस्य	P. 3. 3. 82
17	35	4	तस्मिन्नर्पिता भुवनानि	R. V. 1. 164
		5	अक्षण्वान् न विचेतदन्धः	R. V. 1. 164
		6	छन्दस्यपिदृश्यते	P. 6. 4. 73
		6	आतो नुट्	P. 8. 2. 163
		7	आ सर्वनाम्नः	P. 6. 3. 91
		7	विष्वग्देवयोश्च टेः	P. 6. 3. 92
		8	अञ्चतेश्चोपसंख्यानम्	
		8	अचः	P. 6. 4. 138
		8	चौ	P. 6. 3. 138
		16	कल्पस्तु—त्वमर्थमुक्त्वा परमेश ईर्यः	
18	36	7	आचार्यो ब्रह्मणो मूर्तिः—इति श्रूयते	

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

Verse	Page	Line	Citation	Reference
18	36	13	कल्पस्तु—चो वेद देवं व्यतिहाररीत्या	
19	37	10	कल्पस्तु—मन्त्रोदिता ये मनुजाः	
20		7	एकान्याभ्यां समर्थाभ्याम्	P. 8. 1. 65
		11	कल्पस्तु—जीवः परश्च प्रतिपादनीयः	
21	41	9	कल्पस्तु—ज्ञानेन यत्तेजसि दीप्यमाने	
22	42	10	कल्पस्तु—यस्मिन् स्थिता ऐहिकपार-लोकम्	
23	44	2	छन्दस्तु स्वार्थ उपसंख्यानम्	
	45	9	अत्र वेदमित्र आह—द्वाभ्यां वेदस्। वाच्यं यत्	
		16	उपेदहं धनदाम्	R. V. 1. 33. 2
		28	अहमिन्द्रो न परा जिग्ये	R. V. 10. 48. 5
	46	3	प्रकाशनस्थेयाख्ययोश्च	P. 1. 3. 23
		3	समवप्रविभ्यः स्थः	P. 1. 3. 22
		4	श्लाघह्नुङ्स्था—	P. 1. 4. 34
23	46	7	अत्र त्रैष्टुभे जागते च वाक्ये श्लोकौ द्वौ—आहमीशां विशामीष्टम्	
		14	तत्त्वमसि	
		16	कल्पस्तु—गायत्रं ब्रह्म यत्तत्	
24	48	6	उत्सादिभ्योऽञ्	P. 4. 1. 86
		9	द्वित्रिभ्यां पाद्दन्मूर्धसु बहुव्रीहौ	P. 6. 2. 197
		14	आदित्ते विश्वे क्रतुम्	R. V. 1. 68. 2
		19	आपो अद्यान्वचारिषम्	R. V. 1. 23. 23
		23	रसो वै सः। रसं ह्येवायम्	T. Up. 2. 6. 9
		28	माचिदन्यद्वि शंसत	R. V. 8. 1. 1
	49	13	कल्पस्तु—गायत्रवाग्यज्ञ इयर्ति	
25	50	6	अभि त्वा शूर नोनुमः	R. V. 7. 32. 22
		6	रहस्यग्रन्थे तु—आ एना वोऽग्निम्	
25	50	6	एना वो अग्निं नमसा	R. V. 7. 16. 1
		7	प्रत्यु अदर्श्यायवाम्	R. V. 7. 81. 1
		7	आ इमा उ वाम्	
		7	इमा उ वां दिविष्टयः	R. V. 7. 74. 1
		8	गीतिषु सामाख्या	M. Sūt. 2. 1. 36

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

Verse	Page	Line	Citation	Reference
25	50	11	अत एव साम्नां महाकल्पे उक्तम्—साम्नां नार्थोऽस्ति	
	51	4	आह च योगयाज्ञवल्क्य:—अहंग्रहेण सगुणब्रह्मण:	
		12	तदुक्तं ब्रह्मपुराणे—ब्रह्मणा सह ते सर्वे	
		15	वाचस्पतिनाप्युक्तम्—विद्याकर्मस्वनुष्ठानै:	
		18	कल्पस्तु—यो जागतं वेद	
26	52	5	दुहः कप् घश्च	P. 3. 2. 70
		6	आपो वाव धेनवः	Kau. Br. 12. 1
	53	5	घृ क्षरणदीप्त्यो:	Dh. P. 3. 14
		9	अत्र शिवपुराणे कालिकाखण्डे वाराणसी माहात्म्ये लगुडेश्वरोपाख्याने . . . . सनत्कुमारवचनम् — कृते ज्ञानप्रद: सत्य:	
		23	कल्पस्तु—प्रामाणिक: श्रुत्युदित:	
27	54	8	विभाषा सपूर्वस्य	P. 4. 1. 34
		4	वसुरिति रश्मिनाम देवतानाम च	*Cf.* N. 12. 41.
		6	अत्राह वेदमित्रः—ईशत्वेनैव योगेन	
		9	हि गतौ वृद्धौ च	Dh. P. 5. 11
		11	पञ्चमा ज्ञानवाचका:—इत्येकाक्षरनिघण्टु:	
27	55	2	लक्षणहेत्वो: क्रियाया:	P. 3. 2. 126
		11	सुभगान्मन्त्रे—इत्यञ्	
		11	कल्पस्तु—आचार्य: शिवभावित:	
28	56	4	द्रुम हम मीम गतौ	
		5	मिष दर्शने	
		7	हिङ् ब्रह्म	
		7	तवै चान्तश्च युगपत्	P. 6. 2. 51
		10	कृवि हिंसायाम्	
		12	सृजेः क्वनिपि कुः—इति भोजः	
		12	सृक्का वदनैकदेश: चर्वणाधार:—इति भट्टभास्करमिश्र:	
		13	लेलिहानः—इत्यपरे	
		16	अय पय गतौ	*Cf.* Dh.P.1.503,505,935

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

Verse	Page	Line	Citation	Reference
28	56	17	पयते इत्यत्र एकवाक्ये इति प्रकृत्य युष्मदस्मदादेशा वक्तव्याः—इति वार्तिककारवचनात्	
		19	अत्रारूढानां लक्षणानि श्रीशङ्कराचार्य-शिष्यद्रमिडस्वामिना उक्तानि—अप्र-सक्तसमाधिस्थ	
	57	8	कल्पस्तु—नारूढे विधिरस्ति	
29	59	3	शिजि अव्यक्ते शब्दे	Dh. P. 2. 17
		5	धुः इति मनुष्यनाम	
		8	मायुर्वचसि मायायाम्—इति निघण्टुः	
		13	तदुक्तं विवरणे—श्रवणजनितबुद्धिः	
		19	तदुक्त वाचस्पतिना—यथा कतकरजो रजोऽन्तराविले जले प्रक्षिप्तम्	Bhām. Adhyāsa.
	69	12	कल्पस्तु—जीवोऽप्ययं ब्रह्म भवेत्	
30	61	2	स्वधाभिः । अन्ननामैतत्	Nigh. 2. 7
		4	चर गतिभक्षणयोः	*Cf.* Dh. P. 1. 591
		11	अन प्राणने	Dh. 2. 61. 4. 66
		12	शीङ् सुप्तौ	Dh. 2. 22
		13	छन्दस्युभयथा	P. 3. 4. 117
		13	छन्दसि लुङ्लङ्लिटः	P. 3. 3. 6
		19	कल्पस्तु—मायाया एकदेशे धृतमपि	
31	62	3	ईशो गुरुश्च जीवश्च—इति महायोगशास्त्रे	
		7	एष वै गोपाः	Ś. Br. 14. 1. 4. 9
	63	1	आपथयः	R. V. 5. 52. 10
		5	आह च वेदमित्रः—ब्रह्मपापक्रिया-भक्ति—	
		10	प्राच्यै दिशे नमः	K. S. 11. 1
		17	कल्पस्तु—ईशो गुरुर्जीव उदीरितः	
32	65	3	अन्ये तु बहुव्रीहावपि बहुप्रजाश्छन्दसि इति निपातनात् स्वरसिद्धिमाहुः	P. 5. 4. 123
		3	बहुप्रजाश्छन्दसि	
		4	कल्पस्तु—यः कर्मकर्ता न स आत्मवेदी	
33		4	कर्तरि निष्ठा	

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

Verse	Page	Line	Citation	Reference
		4	तृचि ङीष्प्रत्ययः	
33	66	1	देहेन सह जायेते—इति योगमित्रः	
		3	या पृथिवी सैव मम मातामही	T. Ā. 2. 6. 2
		6	द्यौर्नः पिता	A. V. 9. 10. 12
		6	पृथिवी माता	A. V. 9. 10. 12
		18	तदुक्तम्—ईश्वरः सर्वभूतानाम्	Bh. G. 18. 61
		24	प्रजापतिर्वै स्वां दुहितरमभ्यध्यात्	A. B. 3. 33
		29	डुधाञ् धारणपोषणयोः	Dh. P. 3. 10
	67	1	पुरुषो ह्वा अयं सर्वे आनन्दः	A. Ā. 3. 1. 2
	67	2	एतद्विद्याफलं तु कश्यपसंहितोक्तं ज्ञेयम्—ब्रह्मविद्याप्रसङ्गोक्त—	
		5	वामनस्त्वाह—न ब्रह्मलोकसप्राप्तिः	
		12	कल्पस्तु—नाको मे जनकः	
34	68	7	इन्द्रियाणि हयानाहुः	K. Up. 3. 4
		9	रीङ् गतौ	*Cf.* Dh. P. 9. 30
		9	ह्वरीभ्यां तुट् च	Un. 4. 202
		9	चरमधातुवशाच्चेष्टते—इति गर्भोपनिषदुक्तेश्च	
		10	(रेतः) उदकनामैतत्	Nigh. 1. 12
		11	परं ब्रह्म—इति केचित्	
		13	ओणृ अपनयने	Dh. P. 1. 482
		14	कल्पस्तु—मायानिवर्तकं किं स्यात्	
35	69	6	आचार्यो ब्रह्मणो मूर्तिः	Man. Smṛ. 2. 226
		9	कल्पस्तु—मायानिवृत्त्यै स्वनिजैकबोधः	
36	70	9	अत्र अव्ययप्रतिकारोत्तमुत्तरम्—तेमे-शब्दावुदात्तौ चेत्	
	71	1	तदुक्तं सांख्यशास्त्रे—मूलप्रकृतिरविकृतिः	Sān. Kār. 3
		6	विष्णुशब्दः साधितो विष्णुपदसिद्धौ मयैव	
		9	कारकेषु च भावे स्यात्	
		13	एवं व्युत्पत्तयो विष्णौ	
		15	कल्पस्तु—सप्तार्धगर्भा कृतषोडशापि	
37	73	5	निण्यः । अन्तर्हितनामधेयम्	Nigh. 3. 25
		10	कल्पस्तु—आदाय सच्चितमिदम्	

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

Verse	Page	Line	Citation	Reference
38	74	8	आतो धातोः	P. 6. 4. 47
		11	उक्तं च योगशास्त्रे—कुलालचक्रकं यद्वत	
		17	बह्वचारण्यके—शरीराणी ३ इत्युक्तम्	A. Ā. 2. 1. 8
38	75	4	क्वचिद्दुष्टः क्वचित्तुष्टः	
		8	कल्पस्तु—धर्मी क्वचिद्धर्मविपर्ययीवा	
39	78	5	कल्पस्तु—वेदास्तु जीवे परमे तदैक्ये	
40	79	11	उदकमिति सुखनामेति शाकपूणिः	
		12	प्राशादिपाठादन्तोदात्तत्वम्	
		13	कल्पस्तु—कार्या क्रियाचेद्द्विदितैव कार्या	
41	80	4	सलिलानि । बहुनामैतत्	Night. 3. 1
		8	पादोऽन्यतरस्याम्	P. 4. 1. 8
		9	तत्त्वंपदार्थविषयत्वेन द्विपदीत्यपरे	
		10	द्वित्रिभ्यां पाद्दन्मूर्धसुबहुव्रीहौ	P. 6. 2. 197
		11	एकपदी द्विपदीति । त्रिपदीत्यन्ये (Revise printed reading in this and following three entries)	
		12	एकपदीचतुष्पदीति पञ्चपदीत्यन्ये	
	81	1	द्विपदी चतुष्पदीति षट्पदीत्यन्ये	
41	81	1	एकपदी द्विपदी चतुष्पदीति सप्तपदीति केचित्	
		6	तदुक्तं प्रशंसायाम्—ज्ञातुर्ज्ञानबाहुल्यात्	
		13	कल्पस्तु—भूयांसि वस्तूनि जगादवेदः	
42	82	4	तस्याः समुद्रा इति वाचः समुद्रा इत्यनुक्रमणिका	
		5	तस्या अक्षरमित्यापः । सा प्रस्तारपङ्क्तिः	
		8	आह चोपवर्षः—बोध्यान्तरात्यये वाचाम्	
		13	सर्वे वेदा यत्पदमामनन्ति	K. Up. 2. 15
		21	कल्पस्तु—या ब्रह्मसूत्या उपवाच एताः	
43	83	3	यागसमाप्तावप्यदग्धहविर्जनितो धूमः शकमयः । तदुपस्थानमनेन—इति भारद्वाजसूत्रम	
		4	शकमयमिति शकधूमः	

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

Verse	Page	Line	Citation	Reference
43	83	4	अत्रैव मन्त्रे—उक्षाणं पृश्निम्—इति उक्षपदेन सोम उच्यते इत्यनुक्रमणिका	
		8	यद ह ब्रह्ममनुः—अध्यात्मवाक्यजपनात्	
	84	4	तदुक्तं वसिष्ठेन वेदान्तकारिकायाम्—एका मायेशितुः स्यात्	
		10	उक्ष सेचने	Dh. P. 1. 687
		11	पृश्निम् । स्वर्गनामैतत्	Nigh. 1. 4
		12	गोभिः श्रीणीत मत्सरम्	R. V. 9. 46. 4
		17	कल्पस्तु—जीवैः समेतां बहुरूपमायाम्	
44	85	6	था हेतौ च छन्दसि	P. 5. 3. 26
		9	अग्निर्ऋतुः संवत्सरः इत्युक्तं संवत्सरमध्ये	
		13	श्मश्रु वपसि प्रभुम	R. V. 1. 144. 4
		15	अप्स्वग्ने सधिष्टव	R. V. 8. 43. 9
		17	यदाह ब्रह्ममनुः—अध्यात्मवाक्यजपनात्	
	86	3	आत्मा देवानां भुवनस्य गर्भः	R. V. 10. 168. 4
		4	कल्पस्तु—भूखस्वरीशा अनल निलेनाः	
45	88	7	अन्यस्त्वाह—तुरीयं प्राज्ञतैजसान्यम्	
		8	अपर आह—परा पश्यन्ती मध्यमा वैखरीति	
		9	नामाख्यातोपसर्गनिपातेषु चतुर्थं भागं वदन्तीत्यपरे	
		10	कल्पस्तु—चत्वारि वाचो मिमते पदानि	
46	89	1	चत्वारि वाक्	R. V. 1. 164. 45
		3	त्रयः केशिनः	R. V. 1. 164. 44
		7	अहन्नहिं पर्वते शिश्रियाणम्	R. V. 1. 32. 2
		9	मित्रो जनान् यातयति ब्रुवाणः	R. V. 3. 69. 1
		11	शतं ते राजन् भिषजः	R. V. 1. 24. 9
		13	त्वमग्ने रुद्र	R. V. 2. 1. 6
		15	चित्रं देवानाम्	R. V. 1. 115. 1
		17	सौवर्णरुक्ममितद्युतिमप्रमेयम्	
		20	स्थिरेभिरङ्गैः	R. V. 1. 33. 9
46	89	21	अर्हन् बिभर्षि	R. V. 2. 33. 10
	90	2	त्रिकद्रुकेभिः पतति	R. V. 10. 14. 16

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

Verse	Page	Line	Citation	Reference
46	90	4	आत्मा देवानां भुवनस्य गर्भः	R. V. 10. 168. 4
		5	इदि परमैश्वर्ये	Dh. P. 1. 83
		6	अगि गतौ	*Cf.* Dh. P. 1. 830
		6	णीञ् प्रापणे	Dh. P. 1. 350
		12	कल्पस्तु—इन्द्रादिशब्दा गुणयोगतो वा	
47	91	4	आप इत्यन्तरिक्षनाम	Nigh. 1. 3
		8	उन्दी क्लेदने	Dh. P. 7. 20
		10	तदुक्तं शिवधर्मोत्तरे—वायुमेघाम्बु—	
		13	कल्पस्तु—सारूप्यमुख्यां पदवीम्	
48	92	2	द्वादशारं न हि	R. V. 1. 164-11
		5	षडृतुः संवत्सरः	Ś. Br. 1. 2. 5. 12
48	92	9	चरिचलिपति	P. 3. 1. 136
	93	4	अन्ये तु त्रिशतं षष्टिर्मज्जान इत्याहुः	
		5	परे अस्थिसंधय इत्याहुः	
		5	प्राणो वंशः	A. Ā. 6. 2. 1
		5	अथ कौण्ठरव्यः	A. Ā. 3. 2. 2
		7	अत्राप्युपासना विवक्षिता इति अस्मज्ज्येष्ठ-भ्रातरो लक्ष्मीधराचार्या उक्तवन्तः	
		8	कल्पस्तु—मासोदितारंहित उक्तसंख्यैः	
49	94	4	स्तनघन शब्दे	*Cf.* Dh. P. 1. 489. 830. 10. 313
		7	डुधाञ् धारणपोषणयोः	Dh. P. 3. 10
		20	तदुक्तं रत्नशास्त्रे—समुद्राधस्तलं प्राप्य	
	95	10	दद दाने	Dh. P. 1. 17
		13	सुपि स्थः	P. 3. 2. 4
		13	तत्पुरुषे तुल्यार्थे	P. 6. 2. 2
49	95	14	कल्पस्तु—यस्ते स्तनो वाणि	
50	96	1	यस्ते सरस्वत्यै । यज्ञेन साध्येभ्यः	
		9	नभ्राण्नपान्नवेदा	P. 6. 3. 75
		10	उपदिष्टमहावाक्यो महच्छब्देन कथ्यते इति वचनात्	
			कल्पस्तु—काम्येण धर्मेण सुरादिलोकः	
51			तत् सृष्ट्वा तदेवानुप्राविशत्	T. Up. 2. 6

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

Verse	Page	Line	Citation	Reference
51			तदुक्तं भगवद्गीतायाम्—सहयज्ञाः प्रजाः सृष्ट्वा up to मोघं पार्थसजीवति	Bh. G. 3. 10-16
			कल्पस्तु—धर्मैरधर्मैरथवा	
52			ऋक्पूरब्धूः पथामानक्षे	P. 5. 4. 74
			द्व्यन्तरुपसर्गेभ्योऽप इत्	P. 6. 3. 97
			अम्भो वाणी च तापी च—इति भोज-निघण्टुः	
52			ह्वः संप्रसारणम्	P. 6. 1. 32
			यङो वा	P. 7. 3. 94
			दिव्यं सुपर्णम्	P. 7. 3. 94
			ऋग्भाष्यादौ	R. V. 1. 164
			स्कन्दोद्गीथभाष्याणाम्	
			स्वामिना त्वन्यथैव व्याख्यातम्	
			शाकपूणियास्कादिनिरुक्तेषु	
			तदुक्तं नारदीयपुराणे—बिभेत्यल्पश्रुता-द्वेदः	
			स्कन्दादिभाष्यम्	
			निरुक्तम्	
			विष्णुधर्मोत्तरे यत्र पुष्करनामा यक्षः श्रीरामं प्रति सर्वधर्मानुक्तवान्। तत्र तत्र च ऋग्विधानं यजुर्विधानं साम-विधानं अथर्वविधानं चोक्तवान्। तत्र च कतिपयानां सूक्तानां संघातः कल्पश्चोक्तः। तत्राप्यस्यवामीयकल्पो-महान् अध्यात्मविषयत्वात्। तथा च प्रतिमन्त्रमर्थतो व्याख्यानं तत्र सूचितम्	
			वृद्धपराशरेणोक्तम्—हविष्पान्तं पौरुषं च	
			कल्पस्तु—स्वर्गी विष्ण्वादिलोकी	
			अत्र वृद्धशौनकः—उचथ्यदीर्घतमसौ	
			विष्णुः	
			विष्णुप्रकाशकः	
			स्वामी सहजानन्दकेशवः	

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

ABBREVIATIONS

A. A. Aitareya Āraṇyaka
A. B. Aitareya Brāhmaṇa
As. Gr. Āśvalāyana Gṛhya Sūtra
As. Sr. Āśvalāyana Śrauta Sūtra
Bham. Bhāmatī
Bh. Git. Bhagavad Gītā
Bh. Pur. Bhāgavata Purāṇa
Ch. Up. Chāndogya Upaniṣad
Dh. P. Dhātu Pāṭha
Kau. Br. Kauṣītaki Brāhmaṇa
K. Up. Kauṣītaki Upaniṣad
Mah. Bhar. Mahā Bhārata
Mait. Up. Maitri Upaniṣad
Man. Manu (Smṛti)
Man. Smr. Manu Smṛti
Man. Up. Muṇḍaka Upaniṣad
M. Sut. Mīmāṁsā Sūtra
Man. Up. Kar. Māṇḍūkya Upaniṣad Kārikā
M. Up. Muṇḍaka Upaniṣad
N. Nirukta
Nigh Nighaṇṭu
P. Pāṇini
Ping. Ch. Sut. Piṅgala Chandas Sūtra
Rgv. Ṛgvidhāna
R. V. Ṛgveda
San. Kar. Sāṅkhya Kārikā
Sar. An. Sarvānukramaṇī
S. Br. Śatapatha Brāhmaṇa
Sar. Par. Sarvānukramaṇī Paribhāṣā
Sv. Up. Śvetāśvatara Upaniṣad
T. A. Taittīrya Āraṇyaka
Tan. Br. Tāṇḍya Mahā Brāhmaṇa
T. B. Taittirīya Brāhmaṇa
T. S. Taittīriya Saṁhitā
Var. Vārtika
Ved. Su. Vedānta Sūtra
Vis. Pur. Viṣṇu Purāṇa
Un. Uṇādi
Yaj. Smr. Yājñavalkya Smṛti

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

APPENDIX II

Variants[1] *in Readings*

i. Sāyaṇa

Verse	Page	Line	
1 Pref.	1	9	Read स्तुत्या बहुत्वेन
	5	1	योग्यक्रियार्थसंबद्धो M, P.
		9	पिष्ट्येण
	6	4	मित्रावरुणादिषु P.
		20	स्वाधीनमायाजगत्कारणभूत: M.
			स्वाधीनमायो जगत्कारणभूत: P.
			This letter is acceptable and emendation is not quite necessary.
2	8	14	सप्त रसानां to be read separate.
	10	1	Omit वा at the end of the line.
		8	निहिता M, P.
5	12	1	संस्कृते न P. Read असंस्कृतेन
	13	3	Read सप्तसोम-
6	14	9	तान्यस्तम्भयत्तत्त्वम् । अजस्य M, P.
7	15	6	Read केचन अस्य गाव:
		9	Verse no to be read 7 instead of 6.
8	16	4	Read मनसा अस्यां अभिप्रायवता
	17	3	Read ओषध्याद्युत्पादन-
		4	Read नितरां
		6	अन्तर्वर्ती M.
		7	Read प्रियङ्ग्वाद्यन्नवन्त एव

[1] *Note*:—only material variants are noticed.

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

Verse	Page	Line	
9	18	1	Read निर्मीयन्ते
10	19	4	Read भूतभविष्यदद्यात्मना
11	20	1	Read सत्यात्मकस्य वा आदित्यस्य
	21	8	Read एषोऽहःसंतानः
12	22	2	अपि च अन्ये
		5	सप्त सप्त M, P.
13	23	3	आ तस्थुः अतिष्ठन्ति not found in M, P. *cf.* M. variants.
14	25	6	तस्मिन् not found in M, P. *cf.* P. f. n. 9.
		7	अर्पितानि M, P. emendation not necessary.
15	26	7	जाताः इति एवमाहुः M, P. emendation not necessary.
		9	निःसूर्योऽधिकमासो M, P.
			निःसूर्यो ह्यधिको मासो would be better.
16	27	1	मदीया या दीधितयः M, P.
	28	16	Read न पुमानेष
		19	Read स्त्रीत्वपुंस्त्वादीनि
17	34	1	Read हूयमानाहुतिर्गोरूपेण
		2	Read अवस्तादधोदेशे
		10	Read क्वचित् न सूते
		10	को नु खलु M, P. This is correct.
18	35	5	Read वाधिगच्छति
19	37	5	युक्ताः संबद्धाः आश्वादयो P.
20	38	7	Read परमात्मनो
		25	स्वयमपीश्वरोऽपि M, P.
	39	3	Read सार्वात्म्यसार्वज्ञादि
		4	तद्भावनासौ M, P.
21	40	20	Read संभावनाविपरीतभावने
22	42	2	Read इत्यधिदैवपक्षे
		4	तज्ज्ञानेन M, P.
		14	इत्यादिका तु ज्ञानात् प्राप्तिमाह P.
23	43	7	त्रैष्टुभं स्तोमयुक्त M, P.
		7,8	Read संपादितवन्तो
24	47	5	संमितं M, P.
		9	पश्चादन्योन्यां M, P.

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

Verse	Page	Line	
24		16	इयतीभिद्विपदाभिर्वर्ग: M, P.
25	50	7	Read प्ररिच्यते
26 Pref.	51	1	Read प्रवर्ग्ये
	52	6	तदुशब्द एवकारार्थ: M, P.
		7	ब्रवीमि उपह्वये इति M, P.
		12	Read तदु षु
27	54	5	Read अर्थाय
		10	Read प्रस्तुत्या
28	55	3	Read मातु वै
		4	वत्सस्य शब्दवदनप्रान्तं M, P.
29	57	5	अदनस्तनपानादिस्नेहं M, P.
		7	Read वव्रिरिति रूपनाम्
	58	6	Read उभयलिङ्गत्वम् । तथा
			इत्यन्तं for इत्येवं M, P.
		21	अयं for इयं M, P.
	58, 59	27 1,2	विद्युति विद्योतमापद्यमाना प्रतिवव्रिं औहत M, P. *cf.* P. f. n.
	59	7	Read वक्ष्यमाणत्वात् । स्तनितस्य
30	60	1	Read सत् for सत्
32	64	1	दर्शयति M, P.
33	65	7	Read ऊर्ध्वतानयो:
34 Pref.	67	1	Read पृच्छामि त्वा—इत्यनया
		2	Read पृच्छन्ति
35	69	2	Read यावती
36	70	7	Read त स्मात् ते ते एव
37	71	2	सर्वत्रानुमतोऽस्ति भाति प्रियमिति योऽयं P.
		4	omit full stop after कार्यकारणयोरभेदात्
		6	Read प्रजाये य—
	72	2	यदापरोक्ष्यज्ञानं P.
		4,5	Read आनुभविकं in both.
		13	Read परिज्ञानजनितं
		15	Read आगमिष्यति
		21	Read भवति पश्चाद्विलम्बाभावात् । यथा

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

Verse	Page	Line	
38	74	3	Read सात्त्विकजातेः तत्कारणानां
39	75	12	तथापि बुद्धिशुध्युत्पादनद्वारा P. ब्रह्मविषयत्वं P.
	76	19	दिवि देव आदित्यो वा M, P.
40	78	6	Read विश्वुदानीं
41	80	4	धातु: । प्रतिष्ठितानि M, P.
		5	Read निष्पादयन्ती एकपदी अव्याकृतत्वेन एकप्रतिष्ठाना एकरूपा वा आत्मना M, P.
		6	आमन्त्रितसहितभेदेन M, P.
		9	Read अनेकध्वनिप्रकारा
42	81	3	Read प्रदिशः चतस्रः । प्र शब्दो वीत्यर्थः । विदिश: चतस्रो दिशश्च । अथव प्रकृष्टा दिशो मुख्या: चतस्र: । तत्स्थेषु
43	83	8	Read प्रतमानि प्र कृष्ट नि
44	84	3	अतीते सति संवत्सरं M, P.
	85	1	Read स्पर्शशब्दधृतिकम्पलिङ्गैः
		3	Read सर्वमेकोऽभिविपश्यति
45	86		Add as Prefatory before verse—वाग्देवत्ये पशौ चत्वारि वाक्—इति हविषोऽनुवाक्या । चत्वारिवाक् परिमिता पदानि । यज्ञेन वाच: पदवीयमान्—इति सूत्रितत्वा
		6	Read सर्ववैदिक
	87	4	सर्वमातृका: M, P.
		11	Read स्वाख्यस्य
		19	Read या दिव
47 Pref.	90	3	सूत्रितत्वात् missing M, P.
48	92	3	क उक्तोऽपि महान् M. क उ कोऽपि महान् P.
		8	द्विर्भावप्राप्तः । चला: M, P.
		9	Read षष्टिश्च ह वै
49	94	2	Read धनानां
51	97	2	Read एव for अवं
		3	Read अवं for अव
		6	हुते for हुतवा M, P.

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

ii. ĀTMĀNANDA

Verse	Page	Line	
Prefatory	2	1	अस्य द्विः शाशदल स्तत्वं वेनत अस्य वामस्य द्विपञ्चाशन्मन्त्रात्मकमिदं A.
		2	स्कान्दभाष्य दि॒ A. This is the better reading.
			भाष्यकारे ऋद्गीथनामकादिभि: A.
			क्वचिदध्यात्मविषयां missing in A.
		6	मतसंग्रही : वररुचे A.
	3	8	संशयोत्थ पनं आशङ्कात्त A.
			क्वचित् missing in A.
			Read सूक्तं नरे ाप
		10	संशयोत्थ पनम शङ्कोत्तरं A.
		14, 15	यद्वा ज्ञानेन मोक्ष: तत तिपादनं A. ज्ञानेन मोक्ष: अक्षरवत् प्रतिपादनम् P. Perhaps the right reading is ज्ञानेन मोक्ष: । तस्य अक्षरवत् प्रतिपादनम् ।
		15	अश्नुते व्याप्नोति इत्यक्षरं A.
Prefatory	3	21	गौरामिमाय मलिलानि तक्षती येत्यन्तं तु शब्दोऽत्र पारिभाषिक: P.
		27	ज्ञानमोक्षाक्षरैर्नानार्थत्वेन वैश्वदेवत्वमङ्गीकुर्म: किन्तु तस्या: P.
		28	Read न: प्रमाणम्
	4	2	तत: इति मन्त्रे तत: क्षरत्यक्षरमिति P.
			तस्या इति मन्त्रे तत: क्षरम अक्षरमिति A.
		4	तत इति ऋगेव P.
			Read सौरत्वकथनमनया:
		17	संवत्सरसंस्थद्वादशेति संवत्सरसंस्थ कालचक्रवर्णनम् A.
	5	1-6	पर्जन्याग्निवता वा अन्त्या सरस्वते सूर्याय वा अन्त्या दिव्यं सुपर्ण इत्येषा सरस्वते सरस्वन्तमाह सूर्याय सूर्यं वा आह । सौरत्वं पूर्ववदेव वाच्यम् A.
		6	Read सौरत्वं
		7-8	विष्णुधर्मोत्तरे बृहति उत्तरार्धे दाशरथिं रामं प्रति पुष्करनाम यज्ञो राजधर्मादिकमुक्त्वा A.
			अत्र विष्णुधर्मोत्तरार्धे बृहस्पति: पुष्करो नाम यक्षो दाशरथिं रामं प्रति राजधर्मादिकमुक्त्वा Pj.
			Read the beginning as अत्र विष्णुधर्मोत्तरे बृहति उत्तरार्धे
1	7	2	Read प्रत्यक्षाद प्रमाणसन्निहित्यापरोक्षस्य ।
		2-3	परिच्छिन्नस्य तथा तस्य परोक्षस्य पलितस्य वृद्धस्यापरिच्छिन्नस्य व्यापकस्य तथा होता A.

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

Verse	Page	Line	
			Read परिच्छिन्नस्य । तथा परित्य शुद्धस्यापरिच्छिन्नस्य व्यापकस्य । तथा होता A.
1	7	4	Read द्वितीयो भ्राता मध्यम:
		5	Read विरोहितजस्कत्वात which is the A. Reading; what is printed is P. Reading.
		10	Read उपरिभवौ which is the A Reading; what is printed is P. Reading.
		19	Read मीमांसानो which is the A Reading; what is printed is P; Reading.
2	9	5	Read सप्त रुद्र: संक्षिपतीति वा which is the A Reading; what is printed is Pj. Reading.
		6	नमयिचेष्टको यस्य A.
		10	ईदृश चक्रस्यास्य रथस्य त्रिधाकाल: । चक्रवद्भ्रामकत्वात् P.
			Read अजरम । यावज्ज्ञान
		10-11	अजरं यावज्ज्ञानं तावदिति शेष: missing in P.
3	10	1	सूक्ष्मदेहमाश्रत्योक्तम् । अथ स्थूलदेहमाश्रत्योच्यते missing in A.
			प्रत्यक्षादर्पान्निहितस्थं for प्रत्यक्षादिसन्निहितं रथं A.
		2	यानि सप्ताङ्गानि वर्तन्ते तैरेव सप्तभिः: missing in A.
		3-4	चक्राणि इष्टप्रवर्तकानि यस्य अनिष्टान्निवर्तका न इति वा सप्तचक्रस्तं P.
		8	कुत्रेन्द्रियप्रवृत्तिस्तत्राह A.
			नाम नामानि नमनीयानि दैवतानि A.
		12	After the verse add another verse: ब्रह्मा तु रजसो रुद्रस्तमस: सु तेर्द र: । असत्कृतभैरवादि: क्रमादेव श्चतुर्दश ॥
	11	2	प्रवृत्तिगमनेत्येवं A.
3	11	5	रजस्तसीत्येवं सहैव कर्मार्थान् गमयन्ति । तथान्य नि A.
		6-7	विषयेषु खानामिन्द्रिणि सुरै: देवताभि: प्रवृत्तिगमनाप्रवृत्तिं प्रापितानि A.
		9	चक्रं यच्च भ्रमत्यपि A.
4	12	1	जायमानदेहं चक्रमिति P.
		3	अस्थिरहिता निरवयवा A. This is the right Reading.
			Read स यो निरवयव आत्मा which is the Reading in A.
		9	आत्मानायैः सुदुर्बोध: A.
5	13	1	Read प्रश्नप्रकारोऽत्र which is the Reading in A., पक्व: बाल:

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

Verse	Page	Line	
5	13	2	अविजानन् अजानन् निर्विशेषे आत्मनि A.
		3	वर्णव्यत्ययात्, एनानि निहिता ब्रह्मविष्णु P.
		3-4	देवानामिति विशेषे वेदानामित्यर्थः व्यञ्जनव्यत्ययात् एना ब्रह्मवित्सु प्रसिद्धानि पदानि A.
		5	प्रसिद्धानि विहितानि निगूढार्थानि A. Read प्रसिद्धानि । निहिता निहितानि निगूढार्थानि लक्षणया प्रवृत्तानि पदानि A.
		6	पुत्रत्वं बष्कये आपन्नाय A.
			सर्वे गत्यर्था ज्ञानार्थाः missing in A.
		9	Read ज्ञापयितुम् । उ अभिमतं वस्तु
		11	यद्वा ओयी तन्तुसन्ताने A.
6	14	1	सत्कर्मभिः शुद्धान्तःकरणः पुनः पृच्छेदित्याह A.
		2	Read विद्यने अपरोक्षज्ञानाय which is the Reading in A.
		9	Read योऽहं
6	15	2	Read वेद जानाति
		3	जीवस्य निहितं त्वमिति पदं लक्षणया A. जीवस्य निहितं त्वमिति पदं निहितं लक्षणया Pj.
			Read परमात्मनो ब्रह्मणः यत्
		4	Read पदं निहितं लक्षणया A. This is the right reading.
		6	पुरुषस्य वव्रिरिति कूपरूपं वरणीयम् A.
		12	चित्रपटसदृशं प्रपञ्चं ब्रह्मव्यतिरिक्तवस्तु त्रिगुणात्मकं प्रतिपादयन्त्येवं दृश्यमानाः A.
		14	ब्रह्म पदा एकदेशेन A. This is the right reading.
7	16	13	सगुणेशविषयकर्मविषयवेदमार्गेषु P.
8	17	1	Read मायासंबन्धे This is the reading in A.
		6	मिथ्यासंबन्धेन A.
		9	धीती धेय्यानोक्तेः अल्पेक्षिता असमासेऽपि A.
		10	मनसा स्वकार्येण. This is the right reading.
		14	Read विद्धं
9	18	3	साप्यविद्या प्रमा च सा A.
		5	Read इति । तदत्रोच्यते योगरूपिणी चित् । माता A. This is the right Reading.
		6	संविद्रूपायाः missing in A.
			धूःस्थानीये अन्तःकरणशोधके A. This is the right reading.

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

Verse	Page	Line	
9	18	7	Read मायाविद्यामुक्तिहेतुः Pj. divides the words.
	19		गतिनिवृत्तको A.
		2-3	प्रथमार्धचोक्तहेतुमाह A.
			Read प्रथमार्धचोक्ति हेतुमाह.
10	20	4	स्थितं विश्ववितं जाग्रदं पुरुषं वेदयन्ती A.
		6	यद्वा इवि प्राणने A.
		7	छान्दसो मुम् । A. This is the right Reading.
			मुममाहुः A. This is the right Reading.
		8	Read अर्धस्त्वेक एव. This is the A. Reading तिष्ठति omitted in A.
		8-9	तात्पर्यतः विश्वभावमपनयन्ती तुरीयरूपेण व्यवस्थापयन्ती तुरीये संस्कार-कल्पनाकल्पनाभ्यां A. Add तुरीयरूपेणावस्थापयन्तीमित्यर्थः after ताम् and before तुरीये.
10	20	21	विश्वोज्जितीविश्वविबोधनीं त्वा A.
11	21	2	यस्य तत । नहि तत् शास्त्रान्तरप्रसिद्धम्
		3	योग्यं जराय भुंक्ष इत्यशक्यम् । वर्वर्ति A. योग्यं रक्षयितुं शक्यं न हि वर्वर्ति P.
		4	द्योतमानां ब्रह्मविद्यां missing in A.
		6-7	अत्र कालरात्रि-A.
		9	Read जीर्ण for जीव which is the Reading in A.
		12	Read दिवानिशाश्च
12	22	5	Add इति । in the beginning. It is omitted in P.
			अस्मिता अहंकारः । अभिनिवेश आग्रहः after इति at the end of the line in A.
		11	इति उपवर्षवचनम् A. This seems to be the correct Reading.
		13	प्रकृतिविधातृब्रह्मप्राणिकर्तृकाणि A. Read कर्तृकाणि
12	22	13-14	परे अर्धे कतिपरे परे तत्त्वविदस्तु A.
		15	इत्यस्याल्पर्थं वदन्ति Pj. इत्यस्य अल्पमप्यर्थं वदन्ति A.
			पुरीषपदेन अविद्या च A.
		16	अवान्तरापि छाया जीवाख्या P.
	23	1	वैकुण्ठाख्ये दिवो लोके A.
			अथ अनन्तरं तथा वा इमे A.
		2	इत्यादिषु वेदनिघण्टौ वयतिमेघनामसु A.

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

Verse	Page	Line	
12	23	3	पर्वतस्याप्यभिधानानि भवन्ति A.
			अपरे पर्वते कैलासादिके A. अपरे कैलासादिके P.
		4	Read विरूपाक्ष which is the Reading in A.
		4-5	षळरे षड्भि: उपरिवर्तनर्मध्यमेन कालेन व्याप्ते अर्पितं A.
13		1	एवं विधे कालाख्ये स्वाधीनलिङ्गदेहमाश्रित: सर्वसंसार उच्यते A.
		2	प्राणा अन्त: क्रिया अरा: A.
	24	2-3	राशय एव अवयवा यस्य तस्मिन् करोतीति चक्रम् । कृच: के द्वि: लिङ्ग-शरीरमेकं कर्तृत्वात्मा A.
		4	Read लिङ्गद्वारकमेव which is the Reading in A.
		5	आयुधे संघसैन्यके A.
		16-17	ऋतनाशा ऋताभ्यागमप्रसङ्ग: A. Read कृतनाशाकृताभ्यागमप्रसङ्ग:
13	24	18	Read स्वधर्मै:
		20	Read प्रशंसायां च which is the Reading in A.
		21	Read प्राणास्तन्मात्रका:
14	25	2	चरतीति वा करोतीति वा चक्रमुच्यते इति शाकपूणि: A.
		3	Read ने शब्दो which is the Reading in A.
		9-10	उत्तानायां उन्मूल्य अविद्यायां आत्मानं तनोति इति ब्रह्मविद्या A.
		18	Read यत्पूर्वं which is the Reading in A.
	26	2	Read स्याद्रजसावृता
15		2	इति लिङ्गं शरीरमाहु: साकं जानां देहेन्द्रियादिभि: A.
		3	इव तत अक्ष्णां ब्रह्म यस्मिन् A.
			यस्मिन (तम् ?) ने दं P.
			यस्मिन् यद्वा साकं जानमितीदं षष्ठीबहुवचनान्तम् A.
15	26	4	बहुलमिति सूत्रनयव्यामितो व्यत्ययं A.
	27	2	लोकानुत्पथे गच्छतीति A.
			पूरणार्थे उटि ष्यट् च छन्दसि A.
		3	एकजं मायाकरणशरीरात A.
		6	श्रोत्रजातं वाक् । वायुजं A.
		13,14	प्रतिपादितानि तानीति चेत् जायन्ते तर्हि धामश: A.
16	29	1	अन्धादीनां लघूनां चाधिकर A.
		2, 3	इह ब्रवीतु मन्त्रोक्त: मैवं गुरुलक्षणं A.
		3	एवं स्त्रिया न सोऽधिकार: A.
		4	स्त्रीशूद्रान्धकपङ्गूनां A

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

Verse	Page	Line	
16	29	5	क्लीबानां कारुकाणां नो A.
		6	अत्र तु अनेनोत्तरमुच्यते A.
		8	ब्रह्मविषये A.
		13,14	उपनीत्युज्झितौ नैव ब्रह्मव्याहरते शिशुः। योषितोऽपि न तत्कुर्युर्विना तु ब्रह्म वादिनीम् A.
		16	विज्ञानेश्वरकारेणापि A.
		17	ब्रह्मविद्याधिकारो मा भूदिति A.
		25	ब्रह्म न वेत्ति चेत् A.
		28	पन्त्रादिविषयं भवेत् A.
	30	1	एवं अचिकित्वान् A.
			Read शिष्यलक्षणम्
			Read स्त्रादिष्वव्यभिचरितं which is the Reading in A.
		2	स्त्रीणामप्युद्देश्यत्वात A.
		2,3	Read पुत्रेष्वव्यभिचरितं which is the Reading in A.
6	30	6	एषापि स्त्रीनिषेधस्मृतिसदृशी नोपेया A.
		7	मन्त्रादिविषया चेति न A, P.
		8	आचिकेत ज्ञापयति A. This is the proper Reading.
			ज्ञातैव ज्ञापयति A.
		9	पितरं प्रति पुत्रस्यानुपदेष्टृत्वमिति चेत् A.
		15	आहुश्च सर्वज्ञगराधराद्याः अध्ययनसंप्रदायतिलकभूताः P.
			योगगणाः A.
	30	19,20	शूद्रसमैव ब्राह्मणस्त्री दुष्टा स्त्री शूद्रवर्जमधीयेत्युक्तम्। उपनयनाध्ययनाभाव-साम्यात् A.
		21	स्त्रीशूद्रवर्जमधीष्व इति युक्तम्—इति Missing in A.
	31	6	Read प्रयुञ्जते
		21	नापितस्य च शीतोष्णाभिरद्भिरिति श्रवणं यथा च A. नापितस्य च यथा श्रवशीतोष्णामन्त्रश्रवणं तथा च P.
			शमितृश्रावणं A. This is the proper Reading.
		23, 24	तथा च ब्रह्मविद्यायामधिकारो भविष्यति। ननु निषेधस्य A.
		25	ब्राह्मणस्य शोधकोऽयं मन्त्र इति सामर्थ्यं द्योत्यते A.
		26,27	यत्तूक्तं नापितादेः श्रवणमिति तत् तावन्मात्रनियतकर्मविषयम्। मा भूच्छूद्रस्याधिकारः A.
		28	श्रुतार्थावधारणे विद्यते इति पक्षे को A.

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

Verse	Page	Line	
16	32	6	इति भारतमाख्यानं पुराणं मुनिना कृतं इति भारताख्यानपुराणमूलोऽभिकारो दर्शित: तथाश्वेताश्वतरे A.
		9	श्रद्धातव्यं तत्परेण हि व्यधितं (भवितव्यं? जन्ममृत्यू हरेत् न श्रद्धितं न जन्ममृत्यू A.
		28	स्वपति: प्राह A. श्वपचनिषादचण्डालप्रश्न: कर्कटिकां प्रति P.
16	33	18	न साधनचतुष्टयसंपन्नस्तावन्नाधिकारी A.
17	34	6	कार्यकारणाभेदविवक्षां त्रासा एव श्रुति: । पुन: कद्रीची A.
		7	नाश: । ध्वंसु गताविति यथा कत् कुत्सितं असारं A. Read असारं for संसारं
	35	5	Read अक्षण्वान्
		6	इत्यनङ् A.
		11	जडांशत्याग उक्त: A.
		12,13	नाप्यात्मनि तस्य निरस्तात्रियन्वात । यदि कारणादियूथे
		16	जीवमायानाशेन A. This is the right reading.
18	36	3	इति शेष: । तेनानेन संगत: पितरमनुत्रेद अस्य जगत: पितरमीश्वरं अनुक्रमेण A.
		5	कविब्रह्मा । स एव व्युच्चरतीति वा विग्रह: A.
19	37	7	Read युत्रां
20	39	1,2	Read प्रतिपादनम् । असुपर्थं
		7	The whole passage अत्ति इत्यत्र up to प्रतिपादितं in L. 11 Missing in A.
21	41	1,2	यत्रात्यर्थप्रकाशे अविभज्यमाने A.
		8	मा मां विदथा वेदने सति वृत्तिलक्षणे A.
22	42	7,8	जीवस्य चिन्मात्रत्वज्ञानादेव मुक्तिरस्तु । किमन्तर्गडुना
23	44	1	गायत्री त्रिष्टुब्जगतीछन्दांस्याश्रिता: त्रय: पक्षा: सन्ति A.
		3	Read अवगतं तद्ब्रह्म गायत्रं ब्रह्मेत्युच्यते
	45	1	गायत्रीछन्दस्कं A.
		9	Read त्वंपदलक्ष्यं
		20	प्रकृते चैतन्यस्य विवक्षितत्वात् A.
		21	हेतौ शतृप्रत्यय: A.
		23	यामन् काले काले A.
		26	Read जगती
	46	6,7	Read पूजादौ न रिष्यथ

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

Verse	Page	Line	
23	46	10	जीयेऽहं न परीशो A.
		15	यद्वा इहैव अमृतत्वं सुखरूपत्वं आनशुः A.
		21	In the place of the passage up the end A has— अहमिन्द्रो न परीतमन्त्रो गुणाढ्या: छन्दोरूपोपाधिमन्त: मम दीर्घतमस: मतं तत्त्वमस्यादिवाक्यैर्जाताधी ब्रह्मविद्येति ।
24	48	1	प्रतिपूर्वो माङ् गत्यर्थ: in A. for धातूनामनेकार्थत्वात् Both must be put together.
		12	After बार्हती चोच्यते there is in A. एषा चतुष्पदी ब्रह्मविद्या आनुष्टुभी बार्हती चोच्यते before चतुष्पदा Instead of प्रतिमिमीते उपासक: there is in A. तेन उपनिषदभिमानिनीं देवतां गच्छन्ति
		15	ते तव परमात्मनाम्न: क्रतुं A.
		17	Read जायसे
		25	सेव्रमानं मां मां त्वदभिन्नात्मकं A. This is better.
	49	2,3	भो सखाय: मैत्ररिषण्यते । रेषणं स्त्रोत्रं गृणत। रिषति: कण्ड्वादौ पठ्यते A.
		3	Read स्तोत
		9	तत्त्वमसिपदार्थान् आहु: not in A. but this appears after स्वरूपमुच्यते of L. 11. Then the sentence beginning with तस्मादोंकार upto इति in L. 12 missing.
25	50	2	Read देवतां
		5	अस्तु इत्यन्तवन्ति A.
		7	Read प्रत्यु अदर्श्यायती
		8-11	After दिविष्टय: A has—इत्यादिनोच्यते—अत एव साम्ना महकल्पे उक्तम् of L. 11.
		12	साम्नां नार्थोऽस्ति वृद्धेस्तु सामर्थ्यं A.
		13	तत्रान्या अशुभा गिर: A.
	51	1	विद्यानां फलसमिधिका फलाभिव्यञ्जिका: A.
		1,2	गायत्र्याद्युपासकान् A. This is right.
26	52	6-8	धिन्वन्ति इति. महाव्रतब्राह्मणम् । एतां प्रसिद्धां प्रकृतां च अध्यात्मपरां च श्रुतिम् A.
27	54	5	देवतानाम च । ईशरश्मीनां ईशां ईशानादेवतात्वेन
	55	3	चर्चनकर्मा । मननेन गुर्वर्चनेन A.
		3,4	आगच्छति शिष्य आत्मसाद्भवति । A.

CC-0. ASI Srinagar Circle, Jammu Collection. Digitized by eGangotri Siddhanta Gyaan Kosha

Verse	Page	Line	
27	55	6	दुह्यते पयो याश्विभ्यां गुरुशिष्याभ्यां A.
		7	पय: ब्रह्म अमृतं क्षीरं च missing in A.
28	56	6	शिष्ये श्रुतेः प्रवृत्तिर्दर्शिता A.
		10	कृवि हिंसायाम् । अत्र करोत्यर्थ: । अनुभवी । A. This is right.
		11	ब्रह्म त्वमसि A. This is enough. Read तदध्वरमभ्यासिनं
		13,14	Read अभ्यासिनं
		14	सिध्यन्ती for स्निह्यतो in A.
		15	प्रतिपादयति धर्मं यज्ञं धर्मं नित्यनैमित्तिकात्मकम् । Perhaps to read धर्मं यज्ञं धर्मं नित्यनैमित्तिकात्मकम्
		17	प्रकृत्यनिघातयुष्मदादेशा: A. Read न निघात:
29	59	2	Read अपरोक्ष-
		4,5	अभीवृता अभ्यासमङ्गीकारिता । अन्यत्र धुरिति शब्दो धनु: प्रान्तदेशे वा नासाग्रे वा वर्तते A.
		8	मायावन्तं वाक्यवन्तं वा । मतुपो A.
		9	युक्तिभि: मर्त्यं प्रमादहेतुं संशयं हि निश्चितुं निश्चितं निचकार निराकरोति, विद्युदपरोक्षरूपा A.
		18	Read अपरोक्षज्ञानं Read रूपं स्वत
	60	4	जीवन्मुक्तेन for शिक्षनकर्त्रा आचार्येण in A.
		6	Read ज्ञानज्ञानिनो:
		7	मृदा चण्डालौ काहलिनौ द्वे च रूपिले कृत्वा A.
		10	Read स्पर्शने नापि कृतार्थतां मन्यते कपिलास्पर्शने । अथ च
30	61	1	Read द्वितीयार्धव्याख्या
		9,10	Better read भिन्न: न इत्याह
		10	पस्त्यानां जीवं जीवयन्तं इति पस्त्यानां त्रयाणां A.
		12	Read शये शिश्ये
		16	Read ब्रह्म जीव:
		17	Read जीवतरं for जीवान्तरं
		18	Read वीवतमम्
31	62	6,7	निशब्द: । तस्य निषिद्धे नञ् । अपश्यं गोपां इति
